# विविध हैम रचना समुच्चय



• ग्रंथरचनाकार •

आचार्य हेमचन्द्रसूरि

# परमोपकारिण: पूज्यप्रवरा:



शासनसम्राट् तपागच्छाधिपति, सूरिचक्र चक्रवर्ती
परम पूज्य आचार्य श्रीमद् विजय नेमिसूरीश्वरजी महाराजा



पियुषपाणी परम पूज्य आचार्य
श्रीमद् विजय अमृतसूरीश्वरजी महाराजा



गच्छाधिपति परम पूज्य आचार्य
श्रीमद् विजय मेरुप्रभसूरीश्वरजी महाराजा



परम सौम्यमूर्ति
परम पूज्य आचार्य श्रीमद् विजय
देवसूरीश्वरजी महाराजा



समतासागर
परम पूज्य आचार्य श्रीमद् विजय
धर्मधूरंधरसूरीश्वरजी महाराजा



समर्थ विद्वान, समुदायना वडील
परम पूज्य आचार्य श्रीमद् विजय श्री हेमचंद्रसूरीश्वरजी महाराजा

आचार्य श्री विजय देवसूरि ग्रंथमाला




• ग्रंथरचनाकार •

पूज्यपाद शासनसम्राट् श्रीमद् विजय-नेमि-अमृत-देवसूरीश्वर पट्टधरः

तत्पाद पद्म पराग सेवी आचार्य श्री विजय हेमचन्द्रसूरिः

• प्रकाशक •

श्री श्रुतज्ञान प्रसारक सभा

अमदावाद

प्रकाशक : श्री श्रुतज्ञान प्रसारक सभा - अमदावाद

प्रत : 500

मूल्य : 100/-

आवृत्ति : प्रथम

प्राप्तिस्थान : (1) प्रवीणचंद्र मंगळदास शाह
वासुपूज्य फ्लेट, शान्तिवन,
पालड़ी, अमदावाद-380 007
Mo. : 99251 05148

(२) शरदभाई घोघावाळा
बी-1, वी.टी. अेपार्टमेन्ट, काळानाळा
भावनगर-364 001.
Mo. : 94262 28338

(३) विजय दोशी
सी-602, दत्ताणीनगर
बोरीवली (वेस्ट) मुंबई.
Mo. : 93204 75222

(४) 'देवबाग'
श्री देवसूरीश्वरजी आराधना भवन
ट्रिनीटी स्कूल सामे, शान्तिवन, पालड़ी,
अमदावाद-380 007.

(५) नरेश टी. स्टोर
दाणापीठ, भावनगर.
फोन : 0278-2427640

मुद्रक : जय जिनेन्द्र ग्राफीक्स (नीतिन शाह - जय जिनेन्द्र)
30, स्वाति सोसायटी, नवरंगपुरा, अहमदाबाद-14.
जय जिनेन्द्र - मो. : 98250 24204
कुश - मो. : 99256 17992
E-mail : jayjinendra90@yahoo.com

# પ્રકાશકીય

શ્રી દેવસૂરિ ગ્રંથમાળા તરફથી આ 'विविध हैम रचना समुच्चय' નામનો ગ્રંથ બહાર પડી રહ્યો છે એ અમારા માટે ઘણા આનંદનો વિષય છે.

જય જિનેન્દ્ર ગ્રાફિક્સે આ ગ્રંથ સારી રીતે કાળજીપૂર્વક છાપ્યો છે તે બદલ અમે તેમને ધન્યવાદ આપીએ છીએ.

શ્રુતાનુરાગી એક અનામી વ્યક્તિએ (યુ.એસ.એ. નિવાસી) સંપૂર્ણ આર્થિક લાભ લીધો છે. તેમની એ શ્રુતભક્તિની અનુમોદના.

— પ્રકાશક

# પુરોવચન

શ્રી ગુરુદેવચરણસેવી – વિજય હેમચન્દ્રસૂરિ

## ભૂતકાળનું સિંહાવલોકન

આજે જ્યારે ઘણા વર્ષોબાદ છૂટક છૂટક કરવામાં આવેલી તથા મોટે ભાગે 'नन्दनवन कल्पतरु'માં, પ્રકાશિત કરવામાં આવેલી રચનાના સંગ્રહરૂપ 'विविध हैम रचना समुच्चय' નામે ગ્રંથ બહાર પાડવામાં આવી રહ્યો છે ત્યારે ભૂતકાળમાં ડોકીયું કરવું આવશ્યક બની જાય છે.

## પૂજ્યોની કેવી પરમોચ્ચ કૃપા

દીક્ષા પર્યાયનું બીજું ચાતુર્માસ, સં. ૨૦૦૬માં પૂ.આ.ભ. વિજય દર્શનસૂરીશ્વરજી મ., પૂ.આ.ભ. શ્રી વિજયોદયસૂરીશ્વરજી મ. તથા પૂ.આ.ભ. શ્રી વિજય નન્દનસૂરીશ્વરજી મ. એમ ત્રણ આચાર્ય ભગવન્તોની નિશ્રામાં સુરેન્દ્રનગર થયું. એ ચાતુર્માસમાં નવ મુનિરાજોને પંચમાંગ શ્રી ભગવતીજીના તથા બીજા પણ ઘણા સાધુ-સાધ્વીજીઓને અન્ય / અન્ય જોગ ચાલતા. વિધિ પૂ. વિજયોદયસૂરિ મ. કરાવતા એ વખતે મજાનું વાતાવરણ જામતું, પૂજ્યશ્રી ક્રમસર બધાના નામ બોલતા. તે વખતે ૨૫ / ૩૦ મુનિગણમાં બાલમુનિ તરીકે મારો જ નંબર ગણાતો. ત્યારે પૂ.આ. શ્રી લાવણ્યસૂરિજી મ. તથા મુનિરાજ શ્રી દક્ષવિજયજી મ.ના પત્રો સંસ્કૃત ગદ્ય / પદ્યમાં આવતા પૂ. શ્રી ઉદયસૂરિ મ.ને એ પત્રો વાંચી સંભળાવવાનું કાર્ય મારા શિરે રહેતું. એ વાંચ્યા પછી પૂ. શ્રી નન્દનસૂરિ મ.શ્રી પત્રો પ્રેમથી મને આપી દેતા, એ પત્રો વાંચવા અને વાંચ્યા પછી પાસે રાખવા મળતાં એથી મનમાં જે આનન્દ આવતો તે અવર્ણનીય હતો.

## રચનાની પ્રેરણા તથા પ્રારંભ

સં. ૨૦૦૭ની એ સાલ.

અમદાવાદ - લુણસાવાડા - મોટી પોળનો એ ઉપાશ્રય.

પૂ. મેરૂવિજયજી મ. (આચાર્યશ્રી) તથા પૂ. અમારા ગુરુ મહારાજશ્રી સાથે ત્યાં ચાતુર્માસ. અમારે તે સમયે વ્યાકરણ, સાહિત્યનો અભ્યાસ ચાલે.

પૂ. નન્દનસૂરિ મ. તબિયતના કારણે પાંજરાપોળથી ત્યાં પધારેલા. રોજ રાત્રે સાહિત્યના-મોટે ભાગે પંડિતરાજ જગન્નાથના શ્લોકો તેઓ સંભળાવે, આનંદ આવે, ત્યારે પદ્ય રચનાની પ્રેરણા પણ આપે. તે વખતે રચેલા એક/બે શ્લોક તેઓશ્રીને બતાવ્યા. ખુશ થઈ ગયા. એ પ્રારંભિક રચનામાં તો શી ભલીવાર હોય ! ભૂલો ય પાર વગરની હોય જ, પણ તેઓએ ખામી નહિ, પણ ખૂબી જોઈ પીઠ થાબડી કહ્યું કે શ્લોક સારો બનાવ્યો છે, પછી શાન્તિથી સમજાવ્યું, ભૂલો સુધરાવી. શ્લોક રચનાના શ્રી ગણેશ ત્યારે મંડાયા.

## વાંકલી - રાજસ્થાન

સં. ૨૦૦૯નું અમારું ચાતુર્માસ વાંકલી (રાજસ્થાન)માં હતું. ત્યારે મુંબઈ બિરાજમાન પૂ.પં. શ્રી ધુરંધરવિજય મ. સાથે સંસ્કૃતમાં પત્ર લખવાની શરૂઆત થયેલી. ઘણા પ્રેમથી તેઓ પત્રનો જવાબ આપતા. પત્રમાં શ્લોકો લખ્યાં હોય તો તેમાં સુધારો કરી દે. એકવાર એક પત્રમાં સુધારો કર્યા પછી એમણે નીચેનો શ્લોક લખેલો.

"दल-संस्करणं किंचिद्-हितधिया वितन्यते,

तल्लक्ष्यपथभानेय-मुज्ज्वलायतिना त्वया ॥"

## રાણકપુરની પ્રતિષ્ઠા

વાંકલીના ચાતુર્માસ પહેલાં, ફા.સુ. ૫ ના એ ભવ્ય પ્રતિષ્ઠા થઈ. અમારું એ સદ્ભાગ્ય કે એમાં સામેલ થવાનો અવસર મળેલો. મન ધરાઈને એ મહોત્સવ માણેલો. એ વખતે પૂ. નન્દનસૂરિજી મહારાજે એના વર્ણનના થોડા શ્લોકો રચેલા અને મને બતાવેલા. મનમાં બીજ પડ્યું કે આપણે પણ આવી રચના કરવી. વાવેલું બીજ તરત તો ક્યાંથી ઊગે ? પણ એ ઉગ્યું સાદડીમાં એક વર્ષ પછી.

## સાદડીમાં ચાતુર્માસ

સં. ૨૦૧૦નું અમારું ચાતુર્માસ સાદડીમાં થયું ત્યારે મૈથિલ પં. બબુઆઝા પાસે અમારો અભ્યાસ ચાલે. તેઓ સાહિત્યિક પંડિત, શ્લોકોની રચના પણ સારી કરે, અમે તેમને અમારા મનની ભાવના કહી, એ સાંભળી

તેઓ રાજી થયા તથા ઉત્સાહ આપ્યો - કહ્યું : પ્રયત્ન કરો, રાણકપુરની છાયામાં તો છીએ જ, એના પ્રભાવથી પણ સરસ સ્ફુરણા થશે. એમના ઉત્સાહજનક વચનોથી ઉત્સાહિત થઈ પ્રારંભ કર્યો.

## પદ્ય રચનામાં પ્રગતિ

પદ્ય રચનામાં જેમજેમઆગળ વધતા ગયા તેમ/ તેમપ્રગતિ થતી ગઈ. કેટલીક વાર તો ન ધારેલી કલ્પના થઈ આવતી. શરૂઆતમાં રાણકપુર તીર્થનું વર્ણન તથા તે પછી પ્રતિષ્ઠાનું વર્ણન અને છેલ્લે બેન મ. સાધ્વી શ્રી હેમલતાશ્રીજીની દીક્ષાનું વર્ણન. જે દીક્ષા સાદડીમાં સં. ૨૦૦૯ ફા.વ. ૨ ના પૂ. શ્રી વિજયોદયસૂરીશ્વરજી મ. આદિની નિશ્રામાં થઈ હતી.

## અભ્યાસ કાળના ૧૨ વર્ષ

પંડિત બંસીધર ઝાજી અમારી પાસે ૧૨ વર્ષ રહ્યા. તે દરમ્યાન તેમની પાસે વ્યાકરણ / સાહિત્યનો મુખ્યત્વે અભ્યાસ થયો. ઘણી જ લાગણીથી સમયની સામે જોયા સિવાય તેઓ અભ્યાસ કરાવતા. રાત્રે પણ આવૃત્તિ કરાવે. તે અભ્યાસકાળ દરમ્યાન વ્યાકરણની પ્રથમા, મધ્યમા, શાસ્ત્રી અને આચાર્યની પરીક્ષા આપી.

## બે વર્ષ મુંબઈમાં

સં. ૨૦૧૪-૧૫ બે વર્ષ મુંબઈ આદીશ્વર ધર્મશાળામાં ચાતુર્માસ દરમ્યાન ન્યાય-વ્યાકરણ અને સાહિત્યાચાર્ય પં. નરેન્દ્રચન્દ્ર ઝાજી પાસે, સં. ૨૦૧૧ સાબરમતીના ચાતુર્માસ દરમ્યાન પં. દીનાનાથ ઝાજી પાસે શરૂ કરેલો ન્યાયનો અભ્યાસ આગળ વધ્યો તથા કલકત્તાની ન્યાયની પ્રથમા-મધ્યમાની પરીક્ષા આપી તથા તેમની પાસેથી મજાનો સુભાષિતોનો ખજાનો મળ્યો.

## રત્નખાણ સમુદાય

શાસનસમ્રાટ્શ્રીનો સમુદાય રત્નખાણ જ ગણાય. એક એકથી ચડિયાતા રત્નો એમાં પાક્યા. સંપૂર્ણ સિદ્ધહેમબૃહદ્વૃત્તિ જેમને કંઠસ્થ હોય એવા શાસનસમ્રાટ્શ્રીના લઘુવયસ્ક શિષ્ય પ્રવર્તક શ્રી યશોવિજયજી મ.ની કાવ્ય રચના શક્તિ બેનમૂન ગણાતી, એવું કહેવાતું કે ઉછાળેલું લીંબુ નીચે પડે ત્યાં સુધીમાં તેઓ એક શ્લોકની રચના કરી લેતા.

## અપૂર્વ જ્ઞાન પ્રાપ્તિ

સં. ૨૦૧૭ની સાલમાં અમે અમદાવાદ-પાંજરાપોળ હતા ત્યારે અન્ય સમુદાયના એક વિદ્વાન મુનિરાજશ્રી ત્યાં મળવા આવેલા, તેમની સાથે આપણાં એક / બે મુનિઓના અભ્યાસની વાત થતાં તે સાંભળી તેઓ રાજી થઈને બોલ્યા-

"आकरे पद्मरागाणां, जन्म काचमणेः कुतः ?"

પદ્મરાગની ખાણમાં કાચનો જન્મ ક્યાંથી થાય ? આ તો એવો સમુદાય છે કે જેમાં પરસ્પરના સંપર્કથી જ વગર ભણે અપૂર્વ જ્ઞાન મળી જાય.

## સં. ૨૦૨૮ - સં. ૨૦૩૧-૩૨

સં. ૨૦૨૮ - દોલતનગર ચાતુર્માસ દરમ્યાન પં. જગદાનન્દ ઝાજી પાસે અભ્યાસ દરમ્યાન 'નેમિસૌભાગ્ય' કાવ્યની રચનાની શરૂઆત થયેલી પછી ધીરે ધીરે આગળ વધતી રહી.

સં. ૨૦૩૧ - મુંબઈ ગોડીજીના ચાતુર્માસમાં આલોચના શતકની રચના થઈ, એ રચના એટલી સહજ અને સરસ થઈ કે મન તૃપ્ત થઈ ગયું. શ્રી ગોડીજી દાદાના પ્રભાવે જ એમાં અગત્યનો ભાગ ભજવ્યો હોય એવો અનુભવ થયો.

સં. ૨૦૩૨ - પાલિતાણા ગિરિરાજની છાયામાં પં. જગદીશ ઝાજી પાસે અભ્યાસ દરમ્યાન "श्रेष्ठि जिनदास कथा" ની રચના બહુ ઝડપથી તથા સારી રીતે થઈ એ વખતે ગિરિરાજના પ્રબળ પ્રભાવની ઝાંખી થયેલી.

અમારામાં આવેલી ઉચ્ચાર શુદ્ધિ તથા લેખન શુદ્ધિમાં આ બધા મૈથિલશાસ્ત્રીજીઓનો ઘણો મોટો ફાળો છે.

## શ્રી જિનદાસ શ્રેષ્ઠિ કથા - અપૂર્વ કૃતિ

આ એક અપૂર્વકૃતિ છે. પ્રાચીન કોઈ સાહિત્યમાં આનો ઉલ્લેખ જોવા મળતો નથી. પૂજ્ય શાસનસમ્રાટ્શ્રી આ કથા વ્યાખ્યાનમાં દિવસો સુધી બહુ જ રસપૂર્વક વર્ણવતા હતા. જે સાંભળી શ્રોતાઓ રસ તરબોળ બની જતા. એ વર્ણન સાંભળીને પૂ.આ.પ્ર.શ્રી કસ્તૂરસૂરીશ્વરજી મ. શ્રીએ પ્રાકૃતભાષામાં

એ કથા તૈયાર કરી એને "पाइयविन्नाण कहा" માં મૂકી. એ વાંચ્યા પછી અમને પણ એ બહુ ગમી તથા એના ઉપરથી સંસ્કૃત શ્લોક બદ્ધ રચના કરી જે ઘણી પ્રાસાદિક તથા બોધક/રોચક છે. વ્યાખ્યાનમાં પણ વાંચી શકાય એમ છે.

અમારા પૂ. ગુરુ મ. શ્રી કહેતા હતા કે - પૂ. શાસનસમ્રાટ્શ્રીએ ભાવનગરના ચાતુર્માસ દરમ્યાન વ્યાખ્યાનમાં જ્યારે આ કથા વાંચેલી ત્યારે તે સાંભળી આખી સભા ચોધાર આંસુએ રડી પડી હતી. એમણે પણ તે વખતે તે કથા સાંભળી હતી.

## પ્રબળ પુણ્યોદય

પૂ. શાસનસમ્રાટ્શ્રીના સં. ૨૦૦૩ના સાબરમતી ચાતુર્માસ દરમ્યાન લગભગ રોજ દર્શન-વન્દનનો લાભ મળતો રહ્યો. એ પછી તેઓશ્રીના બધા જ પટ્ટધરરત્નો...

પૂજ્ય ન્યાયવાચસ્પતિ આ.પ્ર.શ્રી વિજયદર્શનસૂરીશ્વરજી મ. શ્રી,
પૂજ્ય ગીતાર્થ શિરોમણિ આ.પ્ર.શ્રી વિજયોદયસૂરીશ્વરજી મ. શ્રી,
પૂજ્ય સિદ્ધાન્તમાર્તંડ આ.પ્ર.શ્રી વિજયનન્દનસૂરીશ્વરજી મ. શ્રી,
પૂજ્ય સમયજ્ઞ આ.પ્ર.શ્રી વિજયવિજ્ઞાનસૂરીશ્વરજી મ.શ્રી,
પૂજ્ય કવિ દિવાકર આ.પ્ર. શ્રી વિજયપદ્મસૂરીશ્વરજી મ. શ્રી,
પૂજ્ય પીયૂષપાણિ આ.પ્ર. શ્રી વિજયઅમૃતસૂરીશ્વરજી મ.શ્રી,
પૂજ્ય વ્યાકરણ વાચસ્પતિ આ.પ્ર.શ્રી વિજયલાવણ્યસૂરીશ્વરજી મ.શ્રી,
પૂજ્ય પ્રાકૃતવિશારદ આ.પ્ર.શ્રી વિજયકસ્તૂરસૂરીશ્વરજી મ.શ્રી,

આદિના દર્શન / વન્દન / સાંનિધ્ય / અન્તરનાં આશીર્વાદ / શેષકાળમાં સાથે રહેવાનો તથા ત્રણ / ચાર ચાતુર્માસ કરવાનો તથા તેઓશ્રીની પાસે અભ્યાસ તથા વાચના લેવાનો પણ લાભ મળ્યો છે. જે બહુ ઓછા આત્માઓને પ્રાપ્ત થાય છે. સં. ૨૦૦૫ માં દીક્ષા થયા પછી શરૂઆતના વર્ષોમાં પૂજ્ય શ્રી મેરુવિજયજી મ. તથા પૂજ્ય ગુરુ મ. શ્રી દેવવિજયજી મ.ની હૂંફ-પ્રેરણા-માર્ગદર્શન-અભ્યાસ આ બધું પ્રાપ્ત થતું જ રહ્યું, એ પછીના વર્ષોમાં પૂજ્ય આ. શ્રી વિજયોદયસૂરીશ્વરજી મ. શ્રી,

તથા પૂજ્ય આ. મ. શ્રી વિજય કસ્તૂરસૂરીશ્વરજી મ. શ્રી

તથા પૂ.આ. શ્રી વિજયધર્મધુરન્ધરસૂરીશ્વરજી મ.શ્રી આ ત્રણના જીવનની, એમના શુદ્ધોચ્ચાર-શુદ્ધ લેખન અને બોલ / ચાલ તથા રહેણી / કરણીની ગાઢ અસર નિજના જીવનમાં આવી, જેણે જીવન ઘડતરનું કામકર્યું. મારે એટલું તો કબુલ કરવું જ જોઈએ કે મારા જીવનમાં તથા મારી રચના જે કાંઈ ખૂબી જોવા મળે છે તેમાં અનેકોનો અનેક પ્રકારનો સહયોગ જ નિમિત્ત રૂપ છે.

મહાકવિ કાલિદાસ જેવા પણ પોતાના રઘુવંશ મહાકાવ્યના પ્રારંભમાં જ્યારે "मणौ वज्रसमुत्कीर्णे, सूत्रस्येवास्ति मे गतिः" એમકહીને પોતાના કર્તૃત્વનો ઈન્કાર કરતા હોય ત્યારે આપણા જેવાની તો વાત જ શી કરવાની હોય ?

## એ વિરલક્ષણોની યાદ આજે ય અકબંધ છે

સૌ કોઈને પોતાના જીવનમાં એવી ક્ષણો આવતી જ હોય છે કે જેની યાદ સદા તાજી રહ્યા જ કરે. અમારે પણ ઉંમરના ૮૦ વર્ષ અને દીક્ષા પર્યાયના ૬૮ વર્ષમાં ત્રણ ચાતુર્માસના સમયો એવા વીત્યા છે કે એ સમયે થયેલી કમાણી મૂડીરૂપ બની, એમાં ઉત્તરોત્તર વૃદ્ધિ થતી રહી છે. સમય સં. ૨૦૧૨, સ્થળ - સાબરમતી - રામનગર જૈન ઉપાશ્રય, ત્યાં ચાતુર્માસ બિરાજમાન પૂ. પં. (પછીથી આચાર્ય) શ્રી મેરુવિજયજી મ.ની પ્રેરણાથી ઉપધાન તપ કરાવવામાં આવ્યા, તે પ્રસંગે શ્રી સંઘની વિનંતિથી પૂ. પા. ગીતાર્થ શિરોમણિ આચાર્ય ભગવન્ત શ્રીમદ્ વિજયોદયસૂરીશ્વરજી મ. શ્રી પણ સપરિવાર પધાર્યા. ઉપધાન તપનો મંગલ પ્રારંભ થતાં ક્રિયા પૂ. પંન્યાસજી મ. કરાવે અને વ્યાખ્યાન પૂજ્યપાદશ્રીજી ફરમાવે. ઉપવાસના દિવસે સમયના બંધનવગર અને નીવીના દિવસે ૧ / ૧।। કલાક ચાલતા એ વ્યાખ્યાનમાં શ્રોતાઓ રસતરબોળ બની જતાં, હું પણ બધા જ કામો બાજુ ઉપર મૂકી વ્યાખ્યાનમાં અચૂક હાજર થઈ જતો નવકારથી સર્વમંગલ સુધી બેસવાનું અને સ્થિર ચિત્તે સાંભળવાનું. દોઢેક મહિનાનો વીતેલો એ કાળ જ્ઞાનની દૃષ્ટિએ ઘણું / ઘણું આપી ગયો. અગમ્યભાવો જાણવા / સમજવા મળ્યા.

## સં. ૨૦૨૨ - સુરતમાં ચાતુર્માસ

પૂ.પા. પીયૂષપાણિ આચાર્ય ભગવન્ત શ્રીમદ્ વિજય અમૃતસૂરીશ્વરજી મ.શ્રીની નિશ્રામાં સુરત-ગોપીપુરા-નેમુભાઈની વાડીના ઉપાશ્રયમાં પૂ. રામસૂરિ મ., પૂ. ગુરુ મ. અને પૂ. ધર્મધુરન્ધરસૂરિ મ. આદિ પરિવાર સાથે ચાતુર્માસ થયું. તે વખતે મારા પંચમાંગ શ્રી ભગવતીજીના યોગોદ્વહન થયા, તથા સાથે પૂ. ધર્મધુરન્ધરસૂરિ મ. પાસે ભગવતીજીની વાચના બહુ સારી રીતે થઈ. તેમજ વ્યાખ્યાનમાં પણ પૂ. ધર્મધુરન્ધરસૂરિ મહારાજે શ્રી ભગવતીસૂત્ર જ વાંચ્યું. વ્યાખ્યાન શૈલી એવી મજાની કે શ્રોતાઓ રસપૂર્વક સાંભળ્યા જ કરે, મેં પણ નિયમિત વ્યાખ્યાનો સાંભળ્યા અને લખ્યા પણ ખરાં. એ સાંભળ્યા પછી ભગવતીસૂત્ર વાંચવાની હિંમત આવી અને ત્રણ-ચાર વખત વાંચ્યું પણ ખરું. એ ચાતુર્માસમાં તેઓશ્રીએ ભગવતીસૂત્ર સંપૂર્ણ વાંચ્યું. એ એમની શૈલીની ખૂબી. ત્યાંના ઝવેરભાઈ માસ્તર, સૌભાગ્યભાઈ લાકડાવાળા, પાનાચંદભાઈ મદ્રાસી, બાલુભાઈ નાણાવટી વિ. એવા સુબુદ્ધ શ્રાવકો હતા કે જેઓ વ્યાખ્યાનમાં કહેવાતી સૂક્ષ્મવાતોને પણ ઝીલે અને મર્મ પકડે.

## સં. ૨૦૨૩ - પાલિતાણમાં ચાતુર્માસ

પૂ.પા. આચાર્ય મ.શ્રી વિજય અમૃતસૂરીશ્વરજી મ. આદિ સાથે સુરતથી વિહાર કરી પાલિતાણા આવ્યા. સુરતમાં હતા તે બધા જ અહીં પધાર્યા. શત્રુંજયવિહાર અને સાહિત્ય મંદિરમાં બિરાજમાન થયા. વ્યાખ્યાન / વાણી, આરાધના બધું સાહિત્ય મંદિરમાં થતું. ત્યાંની સ્થિરતા દરમ્યાન દીક્ષા / અંજનશલાકા / પ્રતિષ્ઠા, પદપ્રદાન વિ. વારાફરતી એટલું થતું રહ્યું કે જેને જોઈ લોકો આશ્ચર્યચકિત થઈ જતાં. ચાતુર્માસમાં પૂ. ધર્મધુરન્ધરસૂરિ મ. એ નન્દિસૂત્ર ઉપર મનનીય વ્યાખ્યાનો કર્યા. ચારે મહિના એ વ્યાખ્યાનો સાંભળ્યા, અને ધન્યતા અનુભવી. આમસં. ૨૦૧૨, સં. ૨૦૨૨ અને સં. ૨૦૨૩ આ ત્રણ વર્ષો અમારી જીંદગીના સોનેરી વર્ષો પુરવાર થયા.

## ઉપકાર સ્મૃતિ અને ઋણ સ્વીકાર

આ ઉપકાર શ્રેણિની પરંપરામાં સર્વોપરિ તો છે માતા-પિતા ને ગુરુ મ. (બા મહારાજ પરમતપસ્વિની તથા અત્યન્ત સરળ સ્વભાવી સા. શ્રી પદ્મલતાશ્રીજી મ., સદાય આરાધનામાં અને નિજાનન્દમાં મ્હાલતા જનક મહારાજ પૂ. મુનિરાજ શ્રી હીરવિજયજી મ. તથા ગુરુ મ. પરમસૌમ્યમૂર્તિ પૂ. આ. શ્રી વિજય દેવસૂરીશ્વરજી મ.શ્રી) તે પછી સર્વોપરિ છે દીક્ષાદાતા તથા જેઓની શુભ નિશ્રામાં સં. ૨૦૦૫ થી ૨૦૨૦ એટલે ૧૫ વર્ષ સુધી એક ધારા રહ્યા તથા જેઓએ મારા અભ્યાસ માટે અતિશય કાળજી રાખી તે પૂજ્યપાદ આ.ભ. શ્રી વિજયમેરુપ્રભસૂરીશ્વરજી મ. શ્રી તથા નિજ પર સમુદાયના વાત્સલ્યમૂર્તિ ગુણગૌરવશાળી પૂજ્ય આચાર્ય ભગવન્તો, લાગણીશીલ પદસ્થો - મુનિરાજો તથા પ્રોત્કટ ભક્તિભાવિત હૃદય પરમ-વિનીત શિષ્ય પ્રશિષ્યાદિ સમુદાય તથા વિનય / વિવેક અને ભક્તિથી ઉભરાતો શ્રમણી સમુદાય (જે ગણ્યા ગણાય એમ નથી) વળી સ્નેહ / સદ્ભાવ અને ભક્તિથી ઉભરાતો શ્રાવક શ્રાવિકા સમુદાય પણ એવો છે કે જેઓ નિષ્કામભાવ / ભક્તિ અને હૂંફ અમને આપતા જ રહ્યા છે આ બધા પ્રબળ શુભ નિમિત્તો સિવાય અત્યાર સુધી હેમ/ ખેમ ચાલી રહેલી સંયમ-યાત્રા તથા જીવનયાત્રા ને સાહિત્યયાત્રા ચાલવી મુશ્કેલ જ ગણાય.

★ વળી વિદ્વત્સમુદાયમાં તથા સમગ્ર જૈન શાસનમાં બહુમાન્ય ગણાય એવા આ. શ્રી પ્રદ્યુમ્નસૂરિજી જેવા લઘુબન્ધુ તરીકે તથા પોતાના અપ્રતિમગુણગણથી આદર્શરૂપ ગણાય એવા સાધ્વી શ્રી હેમલતાશ્રીજી જેવા લઘુભગિની તરીકે મળ્યા છે એનું મારે મન અતિશય ગૌરવ છે. આમમાતા-પિતા અને ભાઈ / ભગિની એમ ચાર / ચાર સ્વનામધન્ય પુણ્યાત્માઓના પુત્ર તથા વડિલબન્ધુ બનવાનું સૌભાગ્ય જેને મળ્યું હોય એની છાતી ગજ / ગજ કેમ ન ફુલાય?

## પ્રસ્તુત ગ્રંથ અંગે કંઈ

અલગ / અલગ સમયે થયેલી રચનાઓનો એક સંગ્રહ બહાર પાડીયે તો સારું એવું તો મનમાં ક્યારનું થતું હતું અને એ માટે ભલામણ પણ થતી રહેતી હતી. પણ એનું જલ્દી અંજળ આવવામાં નિમિત્ત બન્યું. 'नन्दनवन कल्पतरू' ના અંકોમાં એ બધી રચનાઓ વારાફરતી પ્રકાશિત થતી રહી તથા એના સંપાદક 'કીર્તિત્રયી' એ કાળજીપૂર્વક એને સંપાદિત કરી તૈયાર કરી તે જ છે. એ અંકોમાંથી બધી જ રચનાઓ સંકલિત કરી તૈયાર કરવામાં તથા એ સિવાયની બીજી રચનાઓની કોપી કરવામાં તથા આ કાર્યમાં પ્રોત્સાહિત કરવામાં પૂજ્ય મુનિશ્રી જગત્ચન્દ્રવિજયજી મ., પૂ. સાધ્વીશ્રી દીપ્તિપ્રજ્ઞાશ્રીજી, સાધ્વીશ્રી આનન્દપૂર્ણાશ્રીજી તથા સાધ્વીશ્રી નમિતાશ્રીજી વિ.એ અગત્યનો ભાગ ભજવ્યો છે. તે અનુમોદનીય છે.

તથા આ ગ્રન્થના પ્રકાશનમાં આર્થિક લાભ સામે ચાલીને લેનાર અનામી (યુ.એસ.એ. વાસી) વ્યક્તિની શ્રુતભક્તિ સદાય સંસ્મરણીય રહેશે.

જય જિનેન્દ્ર ગ્રાફીક્સવાળા નીતિનભાઈ શાહ તથા ભાઈ કુશે સારી રીતે પુસ્તક છાપી તૈયાર કરી દીધું તે બદલ તેમને ધન્યવાદ...

– હેમચન્દ્રસૂરિ

# संस्कृत पद्य विभाग : अनुक्रम


| क्रम | विषय | पृष्ठ |
|---|---|---|
| १. | 'भगवते ऋषभाय नमो नमः' | 1 |
| २. | श्रीजिनशासनाष्टकम् | 3 |
| ३. | वन्दे विमलाचलम् | 5 |
| ४. | परमात्म-प्रार्थना | 7 |
| ५. | श्री कदम्बगिरेर्माहात्म्यम्-अज्ञातकर्तृकम् | 11 |
| ६. | आर्या-पञ्चविंशतिका ( परमात्म-प्रार्थना ) | 14 |
| ७. | श्री गौतमस्वामि-स्तुति-षोडशिका | 17 |
| ८. | श्री गौतमस्वामिगुणाष्टकम् | 19 |
| ९. | सकललब्धिनिधान-गौतमस्वाम्यष्टकम्। | 21 |
| १०. | श्रीश्रमणस्तुतिषोडशिका | 22 |
| ११. | आचार्यप्रवरश्रीहरिभद्रसूरीश्वराणां स्तवनाष्टकम्॥ | 25 |
| १२. | शासनसम्राड्गुणस्तुतिषोडशिका | 27 |
| १३. | आचार्यवर्य्यश्रीविजयामृतसूरीश्वराणां स्तवनाष्टकम्॥ | 29 |
| १४. | श्रीमाणिभद्रयक्षराजस्तुत्यष्टकम्॥ | 31 |
| १५. | श्रीसरस्वतीस्तोत्रम् | 33 |
| १६. | श्रीजिनदासश्रेष्ठिकथा | 34 |
| १७. | अष्टादशपापस्थानकालोचनाशतकम्॥ | 77 |
| १८. | न्याय विशारद-न्यायाचार्य महामहोपाध्याय श्री यशोविजयगणिवराणां गुणानुवादस्तुतिः | 88 |

| क्रम | विषय | पृष्ठ |
|---|---|---|
| १९. | श्रीनेमिसौभाग्यमहाकाव्यम्। | 91 |
| २०. | श्री सिद्धचक्र स्तोत्रम् | 131 |
| २१. | विषयत्यागाष्टकम्। | 132 |
| २२. | शरणाष्टकम्। | 133 |
| २३. | स्वर्णाक्षरीय कल्पसूत्र प्रशस्तिः। | 134 |
| २४. | पूज्याचार्यवरेण्यश्रीविजयोदयसूरीश्वराणाम् गुणसङ्कीर्तनम्। | 137 |
| २५. | प्रकीर्णकोपदेशकश्लोकाः | 138 |
| २६. | श्री केसरिया-वीर-परम्परा-प्रासाद-प्रतिष्ठाप्रशस्तिः॥ | *139* |
| २७. | पूज्यंप्रति दलकमलम्-आचार्यगुणसंकीर्तनम्। | 145 |
| २८. | आ.श्री विजयप्रद्युम्नसूरिवरं प्रतिलिखितं पत्रम्। | 149 |
| २९. | कीर्तिकल्लोलकाव्यम् | 153 |
| ३०. | साध्वीश्री हेमलता श्री दीक्षावर्णनम् | 192 |
| ३१. | श्रीवृद्धिचन्द्र-शतकम् | 194 |
| ३२. | पूज्योपाध्याय श्री हेमचन्द्रविजय गणिवराणां सूरिपदप्रदानावसरे प्रशस्ति पद्यावलिः॥ | 204 |
| ३३. | गुरूस्तुतिः | 207 |
| ३४. | श्री गौतमस्वामिस्तुतिः | 207 |

# १. 'भगवते[१] ऋषभाय नमो नमः'

— आचार्यविजयहेमचन्द्रसूरिः

(द्रुतविलम्बितवृत्तम्)

कृतजगज्जनमङ्गलशर्मणे,
त्रिभुवनार्चितपादसरोरुहे ।
प्रथमराड्-मुनि-तीर्थकराय ते,
भगवते ऋषभाय नमो नमः ॥१॥

भवति नैव यदङ्घ्रिपयोजयो-
र्विरचिता प्रणतिर्विफला कदा ।
नृपतिनाभिकुलाभरणाय ते,
भगवते ऋषभाय नमो नमः ॥२॥

कचभरो हि निजांसलुठन् हरे-
र्विनतितः खलु येन न लुञ्चितः ।
विनतवत्सलतादिगुणाय ते,
भगवते ऋषभाय नमो नमः ॥३॥

विनमिना नमिना च निरन्तरं,
यदनघाङ्घ्रियुगं समुपासितं ।
सकलकामितकामघटाय ते,
भगवते ऋषभाय नमो नमः ॥४॥

---

१. आ चरणनी पादपूर्तिरूप श्रीआदिजिनस्तुति ।

वसुनिधि( ९९ )प्रमितस्वकनन्दनान्,
'कुरुत सङ्गर' मित्थमुपादिशत् ।
सकलसत्त्वहिताय जिनाय ते,
भगवते ऋषभाय नमो नमः ॥५॥

स्वसुतबाहुबलिं तनयामुखाद्,
'गजत उत्तर वीर' वचस्त्विदम् ।
प्रहितवान् भगवान् य इनाय ते,
भगवते ऋषभाय नमो नमः ॥६॥

समसहस्रतपश्चरणार्जितं,[१]
विमलकेवलरत्नमुपाहरत् ।
स्वजननीकरयोर्य उपांशु ते
भगवते ऋषभाय नमो नमः ॥७॥

भविकलोकचकोरहिमांशवे,
दुरितसन्तमसौघखरांशवे !
शमवते भवतेऽनुपमाय ते,
भगवते ऋषभाय नमो नमः ॥८॥

इति मया गुरुदेवपदाम्बुज-
भ्रमरहेमसुधाकरसूरिणा ।
प्रथमतीर्थपतिः स्तुतिगोचरो,
विहित ईप्सितदानसुरद्रुमः ॥९॥

❀ ❀ ❀

---

१. १ वर्ष

## २. ॥ श्रीजिनशासनाष्टकम् ॥

— आचार्यविजयहेमचन्द्रसूरिः

श्रीतीर्थनाथैरपि पूजिताय,
भव्यैर्नितान्तं किल कामिताय ।
सर्वातिगानन्दसुसाधनाय,
नमो नमः श्रीजिनशासनाय ॥१॥ (उपजातिः)

सर्वात्मसौख्यातुलकारणाय,
सर्वापदाम्भोनिधितारणाय ।
भव्यात्मदौर्गत्यनिवारणाय,
नमो नमः श्रीजिनशासनाय ॥२॥

मुमुक्षुहंसावलिमानसाय,
चिदादिरत्नव्रजरोहणाय ।
दयादिपुष्पोदयनन्दनाय,
नमो नमः श्रीजिनशासनाय ॥३॥

सद्भावबीजाङ्कुरसेचनाय,
दुष्कर्मधान्योच्चयपेषणाय ।
कुतीर्थिकव्यूहविभेदनाय,
नमो नमः श्रीजिनशासनाय ॥४॥

भव्याम्बुजोद्बोधनभास्कराय,
धीमच्चकोरव्रजचन्दिराय ।
तत्त्वार्थिभृङ्गावलिवारिजाय,
नमो नमः श्रीजिनशासनाय ॥५॥

भवाब्धिमज्जज्जनताप्लवाय,
विकल्परेणूद्गतिमारुताय ।
मिथ्यात्वदाहारतिचन्दनाय,
नमो नमः श्रीजिनशासनाय ॥६॥

रागोरगक्ष्वेडसुधात्मकाय,
मुक्त्यास्पदप्रापणसद्रथाय ।
भागीरथीस्त्रोत इवाऽमलाय,
नमो नमः श्रीजिनशासनाय ॥७॥

सर्वार्थसद्दर्शनदर्पणाय,
समस्तपृथ्वीतलमण्डनाय ।
अनाद्यनन्ताय सदोदिताय,
नमो नमः श्रीजिनशासनाय ॥८॥

इत्यष्टकं श्रीजिनशासनस्य,
व्यरीरचद् भक्तिभरैः प्रणुन्नः ।
श्रीनेमिसूरेरमृतस्तदीय-
देवस्य शिष्यो मुनिहेमचन्द्रः ॥९॥

# ३. ★वन्दे विमलाचलम्

— आचार्यविजयहेमचन्द्रसूरिः

वन्दे सिद्धाचलं नित्यं,
कुर्यात् तस्य च सेवनाम् ।
मन्ये धर्मस्य हस्तोऽयं
लातुं मोक्षतरोः फलम् ॥१॥

उज्ज्वला मन्दिरश्रेणि-
रुतुङ्गा यत्र राजते ।
मन्ये हिमालयभ्रान्त्या-
ऽवतीर्णा व्योमजाह्नवी ॥२॥

एतत्तीर्थसमं वाऽन्यत्
नास्ति तीर्थं जगत्यपि ।
एवं सीमन्धरस्वामी,
शक्रस्य पुरतोऽवदत् ॥३॥

---

★'विमलाचल नितु वन्दीये' स्तवनस्य संस्कृतं रूपान्तरम्

सर्वेषामपि तीर्थानां,
यात्रायां यत्फलं भवेत् ।
तस्मात्-शतगुणं पुण्यं,
भवेदस्यैव यात्रया ॥४॥

ए एनमर्चयेद् भक्त्या,
तस्य स्यात् सफलं जनुः ।
सुयशःसम्पदस्तस्य,
चिरं च स हि नन्दति ॥५॥

# ४. परमात्म-प्रार्थना

— आचार्यविजयहेमचन्द्रसूरिः

(द्वात्रिंशिका) रचना सं. २०२४

अस्मिन् भवाम्बुधौ नाथ !, मज्जतो मे दयानिधे ! ।
यानपात्रं त्वमेवाऽसि, तस्मात् तारय तारय ॥१॥

त्वया विना न लोकेऽस्मिन्, त्राताऽन्यो मम विद्यते ।
तन्मयि करुणां कृत्वा, नाथ ! तारय तारय ॥२॥

शरण्यं त्वत्पदाम्भोजं, मया नाथ ! समाश्रितम् ।
नाऽतस्त्वया विधातव्या, मय्युपेक्षा कदाचन ॥३॥

त्वत्पादोपासनेनैव, प्राप्तवानियतीं स्थितिम् ।
अतो मां तावकं मत्वा, तारयाऽस्माद् भवाम्बुधेः ॥४॥

नश्यन्ति जन्मिनां नाथ ! जन्मकोट्यर्जितान्यपि ।
पापानि त्वत्प्रसादेन, तमांसीव विवस्वता ॥५॥

त्रिजगज्जन्तुभावाँस्त्वं, जानासीश ! कराम्बुवत् ।
तदग्रे किं मया वाच्यं, चरित्रं मे त्रपाकरम् ॥६॥

नेत्रे निमील्य ध्यानैक-चित्तो यावद् विचिन्तये ।
त्वदन्यस्तारको नाथ ! नास्ति मे भुवनत्रये ॥७॥

निर्गुणोऽपि त्वया स्वामिन् !, तार्यः संसारसागरात् ।
निर्गुणः सगुणो वेति, महान्तश्चिन्तयन्ति न ॥८॥

धन्योऽहं यन्मया नाथ ! कर्मव्याधिविनाशकः ।
सच्चिदानन्दसम्पूर्णः, सुकृतादीश ! वीक्षितः ॥९॥

कृतार्थं जीवनं मेऽद्य, सफलं च जनुर्मम ।
नेत्रे इमे पवित्रे च, यल्लब्धं तव दर्शनम् ॥१०॥

सत्यपि त्वादृशे नाथे, तारके त्रिजगत्पतौ ।
नो चेद् भवाम्बुधेस्तारस्तत्र किं तव गौरवम् ? ॥११॥

अनेके तारिता नाथ ! जनाः संसारसागरात् ।
मम तारण एवाऽद्यः कथङ्कारं विलम्बसे ? ॥१२॥

राजसे मुक्तिधाम्नि त्वं, मज्जामीश ! भवाम्बुधौ ।
महात्मनां न तद्योग्य-माश्रितोपेक्षणं प्रभो ! ॥१३॥

अहर्निशं व्यथन्ते मां, रागद्वेषादयोऽरयः ।
साहाय्यं तद्विधेयं मे, त्वया नाथेन सत्वरम् ॥१४॥

नाथ ! प्रतिप्रदेशं ते, सन्त्यनन्ता गुणा विभो ! ।
कथमेको गुणस्तेभ्य-स्त्वया मे न वितीर्यते ॥१५॥

अद्य श्वो वा भवाम्भोधे-स्तारकोऽसि त्वमेव मे ।
कर्तव्येऽवश्यकर्तव्ये, कालक्षेपो न युज्यते ॥१६॥

देवाधिदेव ! सर्वज्ञ !, त्रैलोक्यार्चितपत्कज ! ।
करुणाम्भोनिधे ! स्वामिन् !, नाथ ! तारय तारय ॥१७॥

अपारेऽस्मिन् भवाम्भोधौ, भ्रान्तोऽनादेरनेहसः ।
विना त्वां शरणं नास्ति, तन्मां तारय तारय ॥१८॥

जिनाधीश ! जगन्नाथ !, जगद्धितपरायण !
त्वच्चरणाम्बुजद्वन्द्वे, हृद्भृङ्गो मे निलीयताम् ॥१९॥

सर्वं समीहितं सद्यस्त्वत्सेवातः प्रसिद्ध्यति ।
दूरे प्रयाति दुर्भाग्यं, सद्भाग्यं च प्रसर्पति ॥२०॥

सुखदुःखे अविज्ञाय, कृतो यत्नो निरन्तरम् ।
स सर्वो विफलो जातः, सुखं तत्त्वं निबोधय ॥२१॥

शिरोमणीयते नाथ ! त्वदाज्ञा यस्य जन्मिनः ।
अपारोऽपि भवाम्भोधिस्तस्येश ! गोष्पदीयते ॥२२॥

भवाब्धौ मज्जतां नाथ !, त्वदाज्ञा ननु नाव्यति ।
तदाश्रिता जना नूनं, निस्तरन्ति न संशयम् ॥२३॥

भवाब्धौ भ्रमतां नाथ, प्राप्तं यत्तव शासनम् ।
तेन मन्ये निजं धन्यं, कृतपुण्यं जगत्पते ! ॥२४॥

जगदर्च्यं जिन ! त्वां ये, नमन्त्येकाग्रमानसाः ।
ते धन्या वन्दनीयाश्च, पुण्यभाजः सुरैरपि ॥२५॥

भवाटवीभ्रमद्भव्यशुद्धमार्गप्ररूपिणे ।
करुणाम्भोधये तुभ्यं, नमः श्रीपरमात्मने ॥२६॥

सुरासुरनमस्याय, विश्वानन्दविधायिने ।
कर्मामयविमुक्ताय नमः श्रीपरमात्मने ॥२७॥

त्वत्समो नाऽपरो दाता, मदन्यो नैव निर्धनः ।
विधाय करुणां तस्माद्, वाञ्छितार्थं समर्पय ॥२८॥

पुण्यं त्वच्छासनं नाथ ! सर्वसौख्यैककारणम् ।
कलौ दुरापं सम्प्राप्तं, तद्भाग्यं मे महत्तरम् ॥२९॥

प्रार्थये हे जगद्वन्द्य !, भूयो भूयो दयार्णव !।
त्वदीयं शासनं मेऽस्तु, सदा जन्मनि जन्मनि ॥३०॥

यज्ज्ञानदर्पणे सर्वं, विश्वं प्रतिफलत्यदः ।
स नाथ शरणं मे स्यात्, स्वप्ने वा जागरेऽपि च ॥३१॥

त्वत्पादपङ्कजं भक्त्या, ये नमन्ति नरोत्तमाः ।
न भ्रमन्ति भवाटव्यां, ते कदाचिज्जिनोत्तम ! ॥३२॥

वेदाक्षिखाक्षिमितसंवति( २०२४ )पादलिप्ते,
शत्रुञ्जयेशऋषभेश्वरसुप्रसादात् ।
श्रीनेमिसूरिविजयामृतदेवशिष्ट्या,
द्वात्रिंशिकां विहितवान् मुनिहेमचन्द्रः ॥३३॥

❀ ❀ ❀

# ५. श्री कदम्बगिरेर्माहात्म्यम्-अज्ञातकर्तृकम्

— आचार्यविजयहेमचन्द्रसूरिद्वारा प्राप्तम्

कदम्बगिरिमाहात्म्यं वर्णयामि स्वशक्तितः ।
तथा शत्रुञ्जयस्नान-महिमानमनुत्तमम् ॥१॥

सुदुस्तरे कलियुगे पञ्चमारेऽपि सम्प्रति ।
मनुष्याः पापकर्माणो रागद्वेषसमाकुलाः ॥२॥

प्रतिधर्ममविश्वस्ताः कुतर्का नास्तिका जनाः ।
पाखण्डधर्मनिरता देवधर्मविनिन्दकाः ॥३॥

गुरुमानमकुर्वन्तः पतन्ति नरकेऽशुचौ ।
मातृपितृगुरुभक्ति-रहिताः सकला जनाः ॥४॥

गुरुविद्वेषमिच्छन्ति धनमानमदान्विताः ।
स्तब्धा दुर्व्यसनासक्ताः पुत्रस्त्रीद्रव्यलालसाः ॥५॥

अहं-ममेत्यभिहताः सच्छासनपराङ्मुखाः ।
अन्योऽन्यं द्वेषकर्तारः सतां दुःखप्रदायकाः ॥६॥

इति दोषविभेदेन पतन्ति नरकेऽशुचौ ।

जिनशासनभक्तिवत्सलतया कृपालुना शासनाधिष्ठायकेन विचारितं स्वमनसि यद्येते उपरि वर्णिता महापापिजना भगवद्विमुखा भूत्वा स्वेनैव दोषेण नरके पतिष्यन्ति तन्मम शासनाधिष्ठायकताया किं महत्त्वं यद्येतेषां महापापिनामपि पतितपावनपरमात्म-

सांमुख्यं प्रापय्योद्धारं करिष्यामि - इति ममाऽधिष्ठायकभावस्य साफल्यम्, अतस्तेषामुद्धारम्प्रति मया दयालुता कर्तव्या । केनोपायेन तेषां रक्षणं कार्यमिति क्षणमात्रं ध्यात्वा स्वतो भूमेरधस्तात् पाताले पापिनां पतनाय नारकलोको वर्तते, तस्मिंस्तामिस्त्रान्धतामिस्त्ररौरवाद्याः शतशो नरकावासाः पापानां शिक्षार्थं सन्ति। यत्र परमाधार्मिकपराधीनाः सर्वे पापिनः स्वकर्मफलदुःखं भुञ्जानाः सन्तः पश्चात्तापं प्रकुर्वन्ति - प्रभो ! मया किं कृतम् यदेतादृशं दुःखं प्राप्नोमीत्यादि । तत्राऽपि दक्षिणस्यां दिशि बहुपापिनो जीवाः, तत्पापिनामुत्तरणार्थमेव लोकानुभावेन तत्रैव दक्षिणस्यां दिशि भूम्यां श्रीकदम्बगिरिः स्थापित इव लक्ष्यते । यस्य दर्शनेनैव महापापिनामपि पापनाशो भविष्यति । श्रीशत्रुञ्जयतले च वहन्त्यां शत्रुञ्जयनद्यां स्नात्वा शुद्धान्तःकरणाः सन्तस्ते महापापिनोऽपि पापरहिता भविष्यन्ति । उक्तञ्च-

दक्षिणस्यां च काष्ठायां कदम्बाख्यो गिरिर्महान् ।
यस्य संदर्शनेनैव शुद्धयन्ति पापिनो जनाः ॥१॥

तस्मात् पापप्रणाशाय नरकोत्तरणाय च ।
कदम्बाख्यगिरेर्यात्रा कर्तव्या पापभीरुभिः ॥२॥

यत्रैकदर्शनादेव क्षीयन्ते पापराशयः ।
शुद्धान्तःकरणा भूत्वा मोदन्ते दिवि देववत् ॥३॥

शत्रुञ्जया नदी यत्र स्नात्वा देवं प्रपूजयेत् ।
दत्त्वा दानञ्च विधिवन्मानुष्यं सफलं कुरु ॥४॥

नेमिसूरिं गुरुं नत्वा तदाज्ञापरिपालकः ।
सर्वस्वं गुरवे दत्त्वा न पुनर्मानुषो भवेत् ॥५॥

प्रतिष्ठां मन्दिरं कृत्वा तथा यात्रामहोत्सवान् ।
स्ववित्तं शुभमार्गेण व्ययं नीत्वा सुखीभव ॥६॥

इति विचार्य ध्यानाज्जाग्रत् संस्तं श्रीकदम्बाख्यगिरिम्प्रति यतीश्वरं श्रीनेमिसूरिं भगवदात्मभूतं निजानन्दसहितं मनसा प्रेरितवान् यद् भवान् भगवद्रूपोऽस्ति भव्यजीवानुग्रहार्थञ्च पृथिव्यां सञ्जातः । अयं भवतो लोकोत्तरावतारस्ततो जिनेश्वरधर्मविस्तारं करोतु । अतो भवान् स्वोपार्जितदिव्यज्ञानेन जिनप्रासादादीनि निर्माप्य प्रतिष्ठायात्रादिमहोत्सवञ्च कारयित्वा सर्वेषां जीवानां जिनधर्मसम्प्रदाय-पुरस्सरमुद्धारं करोतु तेन भवतोऽवतारसाफल्यं भविष्यति । ततो भोगेन पुण्यक्षयं कुर्वन् कुशलेन कर्मणा पापक्षयं कुर्वन् कालजवेन कलेवरं हित्वा देवलोकगीतां विशुद्धां कीर्तिमवाप्य मुक्तबन्धः सन् आत्मज्योतिःस्वरूपमेष्यति भवात् । इति शासनाधिष्ठायकः सद्गुरुं नेमिसूरिमादिष्टवान् ।

अतः

भव्यानुग्रहसम्भूतं जिनाज्ञापरिपालकम् ।
भव्येभ्यो मोक्षदातारं नेमिसूरिं गुरुं नमः ॥७॥

कदम्बाख्यगिरिं नत्वा शत्रुञ्जयासमीपगम् ।
देवधर्मगुरुं नत्वा मोक्षधर्मं समाचरेत् ॥८॥

इति धर्मविधिं कृत्वा मानुष्यं मोक्षहेतुकम् ।
सफलं कुरु जीवात्मन् ! मोक्षं प्राप्तुं यदीच्छसि ॥९॥

अतो नरकार्हाणां जीवानां च भव्यानामपि तारणार्थमयं कदम्बाख्यो गिरिर्वर्तते । तस्मात्तत्र सङ्घयात्रया गत्वा जिनमन्दिरं वा मूर्तिं प्रतिष्ठाप्य गुर्वाज्ञां गृहीत्वा तदाज्ञापुरस्सरं शुद्धधर्मं विज्ञाय सुकृती भव्यो जीव आत्ममोक्षं कुर्यादिति शम् ॥

॥ इति श्रीकदम्बगिरि-माहात्म्यम् ॥

# ६. ॥ आर्या-पञ्चविंशतिका ॥
# ( परमात्म-प्रार्थना )

– आचार्यविजयहेमचन्द्रसूरिः

अर्हं - पदकजममलं, न्यक्कृतसुररत्नकामघटकल्पम् ।
मम हृत्सरसि विनिद्रं, वितरतु लक्ष्मीमनाबाधाम् ॥१॥

भ्रामं भ्रामं भगवन् ! भवेष्वनेकेषु दुःखबहुलेषु ।
अद्य मया त्वं लब्धः, प्राक्तनपुण्यप्रकर्षेण ॥२॥

अयि जगदीश्वर ! जय जय, जय जय दुरिताब्धिशोषणागस्ते!।
संसारामयधन्वन्तरि-सन्निभ ! सर्वदा जयतात् ॥३॥

नास्ति जिनेश्वर ! तव गुण-कवने स्वल्पाऽपि मे प्रभो ! शक्तिः।
शिशुरिव तदपि गुणांस्ते, गातुं भक्त्योद्यतो भगवन् ! ॥४॥

प्राप्ता चेत्तव पदयो-र्भक्तिर्भगवन् ! तदाऽन्यदाप्यं किम् ?।
तामन्तरेण लब्धं, व्यर्थमिदं निखिलमपि भुवनम् ॥५॥

परितो दुःखदवानल-दग्धमशरणं समस्तमस्ति जगत् ।
शमयितुं तं समर्थो, नाथ ! त्वं पुष्करावर्तः ॥६॥

प्राप्याऽपि त्वच्छासन-मच्छं भगवन् ! प्रमादपरतन्त्राः ।
वर्तामहे न मार्गे, यथोदिते तन्महद् दुःखम् ॥७॥

विद्याऽभ्यस्ताऽधिगता, कीर्तिः प्राप्ता च विश्रुतिर्विश्वे ।
नो चेच्चेतः शुद्धि-र्जनितैताभिः किमफलाभिः ॥८॥

भीमभवाब्धेरस्मात्, त्वया विभो ! तारिता जना नैके ।
मम तारणवेलाया-मद्यैव किं विलम्बयसि ॥९॥

तत्र विलम्बे हेतु-र्यदि जिन ! तादृक्षयोग्यताविरहः ।
त्वदधीनैव हि सा खलु, तत्तां मे देहि कृपयेश ! ॥१०॥

संसारसागरं त्वं, येनोपायेन नाथ ! सन्तीर्णः ।
कृपया तं मे दर्शय, येन भवेयं तवाऽनुचरः ॥११॥

त्वादृशि सत्यपि नाथे, मे नश्येच्चेन्न भावदारिद्र्यम् ।
ब्रूहि तदा कस्याऽग्रे, नाथाऽहं पूत्करोम्युच्चैः ॥१२॥

त्वं चेन्निजहृदये मां, दधासि नो नाथ वीतरागत्वात् ।
हृदये मम किं वासं, तथाऽपि जिनराज ! नाऽऽश्रयसे ॥१३॥

आवां भवेऽत्र भगवन् ! चिरमेकत्र सहवासमध्युषितौ ।
अशिवे मां मुक्त्वा किं, शिवं प्रयातो ? न तद्युक्तम् ॥१४॥

अथ मां नाथ ! निभालय, प्रसादपूर्णेन चक्षुषा दासम् ।
कृतमागोऽद्यावधि यत्, क्षमस्व तत्सर्वमपि देव ! ॥१५॥

त्वयि विश्वस्य शरण्ये, प्रारब्धः शिवपुरप्रवासोऽयम् ।
पन्थानमर्धमाप्तं, मामथ किमुपेक्षसे नाथ ! ॥१६॥

सिंह इव मे वसेच्चेद्-हृद्गिरिकुहरे निरन्तरं देव ! ।
न तदा कुमतमतङ्गज-यूथभयं स्वल्पमपि मे स्यात् ॥१७॥

प्रभवतु मुक्तिर्वा मा, भवतु सदा त्वत्पदाब्जसेवैव ।
सा चेन्निश्चलभावा, भवेत्तदा नाऽन्यदवशिष्टम् ॥१८॥

जन्मेदं मम सफलं, स्वामिन् ! जज्ञे त्वदीयदर्शनतः ।
आमोक्षं तत्प्रतिभव-मस्त्विति विज्ञप्यते नितराम् ॥१९॥

एतत्प्रार्थनमनिशं, भूयो भूयो विधीयते नाथ ! ।
त्वच्चरणाम्बुजयमले, श्लिष्यतु मे भृङ्गवच्चेतः ॥२०॥

जलधिगभीरहृदस्ते, सत्पुरुषाः सन्ति सर्वसमचित्ताः ।
निर्गुणमपि निजरक्तं, भक्तं ते तारयन्त्येव ॥२१॥

अपरं किं मे प्रार्थ्यं, भुवने निखिले त्वदीयसेवातः ।
स्वर्धेनौ लब्धायां, किमन्यदवशिष्यते लभ्यम् ॥२२॥

त्वद्दर्शनलाभेन, नष्टं मिथ्यात्वमन्धतमसं मे ।
जातञ्च सुप्रभातं, सम्यक्त्वार्कः समुज्ज्वलितः ॥२३॥

नाऽस्त्यथ मे भवभीति-र्मृत्युजराव्याधिदुःखमपि नष्टम् ।
प्रकटितमन्तर्ज्योतिः, परमानन्दश्च सम्प्राप्तः ॥२४॥

कामं नमाम्यहं त्वं, वितरामि सहस्त्रशो यशोवादान् ।
यदमितफलदातुस्तव, समागमो यस्य मे जातः ॥२५॥

इति देवोऽर्हन्नीतः, स्तुतिमार्यापञ्चविंशिकायोगात् ।
गुरुनेमिसूरिविजया-मृतदेवपदाब्जभृङ्गेण ॥२६॥

(रचना - सं. २०२८)

❀ ❀ ❀

# ७. श्री गौतमस्वामि-स्तुति-षोडशिका

— आचार्यविजयहेमचन्द्रसूरिः

( उपजाति-वृत्तम् )

सुवर्ण-पद्मासन-संनिषण्णं, स्फुरत्प्रभामण्डलभासमानम् ।
देवेन्द्रवृन्दार्चितपादपद्मं, श्रीगौतमं सत्तममानमामि ॥१॥

ग्रामः पवित्रः खलु गोब्बराऽऽह्वः, पुण्या च पृथ्वीजननी नितान्तम् ।
तातोऽपि धन्यो वसुभूतिनामा, यत्राऽजनि श्रीगुरुगौतमोऽयम् ॥२॥

यदीयलोकोत्तरसद्गुणानां, पारं न प्राप्नोति गुरुः कदाऽपि ।
द्विजान्वयेन्दुर्गुणरत्नसिन्धुः, स राजतां गौतमयोगिराजः ॥३॥

वीरप्रभोराद्यगणाधिपो यो, भव्याम्बुजोद्बोधनतिग्मरश्मिः ।
समीप्सितार्थप्रददर्शनोऽसौ, विराजतां गौतमयोगिराजः ॥४॥

यो बीजबुद्ध्या रचयाञ्चकार, सद्द्वादशाङ्गीं भुवनोपकृत्यै ।
मुहूर्त्तमात्रेण पदत्रयेण, तमिन्द्रभूतिं प्रणमामि कामम् ॥५॥

स्वशक्तितोऽष्टापदपर्वते यो, जगाम नन्तुं जिनराजपादान् ।
भव्यात्मनां कामितकल्पवृक्षः, स राजतां गौतमयोगिराजः ॥६॥

ख-व्योम-बाण-क्षिति( १५०० )-सङ्ख्यकेभ्यः, सत्तापसेभ्यो निजलब्धिशक्त्या ।
योऽदात् पयोव्याजत एव तत्त्वं, तं गौतमं सद्‌गुरुमानमामि ॥७॥

उत्पेदिरे योगबलेन यस्य, श्रोतो-नभोयान-पुलाकमुख्याः ।
अक्षीण-सर्वौषधिलब्धयश्च, तं गौतमं सद्‌गुरुमानमामि ॥८॥

सरस्वती-सद्‌भुवनेश्वरीश्री-यक्षाधिराज-त्रिदशेन्द्रमुख्यैः ।
जयादिदेवीनिकरैश्च पूज्यं, श्रीगौतमं सद्‌गुरुमानमामि ॥९॥

कृताञ्जलिर्नागपतिः सुभक्त्या, निषेवते यच्चरणारविन्दौ ।
भवाब्धिमज्जज्जनयानपात्रं, स गौतमो मङ्गलमातनोतु ॥१०॥

ये दीक्षिता गौतम ! ते कराब्जात्, सर्वे गताः सिद्धिनिकेतनं ते ।
भव्यात्मने मुक्तिसुखप्रदायी, न त्वत्समोऽन्यो भुवि दानवीरः ॥११॥

स्वामिन् ! त्वदाख्या भुवि यत्र भाति, वसन्ति सर्वे निधयो हि तत्र
कल्पद्रुमादेरधिकः प्रदायी, विराजतां गौतमयोगिराजः ॥१२॥

बोधाय मानो, गुरुभक्तयेऽभूद्, रागो विषादश्च चिदाप्तिहेतुः ।
लोकोत्तरं गौतम ! ते चरित्रं, चित्रीयते वीक्ष्य न को जगत्याम् ? ॥१३॥

'ॐ ह्रीँ नमो' पूर्वक 'गोयमस्स' मन्त्रं जपेल्लक्षमितं नरो यः ।
स प्राप्य सर्वेप्सितमत्र लोके, स्वर्गापवर्गौ लभते परत्र ॥१४॥

इत्थं गणीन्द्रं स्तुतवान् प्रमोदाद्, विनेयप्रद्युम्नमुनिप्रणुन्नः ।
श्रीनेमिसूरेरमृताऽऽख्यसूरे-र्देवस्य शिष्यो मुनिहेमचन्द्रः ॥१५॥

चन्द्राक्षिबिन्दुद्विमितेऽत्र वर्षे( २०२१ ),
ज्येष्ठस्थितौ 'कोठपुरे'ऽतिरम्ये ।
श्रीआदिनाथोच्छ्रितसत्प्रसादात्,
कृता स्तुतिः सर्वहिताऽस्तु शश्वत् ॥१६॥

रचना : सं. २०२१

❀ ❀ ❀

अन्तलब्धिनिधान-

# ८. श्री गौतमस्वामिगुणाष्टकम्

— आचार्यविजयहेमचन्द्रसूरिः

( हरिणीवृत्तम् )

जगति विदिता ये ये भावा यथेप्सितदायिनः,
सुरतरुमुखास्ते सर्वे यत्तुलां न च बिभ्रति ।
बुधसमुदया भक्त्या नित्यं यदङ्घ्रिमुपासते,
भुवि स जयतात् कामं पूज्यो गणीश्वरगौतमः ॥१॥

तव वरगुणाम्भोधेः पारं प्रयातुमभीप्सवः,
सुरगुरुसमाः प्रोद्यत्प्रज्ञा अपीश ! न चेशते ।
तदपि मम हृत् त्वय्यालीनं गुणस्तवनं विना,
गणपवर ! ते स्थातुं नैव क्षणं ननु शक्नुते ॥२॥

चरमजिनपत्पद्मोपास्तिस्त्वयाऽविरतं कृता,
सकलमुनयो भिक्षाकाले जपन्त्यभिधां तव ।
तव नमनतो विघ्नव्रातं प्रयाति लघु क्षयं,
वितरतु मयि श्रीयोगीन्द्र ! प्रसद्य शुभाशिषः ॥३॥

तव करकजाद् दीक्षां प्राप्ताः समे शिवमैयरु-
स्तवकसदृशो नो कोऽप्यन्यो क्षितौ खलु दृश्यते ।
अथ नहि भयं किञ्चित्मात्रं भवाद् मम विद्यते,
प्रथमगणभृत् ! यत्ते प्राप्तं पदाम्बुजसेवनम् ॥४॥

तव पदयुगे श्रेयोभूते सदा मम जायतां,
नतिरविरतं पुण्यैर्लभ्ये सुलब्धिनिधानके ।
निखिलभुवने तद्धि स्यात्किं न यत्तव नामतो,
भवति सफलं कार्यं नृणां हृदा परिचिन्तितम् ॥५॥

सुकृतविटपी मेऽद्य स्वामिन् ! प्रभूतफलोऽभवत्,
दुरिततततयो दूरं दूरं ममाऽद्य पलायिता: ।
हृदि निरवधिर्हर्षाम्भोधि: समुच्छलितोऽद्य मे,
विमलविमलं यत्ते जातं मुखाम्बुजदर्शनम् ॥६॥

तव निरुपमं रूपं दृष्ट्वाऽक्षिणी मम नृत्यत-
स्तव सुचरितं श्रावं श्रावं मनो मम हृष्यति ।
तव गुणगणं गायं गायं मुदं रसनैति मे,
तव सुवचनं पायं पायं कृतार्थमभूज्जनुः ॥७॥

गणधरमणे ! त्वत्पादाब्जे विनम्य निवेदये,
नहि नहि कदाप्यस्मत्स्वान्तात् क्षणं वियुतो भव ।
वितरति मतिं त्वसान्निध्यं व्यपोहति दुर्मतिं,
जनयति मनः सर्वाभीष्टं तनोति निरीहताम् ॥८॥

ललितहरिणी-छन्दोयोगादिदं हि गुणाष्टकं,
विरचितमिति स्फूर्जद्भक्त्या वरेण्यगणेशितुः ।
गुरुवरपदाम्भोजद्वन्द्वार्चनाप्तधिया मया,
प्रथमगणभृत्-मन्त्रध्यात्रा सुवर्णसुधांशुना ॥९॥

❁ ❁ ❁

# ९. सकललब्धिनिधान-गौतमस्वाम्यष्टकम् ।

(ललित-वृत्तम्)

महिमशालिनं विश्वतारकं, गुणगणालयं गीतगौरवम् ।
सकललब्धिभृद्योगिनं स्तुवे, गणधरोत्तमं गौतमप्रभुम् ॥१॥

चरमतीर्थकृत्पट्टभास्करो, मुनिततीडितः कामितप्रदः ।
सुरवरैर्नुतस्तेजसान्निधि-र्विजयतेतरां गौतमेश्वरः ॥२॥

चरितमद्भुतं ते दयानिधे ! जडमतिः कथं स्तोतुमुत्सहे ? ।
तव कराम्बुजाद् दीक्षिताः समे, मुनिवरा ययुर्मुक्तिमन्दिरम् ॥३॥

भविकतायिनं मुक्तिदायिनं, कुमतनाशिनं तत्त्वप्रायिनम् ।
पतितपावनं भाविराजितं, प्रणिदधेऽन्वहं गौतमेश्वरम् ॥४॥

गणभृदग्रणीः श्रेयसां पदं, हितकरो नृणां पापनाशकः ।
विमलदर्शनः कर्मजित्वरो, विजयतेतरां गौतमेश्वरः ॥५॥

नमनतस्त्वयि श्रीगणाधिप !, सकलकल्मषं नश्यति ध्रुवम् !
पवितनाम ते यत्र राजते, भवति तत्र नो विघ्नकल्पना ॥६॥

गिरिवरे गतोऽष्टापदे भवान्, भगवतोऽर्चितुं स्वीयशक्तितः ।
अतुलसारवन् ! नाथ ! ते गुणान्, गणयितुं क्षितौ केन पार्यते ? ॥७॥

तव पदाम्बुजे वन्दना सदा, भवतु मे प्रभो ! योगिसत्तम !
तव प्रभावतो मंगलावलि-र्मम दिने दिने देव ! जायताम् ॥८॥

अष्टकं गौतमेशस्य, सर्वसिद्धिप्रदायकम् ।
रचितं हेमचन्द्रेण, गुरुदेवांह्रिसेविना ॥

विज्ञप्त्या निजशिष्यस्य प्रद्युम्नाख्यमुनेर्मया ।
पारेखचीमनभ्रातुः पाठाय लिखिता स्तुतिः ॥

रचना : सं. २०२०

# १०. श्रीश्रमणस्तुतिषोडशिका

(वसन्ततिलकावृत्तम्)

गीर्वाणकोटिमहितक्रमणा जयन्तु,
वप्रे मणीकनकरूप्यमये विशाले ।
संराजिनः प्रवरधर्ममुपादिशंस्ते,
तीर्थेश्वराः श्रवणसङ्घप्रवर्तका ये ॥१॥

श्रीतीर्थराजपदपङ्कजसेवनेन,
सद्बीजबुद्धिकलितास्त्रिपदीमवाप्य ।
विश्वप्रबोधकुशला द्व्यधिकां दशाङ्गीं
जग्रन्थुरुत्तमगुणा गणिनो विभान्तु ॥२॥

माली द्रुमाद् बुधवरः कुसुमानि चित्रा-
ण्यादाय गुम्फति यथा वरपुष्पमालाम् ।
प्राप्याऽदृभत् प्रवचनं जिनतोऽभिरामं,
वर्य्यां तथा गणधरः शुचिशास्त्रमालाम् ॥३॥

श्रीमन्मुनिप्रभवमुख्यतमाः प्रपूज्याः
सज्ज्ञानिनो जगति पूर्वविदो जयन्तु ।
यैरागमाब्धिमतिसूक्ष्मधिया विगाह्य,
लोकाय तत्त्वममृतं परमं वितीर्णम् ॥४॥

श्रीआर्यरक्षितगुरुप्रमुखा जयन्तु,
सिद्धादिसेनमुनयो महिमाभिरामाः ।
तिग्मांशुवत् प्रसृमरं भुवि यैर्निरस्त-
मज्ञानसन्तमसमाशु जिनेन्द्रवाग्भिः ॥५॥

शास्त्रे कुशाग्रमतयः श्रमणावतंसाः,
देवर्द्धिपूज्यजिनभद्रगणिप्रधानाः ।
संरक्षिता श्रुतचितिः खलु लुप्यमाना,
यैस्ते जयन्तु कृतिनो बहुपुण्यभाजः ॥६॥

प्राज्ञोत्तमः श्रुतयशा हरिभद्रसूरि-
र्वेदाब्धिसिन्धुविधुना प्रमितान् (१४४४) महार्थान् ।
ग्रन्थान् विधाय यदरीनतनोदधस्ताद्
विस्मर्यतेऽबुधजनैरपि तन्न जातु ॥७॥

टीका व्यधादभयदेवमनीषिवर्यो,
गिर्यन्तसूरिमलयश्च महार्थभावाः ।
आलम्ब्य या बुधवराः प्रकटस्वरूपाः,
शास्त्राणि सम्प्रति विना स्खलनां पठन्ति ॥८॥

यत्कीर्तियोषिदमला भुवने चरन्ती,
मोदाय नो सहृदयस्य हि कस्य जाता ।
श्रीहेमचन्द्र-गुरुहीर-यशोमुनीन्द्रा,
राजन्तु ते विविधशास्त्रविधानदक्षाः ॥९॥

जिग्ये कलङ्कमलिनां सितभानुकीर्तिं,
यः स्वीयनिर्मलयशःपटलेन शश्वत् ।
नित्यं जनोपकरणाभिरतो मुनीनां,
श्लाघ्यः कथन्न महनीयपदः समूहः ॥१०॥

सद्ब्रह्मणेऽपि विदिताचरणाय तस्मै,
ध्यानप्रलीनमनसे सुसमाधिभाजे ।
एकान्ततो हितकराय तपोरताय,
नित्यं नमः समुदयाय महामुनीनाम् ॥११॥

तिग्मद्युतिर्न स निवारयितुं शशाक,
लोकप्रकाशकसहस्त्रकरैस्तमो यत् ।
तज्ज्ञानदिव्यविभया सकलं निरस्तं,
यैस्ते महाव्रतधराः श्रमणा जयन्तु ॥१२॥

श्रामण्यमिष्टजनकं प्रतिरुद्धपापं,
लोकोत्तरं शिवमवाप्तुमना यतेत ।
यत्नं विना भववने निबिडे च देही,
बम्भ्रम्यतेऽनवरतं समुपैति दुःखम् ॥१३॥

सन्तोषिणोऽनुपमसौख्यमुपेयिवांसो,
नम्रा मृदुत्वकलिताः सरलाः पवित्राः ।
सत्यव्रता भवभयानि विनोदयन्तो,
राजन्तु भूमिवलयेषु तपस्विनस्ते ॥१४॥

सद्दर्शनोदयकरो बुधनन्दनोऽपि,
विज्ञानपद्मसविताऽमृतवाग्विलासः ।
लावण्य-धाम-विजितेन्दुरविं न नौति,
कस्तूररम्यवचसं गुरुनेमिसूरिम् ॥१५॥

पुण्यं स्तवं शिवकरं श्रमणोत्तमानां,
श्रीनेमिसूरिविजयामृतदेवशिष्यः ।
पंन्यासमेरुविजयाप्तनिदेशदक्षो,
मुम्बापुरे रचितवान्मुनिहेमचन्द्रः ॥१६॥
(रचना : सं. २०१५)

❀ ❀ ❀

## ११. आचार्यप्रवरश्रीहरिभद्रसूरीश्वराणां स्तवनाष्टकम् ॥•

( वंशस्थवृत्तम् )

अपारशास्त्रोदधिपारदृश्वने,
विशुद्धचारित्रतपोविराजिने ।
दिगन्तसञ्चारियशोविशालिने,
नमो नमः श्रीहरिभद्रसूरये ॥१॥

स चित्रकूटाचलनामकं पुरं,
पवित्रयामास निजेन जन्मना ।
अभूद् द्विजातिप्रवरो य इद्धधी-
र्नमोऽस्तु तस्मै हरिभद्रसूरये ॥२॥

पुरोहितस्थानमलञ्चकार यो,
यशोधनश्रीजितशत्रुभूपतेः ।
विवेद विद्याश्च चतुर्दशाऽपि यो,
नमोऽस्तु तस्मै हरिभद्रसूरये ॥३॥

---

• वि.सं. २०१९ वर्षे विरचितम् ॥

महत्तराश्रीयुतयाकिनीमुखान्-
निशम्य गाथां गहनां बुधाग्रणीः ।
तदर्थबोधे स्खलितो य आत्मवि-
न्नमोऽस्तु तस्मै हरिभद्रसूरये ॥४॥

जिनाञ्चितश्रीभटसूरिपादयोः,
समर्पितात्मा जगृहे च संयमम् ।
उपेयिवान् स्वान्यकृतान्तकौशलं,
नमोऽस्तु तस्मै हरिभद्रसूरये ॥५॥

स्फुरन्मतिः सूरिपुरन्दरश्च यो,
दृढव्रतः क्ष्मातललोकपूजितः ।
सार्वागमज्ञानकलाकलाधरो,
नमोऽस्तु तस्मै हरिभद्रसूरये ॥६॥

श्रुताब्धिमुन्मथ्य विचक्षणो महान्,
व्यरीरचद् वेदयुगाब्धिभूमिताः (१४४४) ।
कृती कृतीर्मुक्तिपथप्रदर्शिका
नमोऽस्तु तस्मै हरिभद्रसूरये ॥७॥

यदीयवागार्हतदर्शनालय-
प्रवेशने द्वारमिवाऽस्ति साम्प्रतम् ।
भवार्तितापार्दितशान्तिदायिने,
नमोऽस्तु तस्मै हरिभद्रसूरये ॥८॥

इत्थं स्तुतः श्रीहरिभद्रसूरिः,
पुण्याभिधानः स्तवनाष्टकेन ।
श्रीनेमिसूरेरमृताख्यसूरे-
र्हैमेन्दुनाऽऽसाद्य गुरुं च देवम् ॥९॥

❀ ❀ ❀

## १२. शासनसम्राड्गुणस्तुतिषोडशिका

(आर्यावृत्तम्)

जिनशासनसाम्राज्यं, सम्राडिव यः शशास नैपुण्यात् ।
तीर्थोद्धारैकरतो, जयति स विजयादिनेमिगुरुः ॥१॥

नेमिर्जयतादूर्व्यां, कदम्बमुखनैकतीर्थसंस्कर्ता ।
आबालब्रह्मधरो, नरपतिनतपादपद्मयुगः ॥२॥

श्रीवृद्धिचन्द्रगुरुवर - पादाम्बुजसेवनाप्तसद्बोधः ।
अध्यैष्ट तत्कृपातः, कालेऽल्पे बहूनि शास्त्राणि ॥३॥

शब्द-न्यायादिशास्त्र - वैदुष्यभृतैर्यदीयशिष्यगणैः ।
रचितान् विविधान् ग्रन्थान्, दृष्ट्वा कः प्रीणयन्नैव ॥४॥

शिष्य-प्रशिष्यवर्गैः, स्वाध्याय-तपसि निरन्तरोद्युक्तैः ।
ग्रह-तारागणमध्ये, भाति स्म चन्द्र इवाऽनन्यः ॥५॥

सकृदपि यद्व्याख्यानं, श्रुत्वा खलु सिंहगर्जनातुल्यम् ।
अश्मसदृशहृदया अपि, न हि बोधमवाप्नुयुः के के ? ॥६॥

श्रीकापरडातीर्थं, राणकपुर-शेरिसादितीर्थं च ।
यस्योपदेशादजनि, जीर्णोद्धारेण नव्यतरम् ॥७॥

श्रीमन्माणेकस्य, मनसुखतनयस्य तीर्थसिद्धाद्रेः ।
यन्निश्रायां जातो, यात्रासङ्घः प्रशस्यतरः ॥८॥

सिंह इव दुष्प्रधर्षो, रविवत् प्रौढप्रतापशाली च ।
उदधिरिवाऽतिगभीरः, शशिवच्चाह्लादकः सासीत् ॥९॥

सागरतीरे विचरन्, सम्यग् ह्युपदिश्य धीवरादिजनान् ।
विरमय्य हि हिंसातो, वरमकृत जीवदयाकृत्यम् ॥१०॥

मुनिसम्मेलनसमये, बुद्धिप्रागल्भ्यमस्य सन्दृश्य ।
सर्वेऽपि तत्रत्यजना, भृशमेव चमत्कृता जज्ञुः ॥११॥

यद्ब्रह्मचर्यचर्यां, दुरनुष्ठेयां विलोक्य सहसैव ।
वदनादद्भुतमद्भुत-मिति शब्दः सरति सर्वेषाम् ॥१२॥

भावनगरभूपालो, वलभीपुरभूपति-प्रमुख्याश्च ।
यद्वचसा प्रतिबुद्धाश्चक्रुर्हिंसादिपरिहारम् ॥१३॥

आनन्द-मालवीया-कविनानालालमुख्यबुधवर्य्याः ।
येन सह तत्त्वचर्चां, कृत्वा प्रीतिं परां प्रापुः ॥१४॥

तत्तत्कार्यविधात्री-संस्थाकार्याधिकारिणः श्राद्धाः ।
यन्मार्गदर्शनेना-ऽकुर्वन् सर्वाणि कार्याणि ॥१५॥

एकस्मिन्नपि जन्मनि, पूज्यैः कार्याणि यानि विहितानि ।
बहुमनुजैर्बहुजन्मसु, कर्तुं न हि तानि शक्यानि ॥१६॥

पूज्यश्रीनेमिगुरुर्भक्त्यैवं संस्तुतो मया परया ।
श्रीदेवसूरिगुरुराट्-शिष्यश्रीहेमचन्द्रेण ॥१७॥

(रचना - सं. २०५५)

# १६. आचार्यवर्य्यश्रीविजयामृतसूरीश्वराणां स्तवनाष्टकम् ॥

( वैतालीयं-वृत्तम् )

महनीयगुणालिमन्दिरं,
कविरत्नं प्रगुरुं गुरूदयम् ।
विजयामृतसूरिशेखरं,
सततं शास्त्रविशारदं स्तुवे ॥१॥

भवतो भवभाववेदिनो,
विदिताचारविचारचारिणः ।
लसदद्भुतवाग्विलासिनः,
पुरतः किं किल कथ्यते मया ॥२॥

भवतः क्व गुणाकरो महान्,
क्व च मे स्वल्पतरा हि शेमुषी ।
व्यवसाययतीह भास्वरा,
गुरुभक्तिः स्तवने तथाऽपि माम् ॥३॥

समुपार्जितपूर्वपुण्यतः,
पविते जैनकुले सुधार्मिके ।
नगरे +बहुतादनामके,
भवतोऽभूज्जननं वृषावहम् ॥४॥

---

+ बोटाद ।

अभवन्ननु जातमात्रतो,
भवतश्चाऽभिरतं मनो वृषे ।
नियतं कृतपुण्यकर्मणां,
प्रभवत्येव शुभायती रतिः ॥५॥

सुकृतात् सुखिनः सदाऽङ्गिनः,
कलुषाद् दुःखपराश्च जन्मिनः ।
इति वीक्ष्य भवान् भवच्छिदे,
विरतिं यौवनतो गृहीतवान् ॥६॥

चरणाम्बुजसेवनाच्चिरं,
समसिद्धान्तविमर्शपारिणः ।
विजयान्वितनेमिसद्गुरोः,
समलब्ध श्रुतमिष्टसाधकम् ॥७॥

विहरन् विविधं पुरादिकं,
वरकल्याणपरायणो भवान् ।
जिनधर्ममुपादिशज्जनान्,
परमानन्दपदैककारणम् ॥८॥

सुर-गुर्जरवाचि बोधदाः,
व्यतनोत् काव्यततीः शुभाः कृतीः ।
बुधशिष्यगणैः सुसेवितो,
जयतात्सूरिवरः क्षमातले ॥९॥

रचितेति गुणस्तुतिर्मया,
शुभभक्त्युल्लसितात्मवृत्तिना ।
गुरुदेवपदाम्बुजालिना,
बुधतातान्तिमहेमसाधुना ॥१०॥

(रचना - सं. २०१९)

तपागच्छाधिष्ठायक-

## १४. श्रीमाणिभद्रयक्षराजस्तुत्यष्टकम् ॥

'भुजङ्गप्रयातम्'

यदीयप्रभावान्नृणां भक्तिभाजां,
फलन्ति ध्रुवं सर्वहृत्कामितानि ।
सदा तं स्तुवे यक्षराजं सुभक्त्या,
तपागच्छसंरक्षकं माणिभद्रम् ॥१॥

मुधा भ्राम्यथेतस्ततः किं मनुष्याः !,
निजेष्टार्थसंसाधनार्थं पृथिव्याम् ।
श्रयध्वं लसद्भावभक्त्या श्रयध्वं,
तपागच्छसंरक्षकं माणिभद्रम् ॥२॥

अवाप्यैव कार्याण्यशक्यानि यस्य,
सहायं स्म सूरीश्वराः साधयन्ति ।
स्तवीमः सदा तं प्रभावासमानं,
तपागच्छसंरक्षकं माणिभद्रम् ॥३॥

प्रभामण्डलैर्मण्डितं खण्डिताघं,
यशःपुञ्जशुभ्रीकृताऽऽशाकदम्बम् ।
स्तुवेऽनन्यसद्वृत्तविस्मापितज्ञं,
तपागच्छसंरक्षकं माणिभद्रम् ॥४॥

श्रयेद् भाविको कोऽपि यो यं प्रमोदाद्,
भवेद् रोगशोकादिदुःखं न तस्य ।
तथा साऽऽप्नुयाद् वाञ्छितं, संस्तुवे तं,
तपागच्छसंरक्षकं माणिभद्रम् ॥५॥

विशुद्धात्मभावेन शत्रुञ्जयाद्रिं,
व्रजन् यो हि मार्गे च कुर्वन्ननीकम् ।
विपद्याऽऽप नाकं स्तुवे भक्तितस्तं,
तपागच्छसंरक्षकं माणिभद्रम् ॥६॥

न दास्यं न जाड्यं न तस्याऽर्थकार्श्यं,
न चाऽनिष्टसंयोगजन्यादिदुःखम् ।
स्मरेद् यो हि विश्रब्धचित्तेन नित्यं,
तपागच्छसंरक्षकं माणिभद्रम् ॥७॥

धनाद्यर्जितुं देशदेशान्तरेषु,
जना बम्भ्रमन्तीति चित्रं महन्मे ।
पुरस्थं सुरद्रुं न पश्यन्ति साक्षात्,
तपागच्छसंरक्षकं माणिभद्रम् ॥८॥

श्रीदेवसूरिशिष्येण, हेमचन्द्रेण सूरिणा ।
अष्टकं यक्षराजस्य, रचितं श्रेयसेऽस्तु वः॥९॥

❀ ❀ ❀

# १५. श्रीसरस्वतीस्तोत्रम्

(रचना सं. २०४२)

(वैतालीयवृत्तम्)

शरदिन्दुमनोहराननां, जिनवक्त्राम्बुजवासिनीं मुदा ।
मतिदां जडतापहारिणीं, श्रुतदेवीं समुपास्महेऽमलाम् ॥१॥
जडधीरपि ते प्रसादतः, श्रुतदेवि ! स्फुरदच्छधीधनः ।
समवाप्य तटं श्रुताम्बुधे-श्चकितां राजसभां करोत्यहो ! ॥२॥
विनयावनतोत्तमाङ्गकः, परयाऽऽयोज्य मुदा कराम्बुजौ ।
शुचिभक्तितरङ्गरङ्गितः, समुपासे श्रुतदां सरस्वतीम् ॥३॥
सुरदानवमानवेश्वरा-स्तव लब्धुं हि कृपालवं गिरे ! ।
परिहाय निजां निजां क्रियां, तव नामाक्षरमारटन्त्यरम् ॥४॥
विधु-कुन्द-तुषारनिर्मलां, तव मूर्तिं परितः प्रभास्वराम् ।
सितपुष्करसंस्थितां वरां, भुवि माद्यन्ति निरीक्ष्य के न हि ? ॥५॥
करसंस्थितवारिवज्जग-न्निखिलं यत्कृपया विलोकते ।
जडधीरपि सा सरस्वती, मतिमालिन्यमपाकरोतु मे ॥६॥
तरसा जडताम्बुधिं हि ते, समवाप्याऽच्छप्रसादसत्तरीम् ।
लसदुल्बणवाग्विभूषणा, नियतं वाणि ! तरन्ति मानवाः ॥७॥
न च तस्य कदाऽप्यसम्भवि, विबुधत्वं च कवित्वमत्र कौ ।
सकलार्थितकामगौः पतेत्, तव यस्योपरि दृक् प्रसादिता ॥८॥
नमनं तव पादयोर्मम, स्तवनं चाऽपि भवत्वनारतम् ।
नमनात् स्तवनाच्च भारति !, विमला मे मतिरस्तु सर्वदा ॥९॥
अयि देवि ! किमप्यहं परं, न हि याचे तव संस्तुतेः फलम् ।
इयदेव तवाऽग्रतो ब्रुवे, न कदाऽपि त्यज सन्निधिं मम ॥१०॥
इति भक्तिभृतेन चेतसा, गुरुदेवक्रमपद्मसेविना ।
बुधहेमसुधांशुना स्तुता, मतिदा भावपुरेऽस्तु भारती ॥११॥

❀ ❀ ❀

# १६. श्रीजिनदासश्रेष्ठिकथा

(सं. २०३२)

अस्ति पृथ्वीतले रम्या, धर्मपुर्यभिधा पुरी ।
अन्वर्था धर्म्यकार्याली-मण्डिता भूमिमण्डना ॥१॥

अनेकरत्नखचित-प्रासादगणभूषिता ।
चन्द्रकान्तमणिस्यन्द-मानतो यातिपङ्क्लिला ॥२॥

गगनाङ्गणचुम्ब्यग्र-गोपुराञ्चितवीथिका ।
नन्दनाह्ववनोन्निन्दि-सदुद्यानोपशोभिता ॥३॥

तत्र चोपाश्रये नित्यं, मुनीनाममृतोपमाः ।
उपदेशकथा मोह-व्यथाहन्त्र्यः प्रजज्ञिरे ॥४॥

श्राद्धाः श्रद्धाघना तत्त्व-श्रवणोत्सुकमानसाः ।
श्रुत्वा मुनिमुखाम्भोजाद्, देशनां ततृपुर्नहि ॥५॥

जिनदासाभिधस्तत्र, श्रेष्ठी धर्मपरायणः ।
औद्रार्यादिगुणैर्युक्तो, वसति स्माऽऽर्हतः सुधीः ॥६॥

पूजयन् देवमर्हन्तं, सदा सद्भावसुन्दरः ।
गुरुं शुश्रूषमाणः स, विपुलैरशनादिभिः ॥७॥

वाक्पतेरिव नैपुण्यं, गाम्भीर्यं चाऽम्बुधेरिव ।
कल्पद्रोरिव दातृत्व-मग्रहीद् यो विवेकवान् ॥८॥

अल्पायासेऽपि प्राग्जन्म-पुण्येन विपुलं धनम् ।
सोपाज्यं व्यतरत् सप्त-क्षेत्र्यां प्रावृषमेघवत् ॥९॥

कृत्वाऽपि सुमहत्कार्य-मनुत्सेकमनाः सुधीः ।
नगरे स्व-परेषां स, प्रशंसामसमां ययौ ॥१०॥

पत्नी जिनमतिस्तस्य, शीलाभरणभूषिता ।
पतिव्रता पतिं स्वीयं, छायेवाऽनुजगाम या ॥११॥

जिनदत्ताभिधो ज्येष्ठः, कनिष्ठो जिनरक्षितः ।
तयोरभूतां पुत्रौ द्वौ, विनीतौ सरलाशयौ ॥१२॥

दया-दाक्षिण्य-वात्सल्य-गुणरञ्जितमानसः ।
भूपोऽस्मै नगरश्रेष्ठि-पदं योग्याय दत्तवान् ॥१३॥

स श्रेष्ठी तेन लोकानां, मान्यस्तन्नगरेऽभवत् ।
तत्कीर्तिरिन्दुकुन्दाभ-धवला दिश आनशे ॥१४॥

सोऽगण्यपुण्ययोगेन, लब्धां लक्ष्मीं कृतार्थयन् ।
सानन्दं सुचिरं कालं, निनाय भूरिभाग्यवान् ॥१५॥

कदाचिद् दैवयोगेन, क्षीणे पुण्ये पुराकृते ।
प्रारेभे रोदितुं रात्रौ, लक्ष्मीरेत्य महानसे ॥१६॥

निशम्य रोदनं तस्याः, श्रेष्ठिना तु विचारितम् ।
निशीथे करुणारावं, काचिद् रोदिति दुःखतः ॥१७॥

उत्थाप्य योषितं स्वीयां, दीपमादाय तत्र सः ।
पप्रच्छोपेत्य तत्पार्श्वे, कस्माद् रोदिषि सुन्दरि ! ॥१८॥

इति पृष्टा तदा देवी, तं श्रेष्ठिनमुवाच सा ।
विभूतेस्तव वत्साऽह-मधिष्ठात्री सुरीश्वरी ॥१९॥

अवात्सं त्वद्गृहे श्रेष्ठिँ-स्त्वद्दानगुणरञ्जिता ।
गुणानुरागतो बद्धाऽहमद्यावधि निश्चला ॥२०॥

किन्तु सम्प्रति दुर्दैवा-न्निश्चलाऽपि च चञ्चला ।
अहं तव गृहादद्य, यियासुः प्रष्टुमागता ॥२१॥

स्नेहबद्धाऽपि हे भद्र !, दैवनद्धा हि साम्प्रतम् ।
हन्ताऽन्यत्र गमिष्यामि, त्वयाऽऽज्ञा मे प्रदीयताम् ॥२२॥

तस्यास्तद्वचनं श्रुत्वा, स्वस्थः श्रेष्ठी स उक्तवान् ।
कस्याऽप्येकरसाऽवस्था, दृष्टा लोकेऽथवा श्रुता ? ॥२३॥

तत् त्वं मम गृहाद् देवि !, गच्छ स्वैरमनाकुला ।
अहं स्वदैवयोगेन, करिष्यामि यथातथम् ॥२४॥

सविता प्रातरुद्याति, सायमस्तं प्रयाति च ।
पुरुषाः प्रागनेकेऽपि, किं किं दुःखं न लेभिरे ? ॥२५॥

लक्ष्मीदेव्यपि तच्छ्रुत्वा-ऽनुकूलं तमुवाच सा ।
गुणानुरक्ता सप्ताह-मत्र स्थास्यामि त्वद्गृहे ॥२६॥

इति प्रोच्य श्रियां देव्यां, गतायां स्वीयसद्मनि ।
प्रातः प्रमुदितस्वान्तः श्रेष्ठ्येवं स व्यचिन्तयत् ! ॥२७॥

यियासुश्चेत् स्वयं लक्ष्मीः, स्नेहबद्धा यदृच्छया ।
दानमेव वरं मन्ये, तस्याः सदुपयोगकृत् ॥२८॥

यानि यानि च तस्याऽऽसन्, सारवस्तूनि सद्मनि ।
पात्रेभ्यस्तानि सर्वाणि, दातुं स समकल्पयत् ॥२९॥

कुर्वन् दानं चकाराऽसौ, दीनानपि महेश्वरान् ।
निःस्वोऽष्टमेऽह्न्यभूच्छ्रेष्ठी शरदीव बलाहकः ॥३०॥

अत्र स्थितिरयोग्येति, निश्चित्य नगराद् बहिः ।
सकुटुम्बो सरित्तीरे, स स्वप्रासादमासदत् ॥३१॥

रात्रौ मुशलधाराभि-र्मेघोऽवर्षत् समन्ततः ।
नीरपूरेण जीर्णः स, प्रासादो भुवि संस्त्रसे ॥३२॥

जीर्णे गृहेऽप्यवस्थानं, न दैवेनाऽनुमन्यते ।
इत्यारोहत् स नेदिष्ठं, तरुं स्त्रीपुत्रसंयुतः ॥३३॥

स सौधान्निस्सरत् सारवस्तुजातेन सङ्कुलात् ।
स्वर्णस्थालभृतां गोणीं, तत्र वीक्ष्य व्यचिन्तयत् ॥३४॥

वारिपूरे समस्तानि, वस्तूनि मम साम्प्रतम् ।
बहुमूल्यानि गच्छन्ति, चेद् गच्छन्तु समन्ततः ॥३५॥

एतन्मध्यात् कृषेयं चेत्, स्थालमेकं तदा मम ।
आयतौ स्यात् फलायेति, स्थालं कष्टुं स प्रावृतत् ॥३६॥

किन्त्वन्तरायदोषेण, कृष्टे स्थालेऽपि तत्करे ।
तत्कण्ठखण्ड एवाऽऽगा-दहो भाग्यविचित्रता ! ॥३७॥

खण्डेनैतेन किं नष्टे, सर्वस्मिन्नपि वस्तुनि ? ।
गजराजे गते मोहो, धोरणिग्रहणे हि कः ? ॥३८॥

अथवा धारयाम्येतत्, "क्षेपात् संधारणं वरम्" ।
इति निश्चित्य सोष्णीषे, स्थालखण्डमदो धरत् ॥३९॥

जलेऽथाऽपसृते नद्यास्तेऽवतीर्य महीरुहात् ।
किंकर्तव्यविमूढाश्च, चेलुरेकां दिशम्प्रति ॥४०॥

उभौ शिशू परिश्रान्तौ, तयोरेकं शिशुं प्रसूः ।
श्रेष्ठी चान्यं समारोप्य, स्वं स्वं स्कन्धं प्रजग्मतुः ॥४१॥

अल्पीयसि गते मार्गे, क्षुत्पिपासार्दितौ सुतौ ।
क्षुत्पिपासासहिष्णू तौ, ययाचाते स्वभोजनम् ॥४२॥

ताभ्यां भोज्यं प्रदातुं न, समर्थौ दम्पती उभौ ।
अमन्ददुःखपाथोधौ, सहसैव ममज्जतुः ॥४३॥

मार्गे सुदैवाल्लब्धानि, सुपक्वाम्रफलानि ते ।
आस्वाद्याऽऽसादितस्वास्थ्याः, प्रचेलुः पुनरग्रतः ॥४४॥

एवं मार्गं च दुःखं च, व्यतिक्रम्य पदातयः ।
स्वकीयदेशान्निरगुः, शनैर्दूरतरं समे ॥४५॥

अन्नोदकोपभोगो हि, बलीयानिति विश्रुतम् ।
अदृष्टमश्रुतञ्चैष, देशं नयति देहिनम् ॥४६॥

विह्वला नीरसगलाः, बुभुक्षाक्षामकुक्षयः ।
येन केन प्रकारेण, पुरं विमलमाययुः ॥४७॥

तत्पुरस्य बहिः श्रेष्ठी, संस्थितः सपरिच्छदः ।
कथञ्चित् यापयामास, दुर्दैवात् कृच्छ्रजीवनम् ॥४८॥

सार्थवाहश्च तत्राऽऽसीद्, धर्मदासो महोद्यमी ।
क्रयाणकानि संगृह्य, वाणिज्यार्थं गतः पुरा ॥४९॥

सिन्धुमार्गेण गच्छन् सन्, रत्नद्वीपादिकस्थलम् ।
नानाविधानि रत्नानि, सोपार्जयदनाकुलः ॥५०॥

धर्मदासः प्रहृष्टात्मा, भूरिद्रविणलाभतः ।
अचिरेणैव कालेन, स्वदेशाभिमुखोऽभवत् ॥५१॥

जिनदास धनं यद्य-न्नदीपूरे प्रवाहितम् ।
धर्मदासेन तत्सर्व-मनायासेन प्रापितम् ॥५२॥

स्त्रीचरित्रं नृभाग्यञ्च, भूपचित्तं खलेङ्गितम् ।
कृपणस्य तथा वित्तं, देवैरपि न लक्ष्यते ॥५३॥

अकस्माद्विपुलामृद्धि-मासाद्याऽतिप्रहर्षितः ।
महर्द्धिकश्च सम्पत्त्या, तयाऽयासीत् स्वकं पुरम् ॥५४॥

चिन्तिता धर्मदासेन, प्राप्तद्रव्योपयोगिता ।
दानभोगविनाशैश्च, लक्ष्मीस्त्रिपथगा यतः ॥५५॥

यथा दानेन सन्तुष्टि-र्नैवाऽशनेन कर्हिचित् ।
तदाऽऽमन्त्र्य जनाः सर्वे, भोजनीया प्रयत्नतः ॥५६॥

निर्माप्य मधुराहारान्, नानाव्यञ्जनसंयुतान् ।
स भोजयितुमारेभे, सर्वान् नागरिकान् जनान् ॥५७॥

तदानीमखिलग्रामः, सार्थवाहेन भोजितः ।
जिनदासमृते ग्रामात्, सकुटुम्बं बहिः स्थितम् ॥५८॥

नाऽन्नेऽन्यस्मिन् कुतो लब्धाँ-श्चणकानेव केवलान् ।
चर्वयन्तोऽम्बुहारीभि-र्नारीभिस्ते निरीक्षिताः ॥५९॥

विलोक्य तास्तदा ताँस्तु, प्रेम्णोचुर्भो महाशयाः ! ।
धर्मदासकृते भोज्ये, नाना भोज्यानि चक्रिरे ॥६०॥

भुङ्ग्ध्वं तत्र प्रपद्याऽऽशु, यथेच्छं स्वादु भोजनम् ।
सुलभे स्वादुमिष्टान्ने, किं वश्चणकचर्वणम् ? ॥६१॥

समाकर्ण्य वचस्तासां, जिनदासप्रियाऽवदत् ।
अनुद्विग्ना सङ्कटेऽपि, परसौख्यानपेक्षिणी ॥६२॥

अनाहूतैर्न गन्तव्य-मस्माभिस्तत्र खादितुम् ।
मानिनो हि सुखं प्राणा-नुज्झन्ति न तु मानिताम् ॥६३॥

नाऽपमानात् परं दुःखं, त्रिषु लोकेषु विद्यते ।
तद् वरं स्वादुभोज्येभ्योऽस्माकं चणकचर्वणम् ॥६४॥

स्वप्रियायाः सुधीरायाः, न्याय्यं श्रुत्वा वचस्तदा ।
तथ्यत्वाज्जिनदासोऽपि, साधु साध्वन्वमोदयत् ॥६५॥

कार्ये दासी रतौ रम्भा, भोजने जननीसमा ।
विपत्तौ मन्त्रिणी धीरा, नारी या सा तु दुर्लभा ॥६६॥

गाम्भीर्यं च तयोर्ज्ञात्वा, हृष्टाः पौर्यो गृहं ययुः ।
जिनदासस्य वृत्तं ता, धर्मदासं न्यवेदयन् ॥६७॥

भवता भोजितः श्रेष्ठिन्, ग्रामः सर्वोऽयमादरात् ।
किन्तु ग्रामाद् बहिः केचिदागताः परदेशिनः ॥६८॥

अनाहूतैर्न गन्तव्यमिति सिद्धान्तवादिनः ।
नाऽत्राऽऽगच्छन्ति ते भोक्तुं, भूरिक्षुत्पीडिता अपि ॥६९॥

सर्वस्मिन् भोजिते तुष्टे, तव पत्तनसन्निधौ ।
एक एवाऽवशिष्टोऽयं, सकुटुम्बो न तद् वरम् ॥७०॥

धर्मदासोऽपि तच्छ्रुत्वा, धर्मकर्मधुरन्धरः ।
प्राहिणोत् सेवकाञ्शीघ्रं, तान् समानेतुमादरात् ॥७१॥

आकारितस्तदा तेन, सादरं साग्रहं तथा ।
जिनदासः कुटुम्बेन, धर्मदासालयं ययौ ॥७२॥

धर्मदासोऽपि धर्मात्मा, जिनदासं समागतम् ।
प्रत्युत्थायाऽथ सत्कृत्य, वरासने तमासदत् ॥७३॥

मिथः कुशलवार्तान्ते, भोजनार्थं न्यवेदयत् ।
मानेन चाऽऽत्मना सार्द्धं, सर्वं भोज्यमुपाहरत् ॥७४॥

भोजनावसरे तत्र, धर्मदासेन धीमता ।
जनान् दर्शयितुं सर्वा-नात्मवैभवविस्तरम् ॥७५॥

प्राङ्गणे लोकसान्निध्ये, तेन कीर्त्यभिलाषिणा ।
स्वर्णस्य स्थापिताः स्थाल्यः, प्राप्ता या दैवयोगतः ॥७६॥

जिनदासकुटुम्बाग्रे, मुक्तास्तास्तेन सादरम् ।
न जाने कस्य कार्यस्य, भूमिका स्यादियं विधेः ॥७७॥

भवितव्यत्वयोगेन, जिनदासपुरस्तदा ।
कण्ठेऽधिखण्डिता स्थाली, भोज्ययुक्ता समागता ॥७८॥

तां दृष्ट्वा चिन्तयामास, स्थाल्येषा मम वाऽपरा ।
विकल्पेन विनिश्चेतुं, जिनदासः प्रचक्रमे ॥७९॥

स्थालीखण्डं तु निष्कास्य, शिरोवेष्टनकान्निजात् ।
स्थालीखण्डितभागे तु, योजयामास पूर्ववत् ॥८०॥

अत्युष्णात्वेन भोज्यानां, द्रवीभूतेन योजितः ।
स खण्डो जतुना तत्र, यथापूर्वमजायत ॥८१॥

विचारितं तदा तेन, सर्वर्द्धिर्यदि मे गता ।
तदाऽनेनाऽल्पखण्डेन, किं भविष्यति मे हितम् ? ॥८२॥

सोऽप्यपैतु यथापूर्वमिति निश्चित्य नाऽग्रहीत् ।
स्थाल्यां पूर्ववल्लग्नं, स्थालीखण्डं विवेकतः ॥८३॥

विक्रीते गजराजे हि, किं भवेदङ्कुशेन वा ? ।
तस्माज्जीवनभारोऽयं, भाग्याधीनोऽस्तु मेऽखिलः ॥८४॥

गणयन्तामखिलाः स्थाल्य, इत्युक्तो धर्मकिङ्करः ।
एकैकतो विना कृत्वा, गणनामेवैवमब्रवीत् ॥८५॥

आसीद् या खण्डकण्ठा, सा स्थाली दृश्यते न हि ।
तस्य तादृग्वचः श्रुत्वा, धर्मदासो विचक्षणः ॥८६॥

उवाच किङ्करं कस्मै, भोक्तुं स्थाली त्वयाऽर्पिता ।
पङ्क्त्यां कण्ठविदीर्णा सा, संस्मृत्येति निगद्यताम् ॥८७॥

इति पृष्ठः किङ्करोऽसौ, स्मृत्वा तस्मै न्यवेदयत् ।
अद्याऽऽगतायाऽतिथये, श्रेष्ठिनेऽर्पितवानहम् ॥८८॥

क्रमान्मयि ददाने च, मन्दभाग्यस्य दैवतः ।
जिनदासस्य पुरतः सा स्थाली खण्डिताऽऽगता ॥८९॥

श्रेष्ठिना चिन्तितं नूनं, गृहीता खलु तेन हि ।
कार्याकार्यविवेको हि, दरिद्रस्य न विद्यते ॥९०॥

सकुटुम्बं तमानेतुं, जिनदासं महाजनम् ।
धर्मदासोऽतिरुष्टात्मा, प्रेषयामास किङ्करम् ॥९१॥

किङ्करस्य वचः श्रुत्वा, जिनदासोऽतिनिर्भयः ।
सकुटुम्बस्तदा गत्वा, धर्मदासमवोचत ॥९२॥

किमर्थमहमाहूतः, श्रीमता धर्मवेदिना ? ।
इति पृष्टः स्पष्टमाह, धर्मदासोऽपि तं प्रति ॥९३॥

धर्मशास्त्रे श्रुतं पूर्वं, सर्वदेवमयोऽतिथिः ।
दरिद्रमपि भद्रं त्वां, ज्ञात्वाऽथ परमादरात् ॥९४॥

मया सुपात्रबुद्ध्या त्वं, भोजनाय निमन्त्रितः ।
तथाऽपि त्वं महादुष्टः, शठोऽसीति प्रतीयते ॥९५॥

भोजनानन्तरं यस्माद्-हेम्नः स्थालीं त्वमग्रहीः ।
श्रेयस्कामोऽसि चेद्देहि, स्वयमानीय तां मम ॥९६॥

तदोक्तं जिनदासेन, वचो वज्राहतेन च ।
नाऽग्रहीषं तव स्थालीं, सत्यं सत्यं वदाम्यहम् ॥९७॥

निशम्य तद्वचो धर्मो, धर्मराज इवाऽपरः ।
क्रोधितस्तमुवाचेत्थं, महाधूर्तोऽसि पापधीः ॥९८॥

न वदिष्यसि सत्यं त्वं, विना ताडनया स्वयम् ।
इत्युक्त्वा सगलग्राहं, पादाभ्यां तमताऽयत् ॥९९॥

निष्प्राणमिव सोऽकार्षी-ज्जिनदासं निरागसम् ।
अनुभूय पदाघातं, जिनदासेन चिन्तितम् ॥१००॥

नूनं पराङ्मुखे दैवे, मयैतत् स्वादुभोजनम् ।
भुक्तं तेनैव सञ्जाता, मम पादाभिघातना ॥१०१॥

यदि सत्यं वदामीत्थं, न हि मन्येत तेन तत् ।
तत्तूष्णीं पादघातस्य, सर्वथा सहनं वरम् ॥१०२॥

ताड्यमानोऽपि विपुलं, तूष्णीं तिष्ठन् हि तत्क्षणे ।
मुञ्चन्नश्रूणि नेत्राभ्यां, किञ्चिन्नाऽवङ्मुखेन स ॥१०३॥

रुदन्तं तं तथा दृष्ट्वा, धैर्यातिशयशालिनम् ।
पप्रच्छ विस्मितः श्रेष्ठी, किं ते रोदनकारणम् ॥१०४॥

जिनदासस्तदोवाचा-ऽकथनं कथनाद् वरम् ।
बाढं विसिष्मिये श्रेष्ठी, श्रुत्वा तद्वचनं मृदु ॥१०५॥

अन्वयुङ्क्त तदाऽतीवा-ऽऽग्रहेणाऽमुं स सादरम् ।
ब्रूहि सत्यं त्वमेतस्य, कारणं सशयापहम् ॥१०६॥

धर्माग्रहं तथा मत्वा, जिनदासोऽब्रवीदिदम् ।
अये स्थालीः संगणय्य, मां त्वं पृच्छ महाशय ॥१०७॥

इति तस्य वचः श्रुत्वा, धर्मदासेन सत्वरम् ।
आहूय किङ्करः पृष्टः, किं स्थाल्यो गणिता न वा ? ॥१०८॥

प्रत्युवाच ततो भृत्यः, स्थाल्यो नो गणिता मया ।
विनैव गणनां नाथ !, स्थूलदृष्ट्या विलोकिताः ॥१०९॥

सन्ति स्थाल्योऽखिलाः किन्तु, न दृष्टा कण्ठखण्डिता ।
एतावदेव विज्ञाय, मयोक्तं ते तथा तदा ॥११०॥

इदानीं गणितास्ताश्च, सम्पूर्णाः सन्ति पूर्ववत् ।
आश्चर्यं केवलं तत्र, याऽऽसीत् कण्ठखण्डिता ॥१११॥

साऽपि जाता कथं पूर्णा, स्थालीयं शिल्पिना विना ।
मन्त्रतन्त्रप्रयोगोऽपि, न जातो ज्ञानगोचरः ॥११२॥ (युग्मम्)

तन्निशम्य तदाऽऽलोक्य, विचित्रां घटनामिमाम् ।
अवादि धर्मदासेन, पश्चात्तप्तेन तं प्रति ॥११३॥

पादाऽऽघातैः प्रहृत्य त्वां, जिनदास ! निरागसम् ।
अनभिज्ञाततत्त्वेन, मयैवं दुष्कृतं कृतम् ॥११४॥

क्षन्तव्यो मेऽपराधोऽयं, जिनदास ! महामते ! ।
अविचारितमेवैतत्, कृत्यं कल्मषकारणम् ॥११५॥

जिनदासस्तदा वीक्ष्य, पश्चात्तप्तं तथाविधम् ।
धर्मदासमुवाचेत्थं, दैवमेवाऽत्र कारणम् ॥११६॥

नाऽपराधोऽस्ति ते भद्र ! सर्वं मे कर्मणः फलम् ।
पुण्यं विना यतस्तेऽत्र, गृहे भोक्तुं समागमम् ॥११७॥

प्रारब्धे यदि मे नास्ति, मिष्टान्नं तस्य भोजने ।
विपरीतं फलं तस्या-ऽवश्यम्भाव्यभवन्मम ॥११८॥

श्रेष्ठिना धर्मदासेन, प्रह्वीभूतेन सर्वथा ।
उक्तं तेन कथं स्थाली, पूर्णा कण्ठेऽभिखण्डिता ? ॥११९॥

तदोक्तं जिनदासेन, भोजनाय च मे पुरः ।
कण्ठेऽभिखण्डिता स्थाली, स्थापिता परिवेषिणा ॥१२०॥

ममैवेयं न वा स्थाली, तां दृष्ट्वा चिन्तितं मया ।
तस्याः खण्डितभागे च, कण्ठखण्डो नियोजितः ॥१२१॥

भोज्योष्णत्व-द्रुतीभूत-जतुना च दृढीकृता ।
भग्ना न दृश्यते तासु, तस्माद् भ्रान्तिरजायत ॥१२२॥

खण्डमात्रेण किं कार्यं, भवेदिति विमृश्य च ।
न गृहीतो मया खण्ड-स्तत्कण्ठे योजितोऽप्यसौ ॥१२३॥

प्रातिकूल्येन दैवस्य, जातं कार्यं विलक्षणम् ।
तदेव स्वविपत्तीनां, मन्येऽहं मूलकारणम् ॥१२४॥

इत्थञ्च सर्ववृत्तान्त-निवेदनपुरस्सरम् ।
वदति स्म ममैवैषा, ज्ञायतामृद्धिविस्तृतिः ॥१२५॥

स्वान्ते ते चेद् भवेच्छङ्का, तदा सत्यापनाकृते ।
यत् पृच्छामि भवन्तं तद्, वक्तव्यं भवता स्फुटम् ॥१२६॥

स्थाल्यः प्राप्ता यतः स्थानात्, तत्राऽन्यदपि वस्तु किम ? ।
प्राप्तं त्वया न वा श्रेष्ठिन् !, सत्यं सत्यं निगद्यताम् ॥१२७॥

जिनदासवचः श्रुत्वा, धर्मो धर्म्यमुवाच तम् ।
ध्रुवं मया प्रभूतानि, वस्तून्याप्तानि तत्स्थलात् ॥१२८॥

अप्यन्यद् भारपट्टादि, पल्यङ्कादि महाशय ! ।
चारूणि काष्ठजातानि, महार्घ्याणीति बुध्यताम् ॥१२९॥

धर्मदासवचः श्रुत्वा, जिनदासोऽब्रवीत्तदा ।
सन्ति यत्र च वस्तूनि, तानि सर्वाणि साम्प्रतम् ॥१३०॥

तं देशं मां नयन्त्वाशु, श्रीमन्तस्तत्त्वदर्शिनः ।
हेतुगर्भं वचः श्रुत्वा, तदा तैस्तत्र प्रापितः ॥१३१॥

तत्रैकं जिनदासोऽसौ, स्थूलपट्टं द्विधाऽकरोत् ।
लक्षमूल्यानि रत्नानि, निर्गतान्यैक्षताऽमुतः ॥१३२॥

एवं वीक्ष्य ततस्तत्र, धर्मदासेन चिन्तितम् ।
अस्यैव निखिला सम्प-दस्मै देया हि सत्वरम् ॥१३३॥

एवं स्वचित्ते निर्धार्य, धर्मदासो महाशयः ।
तद्वस्तुजातं तस्मै हि, दातुं समुपचक्रमे ॥१३४॥

त्वदीयं वस्तु भोः श्रेष्ठिंस्तुभ्यमेव समर्प्यते ।
गृहाण तत्कृपां कृत्वा, स्वकं दुःखं निवारय ॥१३५॥

तदोक्तं जिनदासेन, क्षीणपुण्यस्य मे यदि ।
ऋद्धिर्नष्टाऽखिला दैवा-त्तव पार्श्वं समागमत् ॥१३६॥

अवशिष्टं न ही पुण्यं, तदा तद्ग्रहणेन किम् ? ।
प्रक्षालनाद्धि पङ्कस्य, दूरादस्पर्शनं वरम् ॥१३७॥

इति निश्चित्य मनसा, तं खण्डं त्यक्तवानहम् ।
अत एव ग्रहीष्यामि, न किञ्चिद्वस्तु साम्प्रतम् ॥१३८॥

एवमुक्त्वाऽग्रतो यान्तं, जिनं धर्मोऽब्रवीत् पुनः ।
गृहाण किञ्चिद्रत्नं त्वं, सर्वेप्सा चेन्न ते सखे ! ॥१३९॥

अथाऽपि नाऽग्रहीत् किञ्चि-ज्जिनदासस्तदा ततः ।
प्रत्येकं बालकाभ्यां तु, सरलं मोदकद्वयम् ॥१४०॥

पाथेयं धर्मदासेन, दत्तं स्वोपकृतौ मुदा ।
न स्वीकृतं तद् बालाभ्यां, पितुराज्ञानुसारतः ॥१४१॥ (युग्मम्)

हेतौ जिज्ञासिते तत्र, धर्मदासेन हार्दतः ।
जिनदास उवाचाऽति-मार्मिकं वचनं तदा ॥१४२॥

यस्य भोजनमात्रेण, सञ्जाता ताडना मम ।
मोदकादनसक्तानां, न जाने किं भविष्यति ? ॥१४३॥

अतोऽहं प्रार्थये श्रेष्ठिन् !, मोदकग्रहणाद् वरम् ।
निखिलापत्तिहेतूनां, तेषामग्रहणं ननु ॥१४४॥

एवं जिनवचः श्रुत्वा, धर्मदास उवाच तम् ।
यदि त्वं शङ्कसे लातुं, तर्हि मा लाहि मोदकौ ॥१४५॥

दम्पत्योर्न ददे किञ्चित्, किन्तु बालकहेतवे ।
चतुष्टयं मोदकानां, साग्रहं प्रेमपूर्वकम् ॥१४६॥

तदपि तं गृहीत्वा ते, सर्वे ग्रामाद् बहिर्ययुः ।
तरुच्छायां समाश्रित्य वसन्ति स्म यथारुचि ॥१४७॥ (युग्मम्)

अन्येद्युरग्रे गच्छद्भि-र्विपिने तैश्च सङ्गताः ।
मध्याह्ने विमलापुर्यां वास्तव्याः काष्ठहारकाः ॥१४८॥

ग्रहीतुं ते हि काष्ठानि, संभूय वनमागताः ।
किन्तु वृष्ट्यनुरोधेना-ऽप्राप्य काष्ठानि दुःखिताः ॥१४९॥

चिन्तयामासुरेवं ते, काष्ठालाभेन व्याकुलाः ।
अहोऽस्माकं महत्कष्टं, दुर्दैवात् समुपस्थितम् ॥१५०॥

किमद्य भक्षयिष्यामः किं वा दास्यामहे गृहे ।
क्षुत्तृडार्तकुटुम्बाय ?, भूयो भूयो मिथो जगुः ॥१५१॥

चिन्तितं च तदा तैस्तु, क्वचित्काले समागते ।
जनमान्यैर्बुधैश्चाऽपि, गम्यते चोत्पथेन वै ॥१५२॥

लुण्टनस्य प्रयोगेण, निर्वोढव्याऽद्य जीविका ।
इत्थं निश्चिन्वतां तेषां, सञ्जातस्तैः समागमः ॥१५३॥

भीमकायान् महाघोरान्, साक्षाद्यमसहोदरान् ।
दृष्ट्वा सर्वे तदा जग्मुः, किं कुर्यामेति मूढताम् ॥१५४॥

जिनदासं च ते वीक्ष्य, प्रोचुः परुषया गिरा ।
रे ! ते पार्श्वेऽस्ति किं वस्तु, सत्यं सत्यं निगद्यताम् ॥१५५॥

अन्यथा प्रहरिष्याम-श्चण्डदण्डेन भूरिशः ।
दीयन्तां हि समस्तानि, वस्तूनि क्षेमकाङ्क्षिभिः ॥१५६॥

विचारितं तदा तेन, जिनदासेन धीमता ।
निर्भाग्येन गृहीतानां मोदकानामिदं फलम् ॥१५७॥

तस्मात्तदर्पणं श्रेय, इति सत्यं जगाद सः ।
पाथेयं बालयोरस्ति, मोदकानां चतुष्टयम् ॥१५८॥

नैवाऽन्यत् किञ्चिदस्तीह, संदेहश्चेद् विलोक्यताम् ।
गृहीताश्च ततः सर्वे, मोदकास्तैस्तु हारकैः ॥१५९॥

फलाहारेण निर्वाहं, कुर्वन्तश्च जिनादयः ।
अग्रे गच्छन्त एवैते, कस्याऽपि करुणावतः ॥१६०॥

ठक्कुरस्य ततो ग्राम-मेत्य संप्रार्थ्य तं पुनः ।
निजावासकृते योग्यं सर्वसामग्रीसंयुतम् ॥१६१॥

स्थानं वीक्ष्य ततस्तैस्तु, निषद्या विहिता तदा ।
सर्पिस्तैलगुडादीनि, विक्रेतुं तत्र स न्यधात् ॥१६२॥ (युग्मम्)

वाणिज्यव्यवहारेण, दम्पत्योर्जीविकाऽभवत् ।
स्वं स्वं कालमवेक्ष्यैव, सर्वे जाताः क्रियापराः ॥१६३॥

यदा समीपग्रामेषु, विक्रयार्थं स गच्छति ।
तदा पणायते हट्टे, तद्भार्या शेमुषीमती ॥१६४॥

गच्छन्तौ पाठशालां तद्-बालावास्तां दिने दिने ।
इत्थं तेषां गते काले, निर्विघ्नेनाऽल्पवासरे ॥१६५॥

इतः काष्ठहरास्ते तु, दैवयोगेन संगताः ।
जिनदासाद् गृहीतं यै-र्मोदकानां चतुष्टयम् ॥१६६॥

विमलं नगरं प्राप्य, निर्भाग्यत्वेन निर्जितैः ।
विचारितं तदा तैस्तु, जीविकाकृष्टमानसैः ॥१६७॥

कथं नो मोदकैरेतै-र्निर्वाहोऽत्र भविष्यति ।
विक्रीतेषु मोदकेषु, कार्यं स्यादतिशोभनम् ॥१६८॥

यतो मोदकमूल्येन, बहु द्रव्यं भविष्यति ।
व्यत्येष्यन्ति दिनानीत्थं, तेन सप्ताधिकं सुखम् ॥१६९॥

भूयो भूयो विचार्येत्थं, हट्टं कान्दविकं ययुः ।
कथयामासुरेतं भोः !, श्रोतव्यं नो निवेदनम् ॥१७०॥

अत्रेमान् मोदकान् भद्र !, विक्रेतुं वयमागताः ।
गृह्णातूचितमूल्येन, तत्त्वं जानासि यत् स्वयम् ॥१७१॥

सरसांस्तान् सुगन्धींश्च, मोदकानवलोक्य सः ।
तन्मूल्यमुचितं दत्त्वाऽक्रीणात्तेभ्यो द्विरूप्यकम् ॥१७२॥

न्यदधात् स च तानात्म-हट्टे यत्नेन भूयसा ।
बहुमूल्येन दास्यामि, ग्राहकेभ्य इतीच्छया ॥१७३॥

द्वितीय दिवसे प्रात-र्धर्मदासस्य बालकाः ।
गृहे बुभुक्षिता जाताः, प्रातराशं विना तदा ॥१७४॥

किञ्चिदन्नं न वा भोज्यं, सिद्धमासीत् सुतुष्टिदम् ।
आहूय सेवकं श्रेष्ठी, प्रेषयामास तत्क्षणम् ॥१७५॥

भोज्यानयनकामोऽयं, हट्टं कान्दविकं ययौ ।
सेवकस्तत्क्षणं तत्र, विमृशन् ग्राह्यतां पुनः ॥१७६॥

गृहीतौ मोदकौ येन, रूप्यकद्वयमूल्यतः ।
दैवात्तमेव सम्प्राप्तो, हट्टे कान्दविकं तु सः ॥१७७॥

ततस्तं धर्मदासस्य, किङ्करस्त्वरयाऽऽकुलः ।
पक्वान्नं सरसं स्वादु, याचते स्म निदेशतः ॥१७८॥

ततः कान्दविकः शीघ्रं, गृहीत्वोचितमूल्यकम् ।
सेवकाय ददौ तस्मै, यथावस्थं द्विमोदकम् ॥१७९॥

मोदकद्वयमादाय, सेवक आगतस्ततः ।
श्रेष्ठिने प्रदायैवं, तस्याऽऽदेशः प्रपालितः ॥१८०॥

विलोक्य धर्मदास-स्तच्चिन्तयामास तत्क्षणे ।
एतन्मोदकलाभस्तु, कुतः कस्याऽपि वा कथम् ? ॥१८१॥

ततः कान्दविकाद् हट्टा-दानीतौ तौ स्वमोदकौ ।
संप्रेक्ष्य श्रेष्ठिना तत्र, तयोरेकश्च खण्डितः ॥१८२॥

तन्मध्यान्निःसृतं रत्न-मेकं दृष्ट्वं सविस्मयम् ।
ततो भग्नाद्वितीयस्मा-न्मोदकाच्च द्वितीयकम् ॥१८३॥

एवं रत्नद्वयं प्रेक्ष्य, श्रेष्ठिनाऽऽशु विचारितम् ।
तावेतौ मोदकौ स्तो यौ, दत्तौ रत्नयुतौ मया ॥१८४॥

जिनदासकृते पूर्वं, मोदकाः रत्नसंयुताः ।
तस्मै दत्तास्तु चत्वारस्तत्राऽपि द्वितयं कथम् ॥१८५॥

जिनदासेन विक्रीतौ, गृहीतौ वा ततो बलात् ।
केनाऽपि निर्दयेनेति, निर्णेतुं किङ्करं द्रुतम् ॥१८६॥

कथितं धर्मदासेन, विश्वस्तं बुद्धिमत्तमम् ।
यावन्तो मोदकाः सन्ति, हट्टे कान्दविके स्थिताः ॥१८७॥

गृहीत्वाऽऽगच्छ तान् सर्वान्, नाऽत्र कार्या विचारणा ।
निशम्य तद्वचः शीघ्रं, कार्यदक्षः स किङ्कर ॥१८८॥

गत्वा कान्दविकं स्वामि-निर्दिष्टं स न्यवेदयत् ।
सविधे तेऽधुना सन्ति, यावन्तश्चाऽपि मोदकाः ॥१८९॥

देहि मे निखिलांस्तांस्त्वं, स्वाम्यादेशप्रपूर्तये ।
किङ्करस्य वचः श्रुत्वा-ऽब्रवीत् कान्दविकश्च तम् ॥१९०॥

द्वावेव मोदकौ पार्श्वे, वर्तेते मम साम्प्रतम् ।
इत्युक्त्वा तौ ददौ तस्मै, किङ्कराय स मोदकौ ॥१९१॥

गृहीत्वा किङ्करश्चाऽपि, धर्मदासाय तौ ददौ ।
भञ्जयामास तौ तूर्णं, स विज्ञातस्वमोदकः ॥१९२॥

भग्नाभ्यां च ततस्ताभ्या-मपि रत्नद्वयं तथा ।
विनिर्गतं तदा वीक्ष्य, न तद्धेतुमबुध्यत ॥१९३॥

जिज्ञासमानस्तद् वृत्तं, धर्मदासोऽतिविस्मितः ।
कुतः कान्दविकः प्राप-दिति निर्णेतुमन्ततः ॥१९४॥

सोऽपि तत्र समाहूतः पृष्टश्चाऽपि न्यवेदयत् ।
मयैव निर्मिता भद्र !, विक्रीयन्ते च प्रत्यहम् ॥१९५॥

एवमेवाऽत्र भो धीमन् ! चिरकालन्निरन्तरम् ।
क्रयविक्रयरूपेण, व्यवहारो चलत्ययम् ॥१९६॥

आकर्ण्य तद्वचः श्रेष्ठी, सक्रोधस्तमवोचत ।
सत्यं निवेदयाऽऽशु त्वं, नो चेद्दण्डेन योक्ष्यसे ॥१९७॥

सत्यमुक्तं तदा तेन, यथा प्राप्तिस्तयोरभूत् ।
गृहीतौ मोदकौ काष्ठ-हारकेभ्यः स्वहट्टके ॥१९८॥

श्रेष्ठिना वास्तवं ज्ञातु-माहूताः काष्ठहारकाः ।
दर्शयित्वा भयं किञ्चि-त्पृष्टस्तेन च तद्यथा ॥१९९॥

सत्यमुक्तं ततस्तैस्तु, गृहीता मोदका यथा ।
अरण्ये श्रेष्ठिनं कञ्चिल्लुण्टित्वा खलु निर्जने ॥२००॥

इति वृत्तं तु विज्ञाय, श्रेष्ठिना चिन्तितं भृशम् ।
बालकार्थं मया दत्ता, लुण्टाकैस्तेऽपि लुण्टिताः ॥२०१॥

जिनदासनिषिद्धेऽपि, मोदकग्रहणे तदा ।
मया दत्ता बलात्तस्मै, ततो जातः स दुःखितः ॥२०२॥

महात्मनस्तु तस्याऽहं, दुःखहेतुरिहाऽभवम् ।
किं करोमि विधिस्तस्मै, यदि रुष्टोऽस्ति साम्प्रतम् ॥२०३॥

अनुकूले विधौ सर्वमनुकूलं प्रजायते ।
प्रतिकूले विधौ सर्वं, प्रतिकूलं भवत्यलम् ॥२०४॥

दैवाधीनं जगत् सर्वं, नाऽत्र कार्या विचारणा ।
अचिन्तितं समायाति, चिन्तितं याति दूरतः ॥२०५॥

रामो भावी नृपः प्रात-र्जगाम गहनं वनम् ।
इत्थं विचिन्त्य निश्चिन्तो, धर्मदासोऽभवत्तदा ॥२०६॥

निवसन् ठक्कुरग्रामे, जिनदासः स एकदा ।
वर्षाकाले स्वकार्यार्थी, किञ्चिद्ग्रामान्तरं ययौ ॥२०७॥

ततः परावृतस्याऽस्य, मार्गमध्ये समागमत् ।
सन्ध्याकाले नदी चैका, जलपूरेण पूरिता ॥२०८॥

उत्तरीतुं निशायां तां, नीरपूराप्लुतां नदीम् ।
अशक्नुवन् सरित्तीरे, तरुमारूढवानसौ ॥२०९॥

तरौ निशि वसन्ति स्म, भारण्डाख्या विहङ्गमाः ।
तेषां स्थितिः स्वरूपं च, चित्रकृत् ज्ञायते श्रुते ॥२१०॥

एकोदराः पृथग्ग्रीवा-स्त्रिपदा मर्त्यभाषिणः ।
भारण्डपक्षिणस्तेषां, मृतिर्भिन्नफलेच्छया ॥२११॥

तत्रैको बालभारण्ड, उवाच पितरं प्रति ।
न व्यत्येति निशाऽस्माक-मत्र किं प्रविधीयताम् ॥२१२॥

काव्यशास्त्रविनोदेन, कालो गच्छति धीमताम् ।
व्यसनेन तु मूर्खाणां, निद्रया कलहेन वा ॥२१३॥

तस्मान्मनोविनोदाय, वक्तव्या सुरसा कथा ।
यावत् प्रभातं हे तात !, विचित्रा नीतिगर्भिका ॥२१४॥

श्रुत्वा बालवचस्तत्र, वृद्धभारण्ड उक्तवान् ।
श्रूयतां हि मया काऽपि, कथा चित्रा निगद्यते ॥२१५॥

विहरन्तः समागच्छन्, कदाचिज्जैनसूरयः ।
संयता बहुवर्षेभ्यः, पूर्वमत्र विचक्षणाः ॥२१६॥

रात्रौ निवसतां तेषा-मेतत्तरुतले सुखम् ।
बहुधा समजायन्त, द्रव्ययोगप्रवृत्तयः ॥२१७॥

कथितं मुनिनैकेन, प्रभावो मणिमन्त्रयोः ।
लोके न शक्यते वक्तुमौषधीनां विशेषतः ॥२१८॥

अनलेन्धनयोगेऽपि, चन्द्रकान्ते सुयोजिते ।
दाहो न जायते तत्र, प्रभावो हि मणेः स्मृतः ॥२१९॥

मन्त्रेऽप्युच्चारिते सम्य-ग्विषवैद्येन तत्क्षणम् ।
सर्पदष्टा जनास्तावद्, जीवतीह यथासुखम् ॥२२०॥

तत्रौषधिप्रभावस्तु, प्रत्यक्षेणैव दृश्यते ।
लक्ष्मणो जीवितः पूर्वं, सञ्जीवन्येति श्रूयते ॥२२१॥

अधस्तादस्य वृक्षस्य, लते ये द्वे विनिर्गते ।
तत्प्रभावोऽप्यचिन्त्योऽस्ति, कर्णं दत्त्वा निशम्यताम् ॥२२२॥

पत्राशनेन चैकस्यां, अक्षिभ्यामश्रुबिन्दवः ।
पतन्त एव जायन्ते, मौक्तिकानि च तत्क्षणे ॥२२३॥

द्वितीयस्या लतायाश्च, पत्राणां भक्षणेन च ।
सप्ताहाभ्यन्तरे भोक्तू-राज्यप्राप्तिर्भवेद् ध्रुवम् ॥२२४॥

एवं प्रभावसम्पन्ने, लते एते सुविश्रुते ।
भवद्भिस्ते प्रयुज्येतां, यथाकालं यथाविधि ॥२२५॥

कथां कथयतस्तस्य, मुखाद् भारण्डपक्षिणः ।
वार्ता इमाः श्रुताः श्रेष्ठि-जिनदासेन सादरम् ॥२२६॥

ततो जाते प्रभाते तु, वृक्षात्तस्मादवातरत् ।
तदधःस्थलतायुग्म-पत्राणि स समाचिनोत् ॥२२७॥

नीरे न्यूने नदीं प्रातः, सुतरां श्रेष्ठिसत्तमः ।
उत्ततार तदा तूर्णं, समुत्साहितमानसः ॥२२८॥

समुत्तीर्णनदीकोऽसौ, सानन्दं गृहमाययौ ।
कालं स यापयामास, पत्नी-पुत्र-समन्वितः ॥२२९॥

एकदा चिन्तयामास, जिनदासो विचक्षणः ।
ब्राह्मे मुहूर्त उत्थाय, श्रीजिनेन्द्रं हृदि स्मरन् ॥२३०॥

पूर्वसञ्चितमत्कर्मो-दयेनैव विनाशिता ।
सर्वर्द्धिः खण्डशोऽदायि, देयं पूर्वभवे यतः ॥२३१॥

जिनचैत्यविहीनेऽस्मिन्, ग्रामे जातु न जायते ।
आगमो मुनिवर्याणा-मुपदेशस्तु दुर्लभः ॥२३२॥

धर्माराधनमस्माकं, कथं जायेत तं विना ? ।
चिन्तयन्निति धर्मात्मा, श्रद्धाशुद्धधिया मुदा ॥२३३॥

धर्ममाराधयन् दीना-ननाथांश्च समुद्धरन् ।
विदधानः सदा पञ्च-परमेष्ठिनमस्कृतिम् ॥२३४॥

आत्मप्रेरणया धर्मे, स्वं कुटुम्बं नियोजयन् ।
तत्र श्रेष्ठी चिरं कालं, यापयामास तोषभाक् ॥२३५॥

श्रेष्ठिना जिनदासेन, चित्ते चिन्तितमेकदा ।
प्रभाविभिर्लतापर्णैः, किं विधेयं मयाऽधुना ? ॥२३६॥

पुत्रद्वयाय दद्मां किं, लतापर्णानि वा नहि ? ।
भाग्यहीनतया किं नः पर्णैरेभिर्भविष्यति ? ॥२३७॥

यतो भाग्यविहीनाना-मुत्तमाऽपि न लाभदा ।
सामग्री जायते लोके, सर्वांशैरपि शोभिता ॥२३८॥

एवं विचिन्त्य स श्रेष्ठी, परोपकृतितत्परः ।
परस्मै तानि पत्राणि, विस्रष्टुं समकल्पयत् ॥२३९॥

ततस्तद्दानपात्रं स, गवेषयितुमुद्यतः ।
स्वग्रामस्वामिनं तं हि, ठक्कुरं निरधारयत् ॥२४०॥

उपकारी ममैवाऽयं ग्रामाधीशोऽस्ति ठक्कुरः ।
प्रसादेनैव यस्याऽहं, निवसामि सुखेन यत् ॥२४१॥

मण्डयित्वा तथा हट्टं, क्रयविक्रययोगतः ।
उपार्ज्य द्रविणं किञ्चि-ज्जीवामः सुखनिर्भरम् ॥२४२॥

तस्माद्देयानि पर्णानि, ठक्कुरायोपकारिणे ।
विचार्येत्थं जगौ स्वीयां, पत्नीमाज्ञानुसारिणीम् ॥२४३॥

एवं प्रिये ! कुरुष्वाशु, सुगन्धी स्वादशालिनौ ।
मोदकौ चूर्णसंमिश्रौ, स्थापनीयौ पृथक्-पृथक् ॥२४४॥

लतयोरेतयोर्भिन्ना, गुणास्सन्तीति हे प्रिये ! ।
तच्चूर्णं मिलितं नैव, न्यस्यं मोदकयोस्त्वया ॥२४५॥

किन्तु द्वयोर्मोदकयो-रेकैकस्मिन् पृथक्-पृथक् ।
लतयोर्भिन्नपत्राणां, चूर्णं क्षेप्यं प्रभावयुक् ॥२४६॥

यतः पुत्रद्वयायैतौ, ठक्कुरस्य महामतेः ।
समर्प्यौ मोदकौ सद्यो, यथोक्तफलदायिनौ ॥२४७॥

एवमुक्त्वा लताचूर्णे, दत्त्वा पत्न्यै पृथक्-पृथक् ।
बहिर्ययौ स्वकार्यार्थं, जिनदासो महाशयः ॥२४८॥

मोदकातिप्रियौ बालौ, चिरान्न मोदकं मम ।
अभक्षतामतस्ताभ्या-मपि कार्या हि मोदकाः ॥२४९॥

जिनमत्या विचार्येत्थ-मधिकं मोदकद्वयम् ।
निर्माय रक्षितं तत्र, भिन्ने भिन्ने स्थले स्वयम् ॥२५०॥

सौषधं च द्वयं तत्र, निरौषधमथो द्वयम् ।
उपरिष्टात्तु निःश्रेण्याः, स्थापितं प्रथमं द्वयम् ॥२५१॥

अधस्तात् स्थापितं तत्र, निरौषधमथो द्वयम् ।
अथाऽपि भाग्यवैचित्र्याज्जातं विस्मयकारकम् ॥२५२॥

मध्याह्नकाल आयातौ, तस्य पुत्रावुभावपि ।
विद्यालयादधीत्याऽऽशु, मातुराह्वानतत्परौ ॥२५३॥

क्षुत्पिपासाकुलौ तौ च, जातौ भोजनकाङ्क्षिणौ ।
हट्ट आसीत्तदा माता, कुर्वंती क्रयविक्रयम् ॥२५४॥

क्षुधितत्वाच्च निःश्रेण्या, गतावूर्ध्वं तु तौ सुतौ ।
तत्रस्थौ मोदकौ दृष्ट्वा, पुण्येनौषधिसंयुतौ ॥२५५॥

गृहीत्वा भक्षयित्वा ता-वेकैकं बहुतुष्टिदम् ।
पाठशालां गतौ बालौ, ततः श्रेष्ठी समाययौ ॥२५६॥

किञ्चित्कालं गृहे स्थित्वा, यथाबुद्धि विमृश्य च ।
अद्य प्रत्युपकुर्वेऽहं, ठक्कुरं गुणशालिनम् ॥२५७॥

अधोभागस्थितौ तौ च, गृहीत्वा मोदकावुभौ ।
ठक्कुरस्याऽर्पणायैष, सहर्षं तमुपाययौ ॥२५८॥

सप्रणाममुवाचेदं, शिष्टाचारविशारदः ।
प्रेरितो दैवयोगेन, 'भवितव्यं न रुध्यते' ॥२५९॥

सामान्यैर्मोदकैस्तुल्यं, न ज्ञेयं मोदकद्वयम् ।
एतत्प्रभावं विज्ञाय, साधुरीत्योपयुज्यताम् ॥२६०॥

मनसा सावधानेन, श्रूयतां वचनं मम ।
न प्रमादो विधेयोऽत्र, कल्याणविषये प्रभो ! ॥२६१॥

सप्ताहाभ्यन्तरे राज्य-लाभ एकस्य भक्षणात् ।
जायते ध्रुवमित्यत्र, नैव कार्या विचारणा ॥२६२॥

अन्यभक्षणमाहात्म्यं, तद्भोक्ता हि प्ररोदिति ।
तन्नेत्रपतिताश्रूणि, मौक्तिकानि भवन्ति च ॥२६३॥

ततोऽतिहर्षितेनैव, ठक्कुरेण च मोदकौ ।
भक्षितुं निजपुत्राभ्यां, ददाते तौ फलेच्छया ॥२६४॥

भक्षणानन्तरं पुत्रौ, स लोभान्मङ्क्ष्वताडयत् ।
किन्तु कस्याऽपि चक्षुर्भ्यां, मौक्तिकानि न निर्ययुः ॥२६५॥

ततोऽतिरुष्टः प्रोवाच, जिनदासं स ठक्कुरः ।
पुत्रताडनमात्रार्थं, त्वमेवं व्यदधा ध्रुवम् ॥२६६॥

मयाऽनुमीयते चेत्थं, कौटिल्यं तव हार्दिकम् ।
अतोऽहं ते हनिष्यामि, पुत्रौ द्वावपि साम्प्रतम् ॥२६७॥

इत्युक्त्वाऽऽहूय शालातो, जिनदासस्य नन्दनौ ।
निहन्तुं सोऽर्पयत्तूर्णं, चाण्डालाय नृशंसिने ॥२६८॥

स चाण्डालमुवाचेत्थ-मरे ! चाण्डाल ! मे वचः ।
श्रूयतां सावधानेन, हन्येतां बालकाविमौ ॥२६९॥

नो चेद्वियोक्ष्यसे प्राणै-स्त्वमेव सुविनिश्चितम् ।
एतच्छ्रुत्वा गृहीत्वा च, जिनदासस्य नन्दनौ ॥२७०॥

चाण्डालस्तद्वधं कर्तुं, निर्ययौ नगराद् बहिः ।
किमालोच्य कृतं किं हि, जातं भाग्येन कश्मलम् ? ॥२७१॥

इतश्च जिनदासोऽसौ, मनसाऽचिन्तयद् भृशम् ।
किमसत्यं वचो जातं, मुनीनां तथ्यवादिनाम् ॥२७२॥

मन्निमित्तवधो भावी, पुत्रयोर्मे निरागसोः ।
अथवा भाग्यहीनस्य, ममैतादृग् विपर्ययः ॥२७३॥

किं करोमि प्रपद्यैकं, शरण्यं वा कृपाजुषम् ? ।
अथवा शरणं दुःखे, धर्म एव न संशयः ॥२७४॥

अतो मे पुत्रयोः पुण्यं, तच्छरण्यं भविष्यति ।
निश्चितं तत्प्रभावेण, क्षेमं सर्वविधं तयोः ॥२७५॥

भाग्याधीनं जगत्सर्वं, चिन्तनं मे निरर्थकम् ।
जिनदासो विमृश्येदं, धृतिं लेभे च शाश्वतीम् ॥२७६॥

चाण्डालेन नीयमानौ, वधस्थानं शिशू उभौ ।
विज्ञातात्मवधौ भूरि-मार्गे रुरुदतुस्तराम् ॥२७७॥

तत्रैकस्य कनिष्ठस्य, जिनरक्षितकस्य तु ।
मौक्तिकानि प्रजातानि, पतिता अश्रुबिन्दवः ॥२७८॥

वस्त्राञ्चले मौक्तिकानि, जग्राह मतिमानसौ ।
जिनरक्षितनामाऽत्र, प्रयत्नेनाऽखिलान्यपि ॥२७९॥

रुदन्तौ बालकौ दृष्ट्वा, दयायुक्तोऽपि घातकः ।
एतौ कन्दर्पदर्पघ्नाविदं वचनमब्रवीत् ॥२८०॥

हे बालौ ! शृणुतं स्वस्थौ, ठक्कुरादेश ईदृशः ।
इमौ बालौ त्वया घात्यौ, नो चेत्प्राणैर्वियोक्ष्यसे ॥२८१॥

अतो युवां हनिष्यामि, वधस्थान उभावपि ।
एतदर्थं नये हन्तुं, स्मरतं स्वेष्टदेवताम् ॥२८२॥

इति तद्वचनं श्रुत्वा, जिनदत्ताभिधः शिशुः ।
ज्येष्ठोऽवदत् कोऽपि, नैवाऽपराधोऽकारि जातुचित् ॥२८३॥

ठक्कुरस्य पुरेशस्य, चावाऽऽभ्यां भद्र ! निश्चितम् ।
तदा कथं नौ हन्तुं त्वा-मादिशन्मतिमानसौ ॥२८४॥

बालस्यैवं वचः श्रुत्वा, ठक्कुराज्ञावशंवदः ।
अवदत् तं घन-क्रूर-कर्मलुप्त-विवेकधीः ॥२८५॥

अहं वर्ते पराधीन-स्तत् वां यदि जहाम्यहम् ।
ठक्करो मां ध्रुवं हन्यादिति त्यक्तुं क्षमोऽस्मि न ॥२८६॥

एवमुक्त्वा स चाण्डालः, खड्गमादाय तौ शिशू ।
हन्तुं प्रायुङ्क्त तत्पुण्य-प्रभावात् स च नाऽचलत् ॥२८७॥

पुण्योदये हि सकलं, विघ्नं नश्यति तत्क्षणम् ।
नश्यति हि तमोऽवश्यं, सूर्ये तुङ्गोदयाचले ॥२८८॥

ततः सञ्जातकरुण-श्चाण्डालस्तौ न्यवेदयत् ।
उपायमेकं कल्याण-कारकं सूचयाम्यहम् ॥२८९॥

हे बालौ ! यदि नैवाऽत्र, ग्रामे जातु भ्रमादपि ।
आगच्छेतं तदा नूनं, मुञ्चेयं न चाऽन्यथा ॥२९०॥

एवमस्त्विति तौ बालौ, चाण्डालं प्रति ऊचतुः ।
मौक्तिकानि च ददतुः, संगृहीतानि भूरिशः ॥२९१॥

चाण्डालस्तदा तूर्णं, तत्सौन्दर्यविमोहितः ।
प्राप्तमौक्तिकजातोऽसौ, मुमोच वधनिःस्पृहः ॥२९२॥

पुराकृतानि पुण्यानि, रक्षन्तीति वचो ध्रुवम् ।
यन्नृशंसजनस्याऽपी-दृशी जाता दया हृदि ॥२९३॥

चाण्डालष्ठक्कुरं गत्वा, प्रोवाच तुष्टमानसः ।
स्वामिंस्त्वदाज्ञया बालौ, वधस्थाने व्यघातयम् ॥२९४॥

ठक्कुरस्त्वद्वचः श्रुत्वा, संजातप्रत्ययस्तदा ।
सुखं निर्गमयामास, कालं कृत्यपरायणः ॥२९५॥

इतश्च वधनिर्मुक्तौ, पितृभ्यां तु वियोजितौ ।
चलन्तौ नगराण्येतौ, बहूनि चोल्ललङ्घतुः ॥२९६॥

यन्तौ रुदन्तौ संप्राप्तौ, विपिनं गहनं शिशू ।
पित्रोर्वियोगजं दुःखं, सहमानौ सुदुःसहम् ॥२९७॥

दिवाकरोऽपि तद्दुःख-मीक्षितुं न क्षमोऽभवत् ।
अस्ताचलमगात्तूर्णं, तमिस्रा समुपागमत् ॥२९८॥

ततस्तरुतले ताभ्यां, मनसीत्थं विचिन्तितम् ।
हिंसका बहवः सन्ति, तत्कथं शयनं द्वयोः ॥२९९॥

एकेनैवाऽत्र सुप्तव्य-मपरेण तु जाग्रता ।
सुप्तो रक्ष्यो महाघोरेऽरण्ये हिंसकजन्तुतः ॥३००॥ (युग्मम्)

एवं विमृश्य ज्येष्ठोऽवग्, भ्रातस्त्वं शेष्व पूर्वतः ।
त्वयि प्रबुद्धेऽहमपि, शयिष्ये रक्षितस्त्वया ॥३०१॥

कनीयानाह हे भ्रात-स्त्वमेव प्रथमं वने ।
स्वपिहीह ततः पश्चा-दहं स्वप्स्यामि रक्षितः ॥३०२॥

जिनदत्तः कनिष्ठस्य, भ्रातुर्वचनतः पुरा ।
सुप्तस्तत्र वने भीष्मे, जिनरक्षित-रक्षितः ॥३०३॥

जजागार तदा ज्येष्ठं, भ्रातरं परिपालयन् ।
लघुः स्नेहपरीतात्मा, हिंस्राद्बिभ्यन्महावने ॥३०४॥

तस्मिज्जाग्रति तद्रात्रेः, प्रहरेऽतिगते सति ।
अलक्षितं ददंशाऽहि-र्जिनदत्तं सुनिद्रितम् ॥३०५॥

प्राबोधयल्लघुभ्राता, ज्येष्ठं स्वं बान्धवं तदा ।
नाऽसौ प्रबुबुधे किन्तु, निद्रया हृतचेतनः ॥३०६॥

ततोऽज्ञासीत् स मे भ्राता, गाढनिद्रां गतोऽधुना ।
एवं सुप्तस्य रजनी, निःशेषा समजायत ॥३०७॥

अजायत तदाऽतीव-चिन्तासन्तानसङ्कुलः ।
निश्चेष्टं भ्रातरं दृष्ट्वा, व्यसदद् विजने वने ॥३०८॥

रुरोद बहु हा दैव !, किं त्वया पितृबन्धुतः ।
वियोगो दुःसहोऽदायि, किं करोमि क्व याम्यहम् ! ॥३०९॥

प्रपद्ये शरणं कं च, विललापतरां भृशम् ।
नाऽऽश्वासदायकः कश्चि-दासीत्तस्याऽऽपदागमे ॥३१०॥

एवं प्ररुदतस्तस्य, कियान्कालो व्यतीतवान् ।
ततः स स्थिरमात्मानं, कृत्वा चिन्तितवानिदम् ॥३११॥

निजबन्धोर्मृत्युकृत्यं, करोमि तदनन्तरम् ।
अग्निदाहं करिष्यामि, कोऽपि ग्रामः समीपगः ॥३१२॥

महीरुहं समारुह्य, पश्यताऽथ दिशोदिशम् ।
दिशि याम्यामपश्यच्च, ग्राममेकं समीपगम् ॥३१३॥

जिनरक्षितोऽथ वस्त्रेण, बन्धोर्देहं तरोर्द्रुतम् ।
शाखायां सुदृढं बद्धवा, दक्षिणस्यां प्रयातवान् ॥३१४॥

रुदन् गच्छन् कियद्दूरे, नगरं प्राप्तवानसौ ।
संगृह्णन्नश्रुबिन्दूत्थ-मौक्तिकानि मुहुर्मुहुः ॥३१५॥

केनचिच्छ्रेष्ठिना तत्र, लुब्धेन स निरैक्ष्यत ।
अहो बालो विचित्रोऽयं, मौक्तिकक्षारको मुहुः ॥३१६॥

ततः श्रेष्ठी शिशुं लुब्धोऽपृच्छत् त्वं कुत आगतः ।
किमर्थमिति मां ब्रूहि, तदोवाचाऽर्भकोऽपि तम् ॥३१७॥

दयालो ! बन्धुवर्यो मे, वने दष्टोऽहिना मृतः ।
अस्ति सम्प्रति तस्याऽहं, मृतकृत्यचिकीर्षया ॥३१८॥

इहाऽऽयातोऽस्मि कृपया, तद्दाहार्थसाधनम् ।
मह्यं देहि भवेद् येन, तस्य दाहक्रिया द्रुतम् ॥३१९॥

तन्नेत्राश्रूणि जातानि, मौक्तिकानि मुहुर्मुहः ।
तल्लोभपाशबद्धोऽसौ, तमनैषीद् गृहान्तरम् ॥३२०॥

करेङ्गितेन दासं स्व-मादिशत्त्वरितं तदा ।
नयेमं सप्तमभूम्यां, प्रासादस्याऽस्य सत्वरम् ॥३२१॥

नीत्वा स्थापय मञ्जूषा-मध्ये पूरय तन्मुखम् ।
येनाऽयं नैव निःसर्तुं, प्रभवेज्जातु बालकः ॥३२२॥

ततः श्रेष्ठिवचः श्रुत्वा, दासस्तदनुसारतः ।
नीत्वा तं सप्तमावन्यां, स्थापयामास यत्नतः ॥३२३॥

मञ्जूषायां विशालायां, पिधानेन च तां व्यधात् ।
इतश्चाऽसौ विषण्णात्मा, भ्रातृदाहसमुत्सुकः ॥३२४॥

अपराधीव निगडे, बद्धो निःसर्तुमैहत ।
कष्टेन यापयन् कालं, रुदन गाढं मुहुः शिशुः ॥३२५॥

तं शिशुं स्वादुभोज्यानि, भोजयित्वा दिने दिने ।
प्रभाते कशयाऽऽघात्य, रोदयित्वाऽतिनिर्दयः ॥३२६॥

अश्रुबिन्दून्निपततो, मौक्तिकत्वमुपेयुषः ।
लिप्सू रुदन्तं नाऽमुञ्चत्प्रार्थितोऽपि मुहुर्मुहुः ॥३२७॥

एवं निष्कास्य मञ्जूषा-मध्याच्छ्रेष्ठी स प्रत्यहम् ।
रुदन्तं कशया निघ्नन्, निर्दयोऽसौ तुतोद तम् ॥३२८॥

अश्रुबिन्दुसमुद्भूतं, गृह्णन् मौक्तिकसंचयम् ।
इत्थं कशाऽभिघातेन, प्रतिपातेऽतिदुःखितः ॥३२९॥

श्रेष्ठिनः सप्तमावन्यां, मञ्जूषायां नियन्त्रितः ।
बन्धुना रहितो बालो, निनायाऽहानि कानिचित् ॥३३०॥

• • •

इतश्च जिनदत्तस्य, किं जातं तन्निगद्यते ।
तस्मिन्नरण्ये मध्याह्न-काले तद्भाग्ययोगतः ॥३३१॥

गारुडीं विश्रुतां विद्यां, धरन्तः केचिदाययुः ।
ते मार्गश्रमशान्त्यर्थं, तरोस्तस्याऽध आस्थिताः ॥३३२॥

कुर्वन्तस्ते हि संलापं, गारुडास्तरुलम्बितम् ।
जिनदत्तं दृढं बद्धं, दृष्ट्वा वस्त्रेण विस्मिताः ॥३३३॥

तत्रैको वृक्षमारुह्या-ऽधस्तात्तमवतार्य च ।
निश्चेष्टं ददृशुः सर्वे, कृष्णवर्णकलेवरम् ॥३३४॥

ततो गारुडिकैः सर्प-दष्ट एषोऽस्ति मानवः ।
एवं निर्धारितं तर्हि, सर्पदष्टः पुमान् खलु ॥३३५॥

षण्मासान् जीवतीत्यस्मा-दस्य गारुडिकेन हि ।
मन्त्रेण जीवितं देय-मस्माभिः करुणापरैः ॥३३६॥ (युग्मम्)

परोपकारतोऽस्माकं, जीवितं स्यात्फलान्वितम् ।
इत्यालोच्याऽऽशु तैः, सोऽहिविषमुक्तो व्यधीयत ॥३३७॥

जिनदत्तः क्षणेनाऽसौ, जजागार प्रसुप्तवत् ।
ततो गारुडिकान् स्वीय-समीपस्थान्निरैक्षत ॥३३८॥

निजबन्धुमदृष्ट्वा सो-ऽपृच्छत्तांस्तदा द्रुतम् ।
मम बन्धुरगात्कुत्रे-तच्छ्रुत्वा ते न्यवेदयन् ॥३३९॥

वयमत्राऽधुनाऽऽयाता, बद्धं वस्त्रेण शाखिनि ।
सर्पदष्टं विलोक्य त्वां, मन्त्रेण गारुडेन हि ॥३४०॥

अकार्ष्म निर्विषं किन्तु, न तेऽपश्याम सोदरम् ।
तच्छ्रुत्वा जिनदत्तोऽसौ, चिन्तयामास चेतसि ॥३४१॥ (युग्मम्)

नूनं मे बन्धुरालोक्य, मां दष्टं फणिना तरोः ।
शाखायां वाससा बद्ध्वा, कुत्राऽपि व्रजितो भवेत् ॥३४२॥

तं कुत्राऽन्वेषयामीति, दुःखितं प्रेक्ष्य चिन्तया ।
गारुडिकास्तमपृच्छन्, किं त्वया चिन्त्यतेऽधुना ॥३४३॥

इति तैः पृष्ट आख्यात् स, वृतान्तं सकलं स्वकम् ।
महाशया ! न युष्माकं, क्षमः प्रत्युपकर्मणि ॥३४४॥

तदा किं करवाणीति, श्रुत्वा ते तं बभाषिरे ।
अस्माकं नास्ति वाऽपीहो-पकारो यः कृतस्तव ॥३४५॥

भवान्तरे स्तात् क्षेमाये-त्युक्त्वा गारुडिका अपि ।
स्वाभीष्टपथमाश्रित्य, ततः प्रास्थुः कृतार्थकाः ॥३४६॥

इतश्च जिनदत्तः स, स्वबन्धुं मार्गितुं परः ।
बभ्रामेतस्ततः क्वाऽपि, बन्धोः शुद्धिं न लेभिवान् ॥३४७॥

सप्तमे दिवसे यत्र, नगरे जिनरक्षितः ।
आसीत् कृपणगेहेऽसौ, तद्बहिर्देशमाययौ ॥३४८॥

तदा तन्नगराधीशे-ऽपुत्रे-ऽकाले दिवंगते ।
तत्र प्रधाना राजार्ह-पुंगवेषणहेतवे ॥३४९॥

छत्रचामरभूषाद्यै-रलञ्चक्रुर्महागजम् ।
स गजेन्द्रो भ्रमंस्तत्र, नगरे क्रमतो बहिः ॥३५०॥

नगरान्निःसृतः प्राप-दुद्यानं सान्द्रवृक्षकम् ।
तत्र वृक्षतले सुप्तं, जिनदत्तमुपेयिवान् ॥३५१॥

कुञ्जरेन्द्रोऽभ्यषिञ्चत्तं, स्वयं छत्रमदीधरत् ।
चामरे स्वयमेवैते, वीजयामासतुस्तराम् ॥३५२॥

गृहीत्वा स्वकरेणाऽमुं, स्वपृष्ठोपर्यतितिष्ठिपत् ।
ततो मन्त्रिमुखाः पौर-जना नवनरेश्वरम् ॥३५३॥

अमन्दानन्दसन्दोह-सङ्कुलास्तं ववन्दिरे ।
प्रावेशयंश्च नगरं, महामहपुरस्सरम् ॥३५४॥

राज्याभिषेकसामग्र्या-ऽभ्यषिञ्चन् राजसंसदि ।
एवं राज्यप्रदौषध्याः, प्रभावेण स तत्पुरे ॥३५५॥

महाराजोऽभवद् दैवे-ऽनुकूले स्यात् शुभोदयः ।
ततः स्वं बन्धुमन्वेष्टुं, चारान् सर्वत्र प्राहिणोत् ॥३५६॥

जिनदत्तः नृपः किन्तु, तद् वृत्तं नैव लब्धवान् ।
सदैव बन्धुविरहा-नलसन्तप्तमानसः ॥३५७॥

निनाय स दिनान्येवं, राज्यमाप्तोऽपि दुःखभाक् ।
सम्पद्यपि न सौख्यं स्यात्, प्रतिकूलेषु कर्मसु ॥३५८॥

इतश्च कृपणश्रेष्ठि-गेहे विविधताडनम् ।
सहमानोऽतिकष्टेनाऽनयद्वारान् कथञ्चन ॥३५९॥

श्रेष्ठिनस्तस्य कुष्ठ्येको, जन्मतो रोग्यभूत् सुतः ।
लोके प्राख्यापयन्मेऽस्ति, पुत्रोऽतीव मनोहरः ॥३६०॥

तस्योपरि न कस्याऽपि, दृष्टिदोषो लगेदतः ।
स्थापितोऽस्ति मया बालः स मे भूमिगृहान्तरे ॥३६१॥

इत्यसत्येन वचसा, सर्वे तेन प्रतारिताः ।
तस्य रूपकथां श्रुत्वा, सर्वे मुमुदिरे जनाः ॥३६२॥

अहो पुण्यमहोभाग्यं, फलं लब्धं नृजन्मनः ।
इति शशंसिरे ते तं, श्रेष्ठिनं चाऽपि नन्दनम् ॥३६३॥

रत्नश्रेष्ठी निजां कन्यां, दातुं कृपणमिभ्यकम् ।
प्रार्थयामास तं तस्य, पुत्राय श्रुतिमात्रतः ॥३६४॥

कृपणेभ्यो मणिश्रेष्ठि-महाग्रहवशंगतः ।
स्वीचकाराऽर्थितं तूर्णं, हर्षोत्कर्षेण सङ्कुलः ॥३६५॥

मुहूर्तं च विवाहस्य, विनिश्चेतुं प्रचक्रमे ।
वैशाखशुक्लपक्षस्य, तृतीया निश्चिताऽभवत् ॥३६६॥

इतश्च कृपणश्रेष्ठी, कृते वासरनिश्चये ।
चिन्तयामास किं कुर्वे ?, पुत्रोऽस्ति कुष्ठिकः खलु ॥३६७॥

कुष्ठाक्रान्तसुतस्याऽऽस्यं, कथं लोकान् प्रदर्शये ?।
इति चिन्तातुरस्याऽस्या-ऽस्फुरच्चित्ते सपद्यथ ॥३६८॥

यद्येष मौक्तिकक्षारो, बालो मत्वा वचो मम ।
मद्दारकस्य स्थाने चेत्, कुर्याद् वैवाहिकं विधिम् ॥३६९॥

तदा सर्वं शुभं भावी-त्येवं सोऽभून्निराकुलः ।
प्राह च मौक्तिकक्षारं, मञ्जूषासंस्थितं तकम् ॥३७०॥

कन्यां शीलवतीं नाम्नीं, पुत्रार्थं परिणीय मे ।
यदि दत्से तदा भो ! त्वां, मोक्ष्याम्यपरथा न तु ॥३७१॥

श्रेष्ठिनस्तद् वचः श्रुत्वा, प्राह बालः स निर्भयः ।
कन्याया जीवितं तस्याः, करिष्ये पलितं न हि ॥३७२॥ ( युग्मम् )

तदाऽऽह कृपणश्रेष्ठी, यद्येवं न करिष्यसि ।
तदा त्वाऽऽनिधनादत्र, मञ्जूषायां निवासये: ॥३७३॥

करिष्याम्यहितां तीव्रां, वेदनां ते न संशयः ।
भवन्ति दुर्जना नित्यं, परपीडनतत्पराः ॥३७४॥

श्रुत्वेति मृत्युभीत्या स, मौक्तिकक्षारको हृदि ।
चिन्तयामास किं कुर्वे ?, भावि यन्न तदन्यथा ॥३७५॥

एतादृशैव कन्याया-स्तस्याः स्यात् भवितव्यता ।
तेनैवेदृक् प्रसङ्गोऽद्योपस्थितोऽभूदचिन्तितः ॥३७६॥

अतोऽधुनैतद्वचन-स्वीक्रियैव गरीयसी ।
पश्चादहं करिष्यामि, समये हि यथोचितम् ॥३७७॥

संप्राप्ते सङ्कटे धीमान्, कुर्यादापतितं तथा ।
यथा सङ्कटमुत्तीर्य, भवेन्निष्कण्टकं सुखी ॥३७८॥

एवं विमृश्य कृपण-श्रेष्ठिनं प्रत्यभाषत ।
परिणीय प्रदास्यामि, कन्यां ते तनुजन्मने ॥३७९॥

त्वयाऽपि वचनं स्वीयं, सम्यक् पाल्यं महाशय !।
एवं तद्वचनं श्रुत्वा, कृपणेभ्योऽतुषत्तराम् ॥३८०॥

गृहे वैवाहिकमहं, प्रारेभे स मुदान्वितः ।
नरेन्द्राग्रमुपेत्याऽसा-वुपायनमदात्ततः ॥३८१॥

निजपुत्रविवाहार्थ-मलङ्कारयुतं गजम् ।
तुरङ्गमरथादींश्च, विवाहोपस्करान् नृपात् ॥३८२॥

गृहीत्वा सदनं स्वीय-मायासीत् कृपणेभ्यराट् ।
लग्नयात्रादिने हस्ति-रत्ने मौक्तिकनिःक्षरम् ॥३८३॥

तं संस्थाप्य सुतं स्वीयं, कुष्ठिनं च पटैर्वृतम् ।
रथमारोप्य नगर-मध्येन निःससार सः ॥३८४॥ (युग्मम्)

निरीक्ष्य निखिलाः पौराः, मौक्तिकक्षारकं वरम् ।
वरवारणमासीनं, शशंसुः श्रेष्ठिनं तथा ॥३८५॥

अहो ! मनोहराङ्गोऽयं, वरः स्मर इवाऽङ्गवान् ।
श्रेष्ठ्यपि बहुधन्योऽस्ति, यस्येदृग् रूपवान् सुतः ॥३८६॥

एवं स्वसुतभूतस्य, तस्य स्वस्य च श्लाघया ।
प्रसन्नः कृपणः प्राप्तः, शीलवत्याः पुरं परम् ॥३८७॥

रत्नश्रेष्ठी तु नागेन्द्र-स्थितं तं जिनरक्षितम् ।
अद्भुताकारमालोक्य, भृशं प्रमुमुदेतराम् ॥३८८॥

अजायत विवाहोऽपि, महामहपुरस्सरम् ।
दुर्घटघटनानिष्णो, विधिरगम्यकृत्यकृत् ॥३८९॥

मौक्तिकक्षारिणा सार्धं, शीलवत्या विधानतः ।
करमोचनकालेऽदा-ज्जामात्रे द्रविणं बहु ॥३९०॥

एवं वैवाहिकमहा-महे पूर्णे ततोऽखिलाः ।
वरपक्षगता लोका, निर्ययुर्नगराद्बहिः ॥३९१॥

असौ शीलवती पित्रोः, प्रणम्य चरणाम्बुजे ।
प्रसन्नमनसः प्राप्याऽऽशिषं तुतोष वर्णिनी ॥३९२॥

मौक्तिकक्षारिणा सार्धं, स्वामिनाऽऽनन्दमण्डिता ।
रथवर्यं समारुह्य, प्रास्थात् पतिगृहं प्रति ॥३९३॥

सुरूपं स्वपतिं प्रेक्ष्य, मुदा मेदुरमानसा ।
स्वजन्म सफलं मेने, सुखं दैववशंवदम् ॥३९४॥

हृदं मान्त्या मुदा साऽथ, प्राशंसद् दासिकाग्रतः ।
रम्भिके ! मे पती राजकुमार इव दृश्यते ॥३९५॥

अहं पुण्यवती स्त्रीषु, यदीदृक्पतिमीयुषी ।
रम्भाऽऽह युवयोर्योग-कलां वेत्ति विधिः खलु ॥३९६॥

सोऽपि मौक्तिकनिःक्षारी, न किञ्चित्प्रत्यभाषत ।
चलचित्तोऽथ लुलुके, स्मयमान इतस्ततः ॥३९७॥

ततः शीलवती स्वीय-पतिं वीक्ष्याऽतिचञ्चलम् ।
अस्याऽऽस्यं श्यामलं म्लानं, चिन्तया वह्निकल्पया ॥३९८॥

तदाऽपृच्छदये नाथ !, विनोदसमयेऽधुना ।
किमेवं चञ्चलस्वान्तो, लक्ष्यसे ? कारणं वद ॥३९९॥

मौक्तिकक्षारकोऽवक् तां, बाले ! नाऽहं पतिस्तव ।
भाटकेन मयाऽसि त्वं, परिणीता पराज्ञया ॥४००॥

यदेष कृपणश्रेष्ठी, मौक्तिकग्रहणेच्छया ।
स्वगेहे सप्तमावन्यां, मञ्जूषायां निरुध्य माम् ॥४०१॥

बद्धं मामन्वहं तोत्र-ताडनेन मदक्षितः ।
च्युतमौक्तिकजातं च, गृह्णाति स दयोज्झितः ॥४०२॥(युग्मम्)

नवां वधूमधुना त्वां, विवोढां भाटकेन हि ।
कृपणस्याऽर्पयिष्यामि, कुष्ठिने तस्य सूनवे ॥४०३॥

तन्मां मोक्ष्यति कुश्रेष्ठी, पापिष्ठः पुत्रप्रेमतः ।
प्रेमान्धा न हि पश्यन्ति, परपीडां कदाचन ॥४०४॥

सुन्दरि ! पश्य मामेष, निर्ममः करसञ्ज्ञया ।
आज्ञापयत्यवतरीतुं, रंहसा स्यन्दनादतः ॥४०५॥

अतोऽहं द्रागगमिष्यामी-त्युक्त्वाऽसौ मौक्तिकक्षरः ।
अवतीर्य रथात्तूर्णमारुरोह रथान्तरम् ॥४०६॥

अथाऽसौ श्रेष्ठिनः कुष्ठी, पुत्रो रथमुपागमत् ।
आरुरुक्षू रथं शीलवत्याऽऽरोहन्तमञ्जसा ॥४०७॥

पार्श्वस्थदासीहस्तेन, पातयामास तं भुवि ।
स भूयो रथमारोढु-माजगाम पुनश्च तम् ॥४०८॥

चेटी पाणितलेनाऽधोऽपीपतद् वेगभागिना ।
ततोऽसौ खेदमापन्न-स्तत्र रुदन्नवास्थित ॥४०९॥

श्रेष्ठिप्रभृतयो लोकास्तामागत्य बभाषिरे ।
किमेवं कुरुषे ? साऽवक्, कुष्ठिकोऽयं न मे वरः ॥४१०॥

परिणेता तु मां योऽति-रूपवान् राजपुत्रवत् ।
तस्माद् यद्येष आयाति, तदा निष्कासयामि तम् ॥४११॥

तत्रैवं पथि वाग्युद्ध-मभूत्तेषां परस्परम् ।
मध्यस्थपुरुषा ऊचु-रत्र वाक्कलहेन किम् ? ॥४१२॥

यत्कार्यं तद् गृहे कार्यं, लोकमध्ये क्वचिन्नहि ।
मौक्तिकक्षारकोपेता, जग्मुर्ग्रामं समे जनाः ॥४१३॥

शीलवत्या निवासाय, वासमेकं समार्पयत् ।
तत्र दासीयुता शील-वत्युवास यथासुखम् ॥४१४॥

अन्येद्युस्तातप्रहितः, स कुष्ठी श्रेष्ठिनन्दनः ।
शीलवत्या समीपं चाऽऽगच्छन् दास्याऽवमानितः ॥४१५॥

निःश्रेण्या अध आक्षिप्त-श्चूर्णिताङ्गो ह्यजायत ।
एवं यदा यदा सोऽगाद्, दास्यक्षैप्सीत्तदा तदा ॥४१६॥

अधस्तात् कुष्ठिनं श्रेष्ठिनन्दनं निन्द्यविग्रहम् ।
तेनैवं निरचैषीत् स, नाऽत्रैष्यामि कदाऽप्यहम् ॥४१७॥

कति व्यतीयुरेवं हि, दिनानि श्रेष्ठिसद्मनि ।
न मेने कस्यचिद् वाक्य-मसौ शीलवती सती ॥४१८॥

एकदा कृपणश्रेष्ठी, चिन्तयामास चेतसि ।
यदि तां धरणीनाथो, बोधयेत् तर्हि मंस्यते ॥४१९॥

एवं विचिन्त्य विविधै-रुपहारैर्वरैर्नृपम् ।
उपेत्योपहृतिं दत्त्वा, स्ववृत्तान्तं न्यवेदयत् ॥४२०॥

स्वस्नुषाबोधनार्थाय, प्रार्थयामास पार्थिवम् ।
भविष्यति शुभं किञ्चि-दिति मत्वा स भूपतिः ॥४२१॥

स्वीकृत्यैतदवोचच्च, श्व एष्यामि तवाऽऽलयम् ।
ततोऽसौ कृपणश्रेष्ठी, निजगेहं समागतः ॥४२२॥

नृपागमनवृत्तान्तं, स्वकुटुम्बं न्यवेद्य सः ।
सज्जीचकार राजार्ह-सत्कारोपस्करं वरम् ॥४२३॥

परिवारैर्वृतः प्रागात्, कृपणश्रेष्ठिसद्मनि ।
द्वितीयदिवसे राजा, प्रधानप्रमुखैर्निजैः ॥४२४॥

स्वार्थसिद्धयै सुधीः सर्वं, कालोचितं समाचरेत् ।
श्रेष्ठी तस्य नरेन्द्रस्य, सुष्ठु स्वागतमाचरत् ॥४२५॥

अन्तर्वेश्मोपविश्याऽथ, विशांपतिः नरोत्तमः ।
प्रासादमध्यभागस्य-सिंहासनमधिष्ठितः ॥४२६॥

परस्त्रीणां मुखं नेक्ष्यं-मिति चारुविचारतः ।
श्रेष्ठिस्नुषां जवनिकाऽभ्यन्तरे स्वानिरीक्षताम् ॥४२७॥

आहूय स्थापयामास, ततस्तां समभाषत ।
अयि पुत्रि ! कुलस्त्रीणामेक एव पतिः खलु ॥४२८॥

परिणेता स यादग् वा, तादृशो भवतात् परम् ।
नाऽन्यो भवति तद्धेतोः, सोऽवमान्यो न जातुचित् ॥४२९॥

त्वयाऽपि स्वपतिर्देव, इवाऽऽराध्यो हृदाऽनिशम् ।
एषो हि कुलबालानां, धर्मस्तु जीवितावधि ॥४३०॥

ततः शीलवती प्राह, विनयेन नृपं प्रति ।
नरदेव ! नृपाः नित्यं, जनानां जनकायिताः ॥४३१॥

तद्देव ! तातकल्पस्य तवाऽग्रेऽवाच्यमस्ति किम् ।
सत्यं वक्ष्यामि तस्य त्वं, दास्यसि न्याय्यमुत्तरम् ॥४३२॥

पूर्वं तु परिपृच्छामि, स्त्रीणां स्यात् कीदृशः पतिः ?।
परिणेता तदन्यो वा, ग्रहीता भाटकेन वा ? ॥४३३॥

उवाच नृपतिस्तर्हि, लौकिकाचारपेशलः ।
प्रसिद्धं जनतामध्ये, एवमेव विराजते ॥४३४॥

यः स्त्रीणां परिणेता स्यात्, सैव भर्ता भवेदिति ।
नाऽन्यस्तासां भवेन्नाथ, इति शास्त्रेषु निश्चितम् ॥४३५॥

शीलवती तदोवाच, वाचं वाचंयमा सती ।
राजन् ! न परिणेता मे-ऽयं कुष्ठी श्रेष्ठिनन्दनः ॥४३६॥

स्मररूपो नरः कोऽपि, विवोढा भाटकेन माम् ।
क्षरन्ति नेत्रतस्तस्य, मौक्तिकानि तु भाग्यतः ॥४३७॥

नरेन्द्रस्तन्मुखाम्भोजान्मौक्तिकक्षरणस्य तु ।
वार्तां श्रुत्वा निजं बन्धुं, शङ्कमानः स्म पृच्छति ॥४३८॥

वर्तते सोऽधुना कुत्र, पुत्रि ! गतभयं वद ।
तदानीमवदत् श्रेष्ठी, बिभ्यत् पापप्रकाशतः ॥४३९॥

एषा मम स्नुषा राजन्, चलचित्ताऽस्त्यतश्च सा ।
यद्वा तद्वाऽभिधत्ते यत्, तद्वचो न प्रतीयताम् ॥४४०॥

तदाकर्ण्य नरेन्द्रस्तु, जगाद परुषाक्षरैः ।
श्रेष्ठिंस्त्वया किमप्यत्र, न वक्तव्यं नराधम ! ॥४४१॥

नरनाथः पुनः शीलवतीं प्रपच्छ सादरम् ।
पुत्रि ! त्वमेव कथय, सोऽधुना कुत्र वर्तते ? ॥४४२॥

ततः सोवाच हे राजन् !, कृपणश्रेष्ठिनाऽमुना ।
प्रासादस्याऽस्य सप्तम्यां, भूमिकायां दयां विना ॥४४३॥

मौक्तिकानां प्रलोभेन, मौक्तिकक्षारकः सकः ।
मञ्जूषाभ्यन्तरे क्षिप्तो, वर्तते नरनायक ! ॥४४४॥

एवं श्रुत्वा नरेन्द्रो, द्राक्, परिवारसमन्वितः ।
गत्वोपरि स मञ्जूषा-मध्येऽपश्यत् स्वसोदरम् ॥४४५॥

ततो निष्कास्य हर्षेणा-ऽऽलिङ्गयद् गाढमञ्जसा ।
विरहानलसन्तापः, शान्तिमापाऽश्रुधारया ॥४४६॥

चिरात् स्वबन्धुसङ्गत्या, सपरिच्छद-भूपतेः ।
अद्भुतातुलितामन्दा-नन्दसन्दोह उद्ययौ ॥४४७॥

मौक्तिकक्षारकस्याऽपि, दैवाद् बन्धोः समागमात् ।
विशेषतस्तथैवाऽभूत्, प्रमोदोऽतुलितोऽद्भुतः ॥४४८॥

राजाऽनुजं निजं वृत्तं, व्यालदंशनतः समम् ।
आरभ्य विषमोक्षान्त-मुक्त्वा तं तत् स्म पृच्छति ॥४४९॥

स च श्रेष्ठिगृहाऽऽगत्या, आरभ्य सकलं निजम् ।
शीलवत्या विवाहान्तं, वृत्तान्तं हि न्यवेदयत् ॥४५०॥

ततोऽसौ धरणीनाथो, रोषारुणेक्षणोऽभवत् ।
एतादृक्षे हि निःशूके, कस्य रोषो न जायते ? ॥४५१॥

नृपोऽथ कृपणं क्रुद्धो, वध्यं स स्वकमादिशत् ।
नृपाः क्षाम्यन्ति नाऽन्यायं, विशेषं बान्धवे कृतम् ॥४५२॥

कनिष्ठस्य तु विज्ञप्त्या, विहायाऽऽज्ञां वधेऽस्य हि ।
नरेश्वरोऽखिलां लक्ष्मीं, तदीयामपहारयत् ॥४५३॥

निरवासयदाश्वेव, स्वबन्धुपरितापकम् ।
निकटं कण्टकं नैव, रक्षन्ति सुखकाङ्क्षिणः ॥४५४॥

नृपः स्वबन्धुना युक्तः, शीलवत्या तया मुदा ।
गजेन्द्रस्कन्धमारुह्य, निजमन्दिरमागमत् ॥४५५॥

स्वबन्धोः शीलवत्याश्च, राजाऽष्टाह्निकमुत्सवम् ।
जिनेन्द्रचैत्ये संहृष्टः, कारयामास भक्तितः ॥४५६॥

एवमानन्दसन्दोहाद्, व्यतीयुर्वासराः सुखम् ।
विधिज्ञानां न चित्राय, सुख-दुःखपरम्परा ॥४५७॥

एकमेवाऽभवद् दुःखं, दुःसहं सहजन्मनोः ।
यन्मातुर्जनकस्याऽपि, चिराय विरहोऽभवत् ॥४५८॥

सबन्धुर्नरनाथः स्व-पित्रोस्तु मिलनोत्सुकः ।
प्राप्तैकस्मिन् सुखेऽन्यत् तद्, वाञ्छ्यते हीदृशो नरः ॥४५९॥

प्रधानानीकिनीनाथ-मुक्त्वा करि-तुरङ्गमैः ।
राज्यरक्षार्थमादिशन्-मन्त्रिसेनापतींस्तदा ॥४६०॥

पदाति-रथमुख्यैश्च, प्रबलैः सैनिकैर्युतः ।
निर्ययौ स्वीयभवना-दुत्को विजययात्रया ॥४६१॥

साम-दाम-भेद-दण्डैः, पथिस्थान् नृपपुङ्गवान् ।
वशीकुर्वन् क्रमेणाऽऽशु, ठक्कुरग्राममागमत् ॥४६२॥

यद्ग्रामे माता-पितरा-वास्तां तद्ग्रामतो बहिः ।
क्वचिद् भूमिस्थले तूर्णं, स्कन्धावारमतिष्ठिपत् ॥४६३॥

ठक्कुरोऽपि महाराजागमनाद् भयान्वितः ।
तत्राऽऽगत्य ननामैवं, सभ्रातृकं नरेश्वरम् ॥४६४॥

सुबहूपायनं दत्त्वा, तदाज्ञां शिरसाऽवहत् ।
कथाविनोदैर्नृपति-र्जिनदत्तोऽन्वयुक्त तम् ॥४६५॥

त्वदीयनगरे कोऽपि, वणिगस्त्यथवा नहि ।
सोऽवगस्ति मम ग्रामे, जिनदासाभिधो वणिक् ॥४६६॥

वत्सरेभ्यः कियद्भ्योऽसा-वस्ति वाणिज्यमाचरन् ।
नृपोऽपि श्रेष्ठिनन्तञ्चाऽऽनेतुं कमपि प्राहिणोत् ॥४६७॥

तद्दूताकारणावाक्यं, श्रुत्वा श्रेष्ठी त्वरान्वितः ।
समागत्य नृपं बन्धु-सहितं प्रणनाम च ॥४६८॥

पर्यपृच्छन्नरेन्द्रस्तं, श्रेष्ठिन् ! त्वं मामवेहि किम् ?।
नम्राननोऽवदत् श्रेष्ठी, हृदि संकोचमावहन् ॥४६९॥

भवन्तं पृथिवीनाथं, को न जानाति साम्प्रतम् ? ।
नरेन्द्रोऽवङ् नैवमस्ति, किन्तु पृच्छाम्यहं खलु ॥४७०॥

सम्बन्धित्वेन तदा स्माह, जिनदासो महाशयः ।
सत्यं सबन्धुं राजानं, पुत्रत्वेनाऽभ्यलक्षयत् ॥४७१॥ (युग्मम्)

किन्त्वसौ कथमित्थं द्राक्, कथयेत् त्वं सुतोऽसि मे ।
ततः श्रेष्ठी स मौनेन, तस्थौ नृपतिसन्निधौ ॥४७२॥

तदा सबन्धू राजाऽसौ, सिंहासनात् समुत्थितः ।
तत्पादपुण्डरीकेऽथ, चञ्चरीकोऽवदन्मुदा ॥४७३॥

ताताऽस्माकमियान् काल-स्तवाऽऽस्येक्षणवर्जितः ।
विनाऽस्मज्जननीपाद-पद्मवन्दनतोऽपि च ॥४७४॥

अद्याऽस्माकं दिनं तात !, सफलं जायतेतराम् ।
यत्पितृचरणाम्भोज-साक्षात्कारो ह्यजायत ॥४७५॥

माता जिनमती श्रुत्वा, वृत्तान्तं लोकतस्ततः ।
स्नेहामृतरसास्वाद-प्रसादितमनाः द्रुतम् ॥४७६॥

गृहान्निर्गत्य तत्राऽऽगाद् हर्षाश्रुभृतलोचना ।
सहसैतां निजाम्बां तौ, निरीक्ष्य द्वावपि द्रुतम् ॥४७७॥

धावित्वा नेमतुर्मातृ-पादाब्जे भक्तिभृद्हृदौ ।
न त्यजन्ति विवेकं हि, सन्तः सारधियः शुकाः ॥४७८॥

माताऽप्यतिप्रमोदेन, निःस्रवत्स्तनमण्डला ।
नयनद्वयतोऽश्रूणि, मुञ्चन्ती प्रेक्षते तकौ ॥४७९॥

हर्षोत्कर्षोर्मिमालाभि-रुद्यद्-हृदयसागरा ।
तौ सुतौ सहसोत्थाप्य, प्रालिलिङ्ग सुभाग्यभाक् ॥४८०॥

जिनदत्तोऽपि पितरौ, निजसिंहासनोपरि ।
संस्थाप्योवाच युष्माकं, पुण्यपुञ्जप्रभावतः ॥४८१॥

राज्यमेतन्मया प्राप्तं, नाऽत्र शङ्कालवोऽपि हि ।
स्वीकरोतु कृपां कृत्वा, तद् रे तात ! गुणाम्बुधे ! ॥४८२॥ (युग्मम्)

वयं च वः पदाम्भोजे, निषेविष्यामहि सदा ।
समयं प्राप्य कल्याण-मयं को गमयेत् सुधीः ? ॥४८३॥

पितरावूचतुः पुत्रौ !, यावज्जीवं सुभाग्यतः ।
इदमाराधितस्याऽहो-धर्मकल्पतरोः फलम् ॥४८४॥

तस्माद् युवामपि प्राज्य-भक्तिसम्भृतमानसौ ।
भवतं सर्वदा पुत्रा-वपि धर्मोन्मुखावुभौ ॥४८५॥

दीनानाथादिसत्त्वेषु, दयाकृत्येषु तत्परौ ।
जिनेश-गुरुवर्याणां, भक्तारौ च बभूवतुः ॥४८६॥

श्रेष्ठिसुतवधायाऽऽज्ञां, निजां स्मरंस्तु ठक्कुरः ।
मनुते स्वमपराद्धं, लज्जया म्लानमानसः ॥४८७॥

वधादेशभवं मन्तुं, निजं क्षामयितुं तदा ।
सपुत्रजिनदासस्य, समीपमुपजग्मिवान् ॥४८८॥

परादरेण नम्रः सन्, नमति स्म पदाम्बुजे ।
नृपोऽपि चक्षमे तस्याऽगाधमप्यपराधकम् ॥४८९॥

प्रदात्रे आश्रयस्याऽथ, ठक्कुरायाऽपि भूपतिः ।
ददौ प्रत्युपकारार्थं, ग्रामान् मुदितमानसः ॥४९०॥

जिनदत्तनरेन्द्रोऽसौ, जिनरक्षितसंयुतः ।
स्वकीयपितृनिर्बन्धात्, सिंहासनमधिष्ठितः ॥४९१॥

शक्तिमान् स शशासाऽथ, राज्यं निर्नष्टकण्टकम् ।
पुत्रवत् पालयामास, प्रजाः सर्वाः दयार्द्रहृत् ॥४९२॥

जिनमत्या युतो नित्यं, जिनदासोऽपि शुद्धधीः ।
आचार्यवर्यवक्त्राब्जात्, शृणोति धर्ममार्हतम् ॥४९३॥

जिनेन्द्रप्रतिमामर्चन्, ददद् दानं च पात्रके ।
साधर्मिकेषु वात्सल्यं, धरन् व्रतपरायणः ॥४९४॥

धर्ममाराधयन्नेवं, कियान् कालः व्यतीतवान् ।
पुराकृतानि पुण्यानि, फलन्त्येव नृणां ध्रुवम् ॥४९५॥

श्रीधर्मघोषसूरीश-पार्श्वे प्रान्ते सभार्यकः ।
दीक्षामादाय प्राराध्य, देवलोकातिथित्वमैत् ॥४९६॥

इतश्च जिनदत्तोऽसौ, जिनरक्षितसंयुतः ।
न्यायेन पालयन् राज्यं, धर्मकृत्यरतोऽभवत् ॥४९७॥

जिनेन्द्रचैत्यरुच्यानि, नगराणि समाचरन् ।
कुर्वन् धार्मिकवात्सल्यं, दीनादींश्च समुद्धरन् ॥४९८॥

सद्धर्मकृत्यैः पूज्यार्ह-च्छासनं च प्रभावयन् ।
श्राद्धधर्मधुरीणः स, निनाय समयं सुखम् ॥४९९॥

भवाब्धितारिणीं दीक्षा-मादाय गुरुसन्निधौ ।
शास्त्राण्यधीत्य चारित्रं, शुद्धमाराध्य भावतः ॥५००॥

तपस्तप्त्वा चिरं प्रान्ते, कृत्वा पञ्चनमस्कृतिम् ।
मृत्युं समाधिना प्राप्य, स्वर्जगाम निराकुलः ॥५०१॥ (युग्मम्)

ततश्च्युत्वा च सम्प्राप्य, नरत्वं धर्मवासितम् ।
क्रमशो धर्ममाराध्य, सिद्धिं प्राप्स्यति निश्चितम् ॥५०२॥

इत्येवं श्रेष्ठिवर्य श्री-जिनदासकथां शुभाम् ।
श्रुत्वा शुद्धधिया धर्मं, समाचरन्तु धीधनाः ॥५०३॥

॥ इति उपाध्यायश्रीहेमचन्द्रविजयगणिवर्यविरचिताजिनदासश्रेष्ठिकथा समाप्ता ॥

# १७. अष्टादशपापस्थानकालोचनाशतकम् ॥

(रचना सं. २०३२ - मुंबई-गोडीजी)

वीरं भक्त्या जगद्वन्द्यं, नत्वा स्मृत्वा च सद्गुरुम् ।
पापभारापनोदाय, प्रयतेऽहं यथामति ॥१॥ (अनुष्टुप्-वृत्तम्)

अनाद्यनेहसो योऽसौ, संयोगो जीवकर्मणोः ।
दुःखरूपस्तथा दुःख-फलो दुःखानुबन्धकः ॥२॥

शुद्धधर्मं विना न स्या-त्तद्विच्छेदः कथञ्चन ।
तद्वाप्तिर्भवेज्जन्तो-र्विगमात् पापकर्मणः ॥३॥

स्यात्पापकर्मविगम-स्तथाभव्यत्वपाकतः ।
तत्पाकसाधनान्येवं, जगुस्त्रीणि जिनेश्वराः ॥४॥

चतुःशरणसम्प्राप्ति-स्तथा दुष्कृतगर्हणा ।
अर्हत्सिद्धादितत्त्वानां, सदा सुकृतसेवना ॥५॥

द्वितीयं साधनं तत्र, प्रोक्तं दुष्कृतगर्हणम् ।
विशेषेणेह संक्लिष्ट-पापनाशाय गद्यते ॥६॥

इहाऽनारतसंसार-परिभ्रमणहेतवः ।
अष्टादशाऽपि हिंसादि-पापस्थानानि जन्मिनाम् ॥७॥

## प्रथमपापस्थानकालोचना

तत्र प्राणातिपाताऽख्यं, पापस्थानकमग्रिमम् ।
सर्वदोषकरं सर्व-गुणहानिकरं मतम् ॥८॥

त्रसस्थावरजीवानां, प्राणानां यद्वियोजनम् ।
प्रमत्तयोगतः स्यात्तद्-हिंसा शास्त्रे निरूप्यते ॥९॥

विरम्यैतादृशप्राणा-तिपाताद् व्रतमाचरन् ।
दयापरो भवेदात्मा, ह्येतद् धर्मप्रयोजनम् ॥१०॥

एक-द्वि-त्रि-चतुः-पञ्चे-न्द्रियादिप्राणिनो मया ।
भवेऽस्मिन् वा पुराऽज्ञानाद्, भवेष्वन्येषु केषुचित् ॥११॥

ये ये विराधिताः सर्वा-स्तानहं क्षमयाम्यथ ।
तद्धिंसाजनितं भूया-न्मिथ्या मे दुष्कृतं प्रभो ! ॥१२॥

## द्वितीयपापस्थानकालोचना

असत्याख्यं द्वितीयं च, पापस्थानकमुच्यते ।
हास्य-लोभ-भय-क्रोधै-र्मृषोक्तिं चक्षते जनाः ॥१३॥

जायतेऽसत्यतो वैरं, सन्तापश्च प्रवर्धते ।
बहून्यन्यानि पापानि, प्रभवन्ति मृषोक्तितः ॥१४॥

सकृदुक्तमसत्यं हा !, सत्यापयितुमीहया ।
शतशो मानवोऽसत्यं, वक्तीति श्रूयते श्रुते ॥१५॥

असत्यं वचसां रोगः, परमं पदमापदाम् ।
नाऽसत्यवचनं तस्मात्, प्राणान्तेऽपि वदेत्सुधीः ॥१६॥

भवेऽस्मिन् वा पुराऽज्ञानाद्, भवेष्वन्येषु केषुचित् ।
यदसत्यं मया प्रोक्तं, तन्मिथ्या मम जायताम् ॥१७॥

## तृतीयपापस्थानकालोचना

परेण नैव यद्दत्तं, गृह्यते द्रविणादिकम् ।
तृतीयं तद् भवेत्पाप-स्थानकं स्तेयनामकम् ॥१८॥

ग्रामे वा विजने वाऽपि, पतितं विस्मृतं तथा ।
तृणमात्रमपि प्राज्ञो, न गृहणीयात्कदाचन ॥१९॥

वधजन्यं भवेद् दुःखं क्षणमेकस्य देहिनः ।
प्रियापुत्रयुतस्य स्याद् यावज्जीवं धने हृते ॥२०॥

अत्र वधादिकं प्रेत्य, प्राप्यते येन दुर्गतिः ।
तत्स्तेयं वर्जयित्वा ज्ञो, नाऽऽप्नुयात्कः शमुत्तमम् ? ॥२१॥

भवेऽस्मिन् वा पुराऽज्ञानाद्, भवेष्वन्येषु केषुचित् ।
गृहीतं यन्मयाऽदत्तं, तन्मिथ्या मम जायताम् ॥२२॥

## चतुर्थपापस्थानकालोचना

मैथुनाख्यं तथा तुर्यं, पापस्थानकमाविलम् ।
यदाचर्य जनो विश्वे, प्रशंसां लभते नहि ॥२३॥

बुद्धिर्हि क्रमशो येन, सच्छिद्रघटवारिवत् ।
हीयते तत्कथं धीरः, प्रतिषेवेत मैथुनम् ॥२४॥

एकेयं विषयासक्ति-र्गुणेष्वन्येषु सत्स्वपि ।
काणकपर्दिकातुल्यं, विधत्ते मनुजं खलु ॥२५॥

शूरोऽपि ज्ञातशास्त्रोऽपि, जनो यस्य वशंगतः ।
वीर्यज्ञानविहीनः स्यात्, तदब्रह्म न भद्रकृत् ॥२६॥

विषयाख्यविषध्वस्तो, मनोवाक्कर्मभिर्भृशम् ।
यदकार्षमहं पापं, तन्मिथ्या मम जायताम् ॥२७॥

## पञ्चमपापस्थानकालोचना

धन-धान्य-सुवर्णादौ, ममताबुद्धिलक्षणम् ।
परिग्रहाभिधं पाप-स्थानकं पञ्चमं मतम् ॥२८॥

परिग्रहग्रहाविष्टः, सत्स्वप्यर्थेषु भूरिषु ।
मनागप्येति नो शान्तिं, भ्राम्यतीतस्ततो भुवि ॥२९॥

दुनोत्यसंशयं विश्व-मपूर्वोऽयं ग्रहोऽशुभः ।
सन्तोषमन्त्रजापेन, तच्छान्तिर्जायते ध्रुवम् ॥३०॥

इन्धनैर्नाऽनलो नैव, नदीभिः पूर्यतेऽम्बुधिः ।
परिग्रहैस्तथा जीवो, न तृप्यति कदाचन ॥३१॥

गृहीत्वाऽनुज्झिता ये ये, विधिपूर्वं परिग्रहाः ।
तज्जन्यं दुष्कृतं सर्वं, मिथ्या मे जायतां प्रभो ! ॥३२॥

## षष्ठपापस्थानकालोचना

षष्ठं क्रोधाभिधं पाप-स्थानकं शमसौख्यहृत् ।
विपाकविरसं सिद्ध-प्राय:कार्यस्य नाशकम् ॥३३॥

क्रोध उत्पद्यमानः स्वं, पूर्वं दहति वह्निवत् ।
अभावे शमनीरस्य, परान् प्रज्वालयेदपि ॥३४॥

उत्कृष्टतपसा जीवो, यत् पूर्वकोटिवत्सरैः ।
उपार्जयति पुण्यं तत्, क्रोधान्नाशयति क्षणात् ॥३५॥

चारित्रभाजनं विज्ञं, त्यजन्ति क्रोधिनं जनाः ।
मणिना भूषितं सर्पं, केऽपि रक्षन्ति नाऽऽलये ॥३६॥

यत्किञ्चिद् दुष्कृतं पूर्वं, क्रोधेनोपार्जितं मया ।
मनसा कर्मणा वाचा, तत् त्रिधा क्षमयाम्यहम् ॥३७॥

## सप्तमपापस्थानकालोचना

मानाख्यं सप्तमं पाप-स्थानकं विनयापहम् ।
शैलस्तम्भोपमं येन, स्तब्धो भवति मानवः ॥३८॥

स्तब्धत्वान्न विधत्ते स, गुरुशुश्रूषणं परम् ।
शुश्रूषाभावतो जातु, श्रुतलाभः कथं भवेत् ! ॥३९॥

श्रुताभावान्न विरति-रविरत्या न संवरः ।
असंवरात्तपो नैव, निर्जरा न तपो विना ॥४०॥

विना निर्जरया नैव, ह्याक्रियत्वं प्रजायते ।
अभावे चाऽक्रियत्वस्य, नाऽयोगित्वभवक्षयौ ॥४१॥

मानेनैतादृशा पूर्वं, भवभ्रमणहेतुना ।
यद् दुष्कृतं मया बद्धं, तत् त्रिधा क्षमयाम्यहम् ॥४२॥

## अष्टमपापस्थानकालोचना

सर्वानर्थप्रसूर्माया, पापस्थानकमष्टमम् ।
बहिर्या रम्यरूपाऽपि, करालाऽभ्यन्तरे भृशम् ॥४३॥

अपराधमकुर्वाणो, गुणयुक्तोऽपि मायिकः ।
सर्पवन्नहि विश्वास-भाजनं जातु जायते ॥४४॥

रिपुभावं वहन् क्रोधी, प्रशस्तः प्रकटं न तु ।
मायी मित्रस्वरूपेण, शत्रुकार्यं करोति यः ॥४५॥

श्रीमल्लेः प्राग्भवे बद्ध-तीर्थकृन्नामकर्मणः ।
अपि स्त्रीत्वमभूत् तत्र, को हेतुर्मायया विना ॥४६॥

भवेऽस्मिन् यत् पुरा माया-वशादन्यभवेषु वा ।
उपार्जितं मया पापं, तन्मिथ्या मम जायताम् ॥४७॥

## नवमपापस्थानकालोचना

पापस्थानकमादिष्टं, नवमं लोभनामकम् ।
सर्वदा सर्वजन्तूनां, यत्परं प्रीतिकारणम् ॥४८॥

यन्मुखे पतितः प्राणी, चक्री वा वासवोऽपि वा ।
प्राप्तलोकत्रयैश्वर्यः, सुखी न क्षणमप्यहो ? ॥४९॥

अयं शराववन्मूले, लघुः पश्चान्महत्तरः ।
न सन्तोषं विना केऽपि, तं जना जेतुमीशते ॥५०॥

स्वयम्भूरमणाम्भोधिं, देवास्तरितुमीश्वराः ।
तेऽपि लोभाम्बुधिं नैव, कथञ्चित्तरितुं क्षमाः ॥५१॥

अर्जितं यन्मया पूर्वं, लोभेन दुष्कृतं हि तत् ।
मिथ्या कुर्वे त्रिधा पीत-सन्तोषपरमामृतः ॥५२॥

## दशमपापस्थानकालोचना

रागाख्यं दशमं पाप-स्थानकं बलवत्तरम् ।
संसारे यद्वशा जीवाः, पर्यटन्ति भवाद् भवम् ॥५३॥

अयमेव हि सर्वासा-मापदां मूलकारणम् ।
प्राप्नुयाद् दुःखकणिका-मस्याऽभावे कथं नरः ? ॥५४॥

निर्वर्णां दन्तुरां कुब्जा-मवटीटां च वामनाम् ।
रागवान् मनुते नारीं, रतिरूपातिशायिनीम् ॥५५॥

विरागमार्गगान् पान्थान्, प्रच्छन्नोऽयं मलिम्लुचः ।
भटैर्विषयरागाद्यै-र्निःशङ्कं खलु लुण्टति ॥५६॥

फूत्कृत्याऽऽखुरिवाऽऽत्मानं, विदश्य यस्तुदत्यरम् ।
तद् रागजनितं पापं, मिथ्या कुर्वे पुनः पुनः ॥५७॥

## एकादशपापस्थानकालोचना

एकादशमतीवोग्रं, पापस्थानकमीरितम् ।
द्वेषाख्यं मुक्तिपूर्द्वार-परिघं प्रीतिनाशकम् ॥५८॥

चित्रशाला यथा रम्या, भवेद् धूमेन धूसरा ।
तथा द्वेषेण निन्द्यं स्या-च्छुचि संयमजीवनम् ॥५९॥

कृतं तपश्चिरं चीर्णं, चारित्रं च गुणावहम् ।
तदैव स्याद् यदा चित्तं, न दष्टं द्वेषभोगिना ॥६०॥

सुखसाधनयुक्तोऽपि, यत्सद्भावान्नरो नहि ।
क्षणमप्याप्नुते शान्तिं, तं द्वेषं ज्ञः कथं वहेत् ? ॥६१॥

द्वेषेणोपार्जितं पापं, यन्मया पूर्वजन्मसु ।
तत्सर्वं मनसा वाचा, कर्मणा विदधाम्यसत् ॥६२॥

## द्वादशपापस्थानकालोचना

द्वादशं कथितं पाप-स्थानकं कलहाभिधम् ।
दु:खानां कटु मूलं यत्, ख्यातं सङ्गरकारणम् ॥६३॥

कलहो नैव कर्तव्य:, कर्तव्यश्च निजात्मना ।
दुरन्तकलहव्याधे-र्मौनमुत्तममौषधम् ॥६४॥

परस्य दुर्वच: श्रुत्वा, प्रत्युत्तरति रोषत: ।
तन्निशम्य वदेत्सोऽपी-त्येवं स्यात्तत्परम्परा ॥६५॥

यत्राऽस्ति कलहस्तत्र, न श्रीर्वसति कर्हिचित् ।
श्रामण्यं चाऽपि विफलं, साधो: कलहकारिण: ॥६६॥

यदर्जितं मया पापं, भवेऽत्राऽन्यभवेषु वा ।
कलहेन त्रिधा सर्वं, तदद्य विदधे मृषा ॥६७॥

## त्रयोदशपापस्थानकालोचना-

त्रयोदशं समाख्यात-मभ्याख्यानाभिधं त्वधम् ।
समुल्लसद्विकारं तद्, दूरीकुर्याद् विदूरत: ॥६८॥

असत: परदोषान् यो, वक्ति मुग्धमतिर्जन: ।
सेह लाघवमासाद्य, प्रेत्य स्याद् दु:खभाजनम् ॥६९॥

सन्तोऽपि परदोषा न, वक्तव्या इति सत्स्थिति: ।
तेषामप्यसतां वक्तु-र्दुर्वृत्तस्य तु का कथा ॥७०॥

श्रुत्वा जिनवचश्चित्तं, चेद् भवेत् साम्यवासितम् ।
न परस्याऽसतो दोषां-स्तदा जातु वदेत् सुधी: ॥७१॥

अभ्याख्यानेन यद् बद्धं, दुष्कृतं पूर्वजन्मसु ।
कुर्वे मृषा त्रिधा नाथ !, तत्त्वदाराधनापर: ॥७२॥

## चतुर्दशपापस्थानकालोचना

चतुर्दशं परं पाप-स्थानं पैशुन्यमीरितम् ।
परोक्षे परदोषाणा-मुक्तिः पैशुन्यमुच्यते ॥७३॥

सत्कृतोऽपि खलः कामं, पिशुनत्वं जहाति न ।
ततस्तु श्वा वरो भक्ष्य-मात्रेण वशमेति यः ॥७४॥

पयःप्रक्षालितः काको, यथा याति न शुभ्रताम् ।
नैकशिक्षोक्तिभिस्तद्वद्, दुष्टो न सुजनो भवेत् ॥७५॥

निम्बोऽमृतेन संसिक्तो, माधुर्यं जातु प्राप्नुयात् ।
न खलो वचनैः स्निग्धैः, सौजन्यं मानितो मुहुः ॥७६॥

पैशुन्याचरणैर्बद्धं, यत्पापं पूर्वजन्मसु ।
मनसा कर्मणा वाचा, तत्सर्वं विदधे मृषा ॥७७॥

## पञ्चदशपापस्थानकालोचना

समाख्यातं पञ्चदशं, रत्यरत्याख्यकं परम् ।
पापस्थानं यतश्चैते, संयुक्ते तिष्ठतः सदा ॥७८॥

किञ्चिद्धेतू रतिर्यत्रा-ऽरतिस्तत्राऽन्यहेतुका ।
स्यादेवेति मतं पाप-स्थानमेकमिदं श्रुते ॥७९॥

रतिर्वाऽरतिरित्येषा, केवला चित्तकल्पना ।
विपर्ययोऽनयोर्लोके, दृश्येत कथमन्यथा ॥८०॥

रत्यरत्यनलं प्राप्य, यदाऽयं चित्तपारदः ।
नश्येन्नहि तदाऽनन्त-सौख्यस्वर्णाय जायते ॥८१॥

रत्याऽरत्याऽपि यत्पूर्वं, पापं बद्धं मया प्रभो !।
मनसा कर्मणा वाचा, तन्मिथ्या विदधे समम् ॥८२॥

## षोडशपापस्थानकालोचना

उक्तं षोडशकं पाप-स्थानकं दुःखकारणम् ।
नेच्छेत् परपरीवादं, कदाचिन्मनसा सुधीः ॥८३॥

परनिन्दारसो नून-मतिशेते रसान् समान् ।
कामं यत्पानतो मर्त्यो, न श्राम्यति न तृप्यति ॥८४॥

तपस्त्यागादिकं याव-ज्जीवं नश्यत्यनुष्ठितम् ।
यत्करणात्कथं प्राज्ञोऽ-न्यनिन्दां तां समाचरेत् ? ॥८५॥

कर्मजन्यं च जीवानां, तारतम्यं विदन् बुधः ।
गुणदृष्ट्या जगत् पश्यन्, कथं निन्दापरो भवेत् ॥८६॥

विधाय परनिन्दां यद्, भवेऽत्राऽन्यभवेषु वा ।
उपार्जितं मया पापं, तत्सर्वं मृषयाम्यहम् ॥८७॥

## सप्तदशपापस्थानकालोचना

प्रोक्तं मायामृषावाद-पापस्थानकमाविलम् ।
सप्तदशकमेतज्ज्ञै-स्त्यक्तव्यं भूतिमिच्छुभिः ॥८८॥

एका मायाऽप्यनर्थाय, भृशं भवति देहिनाम् ।
मृषावादेन युक्ता चे-त्तदाऽनर्थस्य का कथा ॥८९॥

मायायुक्तो मृषावादी, बकवद् भ्रान्तिकारकः ।
मुखे मिष्टः स चित्ते तु, विषदिग्धो भवेद् घनम् ॥९०॥

विषेण संस्कृता यद्वत्, प्राणघ्नी कटुतुम्बिका ।
तद्वन्मायी मृषावादी, विश्वस्तं हन्ति सर्वशः ॥९१॥

पापं मायामृषावादै-र्बद्धं यत्पूर्वजन्मसु ।
मनसा कर्मणा वाचा, त्रिधा तद् विदधे मृषा ॥९२॥

मायामिथ्यात्वशल्याख्यं, पापस्थानकमन्तिमम् ।
प्रोक्तं सर्वेभ्य एवेदं, पापस्थानेभ्य उन्नतम् ॥९३॥

मिथ्यात्वं चेद् वृथा सर्वं, चारित्राराधनादिकम् ।
अपि किञ्चित्फलायाऽलं, न स्यात्तप्तं चिरं तपः ॥९४॥

इदं हि परमं शस्त्रं, परः शत्रुः परं तमः ।
दुःखं दैन्यं च दौर्भाग्यं, दारिद्रयं चाऽप्यदः परम् ॥९५॥

यथा शस्त्री बलिष्ठोऽपि, नाऽन्धः परचमूं जयेत् ।
न मिथ्यादृक् तथा त्यागी, कुरुते कर्मनिर्जराम् ॥९६॥

एकविंशतिमिथ्यात्वं, त्यक्त्वा यो गुरुमर्चयेत् ।
सम्यक्त्वशालिनस्तस्य, कृतं तपोव्रतादिकम् ॥९७॥

येनाऽद्यावधि संसारे, जन्मरुङ्मृत्युभीषणे ।
भ्रामं भ्रामं न निर्विण्ण-स्तन्मिथ्यात्वं त्यजाम्यहम् ॥९८॥

मनसा कर्मणा वाचा, मिथ्यात्वप्रेरितेन यत् ।
भवे भवे कृतं पापं, तन्मुधा मम जायताम् ॥९९॥

अष्टादशैवमालोच्य, पापस्थानानि भावतः ।
जीवा निहत्य कर्माणि, प्राप्नुयुः परमं पदम् ॥१००॥

## अथ प्रशस्तिः

श्रीतीर्थनाथैरपि पूजिताय, भव्यैर्नितान्तं किल कामिताय ।
सर्वातिगानन्दसुसाधनाय, नमो नमः श्रीजिनशासनाय ॥१॥

स गोडिपार्श्वो जयताज्जगत्यां, सर्वार्थसंसिद्धिसुरद्रुकल्पः ।
समुल्लसद्भक्तिभरेण भव्या, नित्यं विभुं यं परिपूजयन्ति ॥२॥

शरच्छशाङ्कांशुसमुज्ज्वलेन, येन स्ववृत्तेन दिशो दशाऽपि ।
विद्योतिताः सूरिपुरन्दरः स, बभूव पूज्यो गुरुनेमिसूरिः ॥३॥

तदीयपट्टोदयशैलसूरः, सूरिः समस्ताऽऽगमसारवेदी ।
बभूव नाम्ना कृतिनाऽमृतश्च, पीयूषपाणिः कृतिकीर्तनीयः ॥४॥

श्रीदेवसूरिर्हि तदीयपट्टं, निजावदाताचरणेन सम्यक् ।
चकासयत्यार्हततीर्थमिद्धं, प्रभावयन् वत्सलतामहाब्धिः ॥५॥

तच्छिष्यहेमचन्द्रः, शब्दन्यायादिशास्त्रकृतयत्नः ।
वाचकपदभृदरचयद्, वरमिदमालोचनाशतकम् ॥६॥

यो निजगुरुनिश्रायां, सहितः प्रद्युम्नहीरविजयाभ्याम् ।
स्वानुजतातमुनिभ्यां, मुम्बापुर्यां समृद्धायाम् ॥७॥

श्रीगोडीजी-जैनो-पाश्रयमध्ये हि भूरिविज्ञप्त्या ।
अकरोत् चातुर्मासीं, विधुगुप्तिनभोऽक्षिमित ( २०३१ ) वर्षे ॥८॥

गुरुवरवचःप्रबुद्धा, भव्याश्चक्रुस्तदाऽतिहर्षेण ।
विविधं व्रतनियमतपः-क्रियादि विपुलार्थसद्व्ययतः ॥९॥

पूज्याचार्यवरेण्या, मेरुप्रभसूरयस्तदा रेजुः ।
आदीश्वरजैनधर्म-शालायां परिकरेण युताः ॥१०॥

❀ ❀ ❀

## १८. न्याय विशारद-न्यायाचार्य महामहोपाध्याय श्री यशोविजयगणिवराणां गुणानुवादस्तुतिः

-आ. विजय हेमचन्द्रसूरिः ।

(आर्यावृत्तम्)

भक्त्या तं प्रणमामो,
वाचकवर्य्यं यशोविजयगणिनम् ।
जिनशासनाम्बरं यो,
भासितवान् स्वीयवाग्द्युतिभिः ॥१॥

देशे गूर्जर संज्ञे,
ग्रामं 'कन्होडु' नामकं रम्यम् ।
यो निजजनुषा धीमान्,
पावितवान् शस्यतमचरितः ॥२॥

सोहागदे-र्यदीया,
जननी नारायणश्च यस्य पिता ।
धन्यौ तौ संसारे,
यौ सुषुवाते सुतं विरलम् ॥३॥

पण्डितनयविजयाऽऽह्वो,
गुणगणनिलयोऽभवद्‌यदीयगुरुः ।
यद्वचसा प्रतिबुद्धोऽ-
ग्रहणाद् बाल्ये स चारित्रम् ॥४॥

राजनगर वास्तव्यो,
धन्यो धनजी-सुराभिधो धनिकः ।
यत्प्रेरितो हि काश्यां,
गतो गुरुः शिष्यजसकलितः ॥५॥

ऐँङ्कार-मन्त्रजापा-
दुपगङ्गं भारतीं समाराध्य ।
तस्याः स हि वरमापत्,
कवित्ववाञ्छासुरद्रुसमम् ॥६॥

भट्टाचार्यसमीपे,
चिन्तामण्यादिकं स समधीत्य ।
षड्दर्शनमर्मज्ञो,
विधविधविद्यासु विज्जातः ॥७॥

न्यायविशारद-न्याया-
च्चार्योपाधिं हि सदसि धीराणाम् ।
वादे विजयप्राप्त्या,
प्रीताः प्राज्ञा ददुर्यस्मै ॥८॥

कः खलु विषयोऽवन्यां,
का वा भाषास्ति यत्र पूज्यानाम् ।
न प्रावर्तत वाणी,
गद्ये पद्ये च निर्बाधा ॥९॥

प्रोन्मध्य शास्त्रसिन्धुं,
निजमतिमन्थेन धीरधुर्य्येण ।
रचिता विविधाः कृतयो,
मुकुटायन्तेऽधुना विश्वे ॥१०॥

यद्विरचित वैराग्य-
कल्पलताऽध्यात्मसारमुख्यकृतिम् ।
श्रुत्वा च ज्ञानसार-
मधियायात् को न वैराग्यम् ? ॥११॥

दर्भावतीपुरे य-
श्चिरतरमाराध्य संयमं वर्य्यम् ।
स्वर्यातः ससमाधि-
र्जयताद् बुधसत्तमः स सदा ॥१२॥

इति वाचकावतंसं,
मुनिजनमान्यं यशोविजयगणिनम् ।
नेम्यमृतदेवशिष्यः,
स्तुतवान्नु हेमचन्द्राऽऽह्वः ॥१३॥

## पूर्तिः

गतवानिति कः कथयति,
जीवति योऽद्यापि सद्यशःकायैः ।
प्रतिपातः प्रतिचैत्यं,
(गीयन्ते) श्रूयन्ते यस्य स्तवनानि ॥१॥

यत्-श्रुतवार्धि दृष्ट्वा,
कृतिनो-ऽपि भवन्ति विस्मयग्रस्ताः ।
कथमेकाकी कृतवान् ?
वद-किमसाध्यं सरस्वत्याः ॥२॥

❀ ❀ ❀

## १९. •श्रीनेमिसौभाग्यमहाकाव्यम् ।

### (प्रथमः सर्गः)

श्रेयःश्रेणीजननं, जितबाह्यान्तर्द्विषं विभुं वीरम् ।
अस्या अवसर्पिण्याः, स्तुवे जिनं तं चतुर्विंशम् ॥१॥ (आर्यावृतम्)

श्रीमद्गौतमगणभृन्मुख्याः शिष्या यदीयपदकमलम् ।
नित्यं संसेवन्ते, जयति स चरमो जिनाधीशः ॥२॥

तत्पट्टे सञ्जातः, पञ्चमगणभृत्सुधर्मपुण्याऽऽढ्यः ।
त्रिपदीमाप्य जिनेशा-ज्जग्रन्थे द्वादशाङ्गीं यः ॥३॥

तत्पट्टेऽजनि विदितो, जम्बूस्वामीह केवली चरमः ।
प्रव्रजितोऽष्टौ कन्या, हित्वा कोटिञ्च नवनवतिम् ॥४॥

प्रभवस्तदीयपट्टे, प्रभावकलितोऽजनिष्ट सद्धुर्यः ।
जम्बूगृहादनर्घं, रत्नत्रितयं हृतं येन ॥५॥

श्रीशय्यम्भवसूरि-स्तत्पट्टेऽजायत प्रवरचरितः ।
दशवैकालिकसूत्रं, योऽरचयत् स्वसुतमनकार्थम् ॥६॥

सूरियशोभद्राख्य-स्तत्पट्टे तुङ्गियायनीयोऽभूत् ।
येनाऽऽत्ता प्रव्रज्या, द्वाविंशे हायने वयसः ॥७॥

तत्पट्टे संभूति-विजयो जातोऽथ भद्रबाहुश्च ।
विहिताऽऽवश्यकमुख्यागमनिर्युक्तिर्वरा येन ॥८॥

श्रीस्थूलभद्रनामा, चरमः श्रुतकेवली ततो जातः ।
योऽबोधयच्च कोशां, निवसन् तच्चित्रशालायाम् ॥९॥

आर्यमहागिरिसंज्ञो, योगिप्रवरोऽजनिष्ट तत्पट्टे ।
अपि जिनकल्पोच्छेदे, जिनकल्पतुलां दधौ धीरः ॥१०॥

• शासनसम्राजां श्रीविजयनेमिसूरीश्वराणां जीवनचरितवर्णनात्मकमिदं महाकाव्यं पूज्याचार्यैः श्रीविजयहेमचन्द्रसूरिभिः प्रायश्चत्वारिंशतो वर्षेभ्यः पूर्वं (यदा ते पंन्यासश्रीहेमचन्द्रविजयगणिन आसंस्तदा) विरचितमस्ति । (नन्दनवन कल्पतरुः)

श्रीमानार्यसुहस्ति-स्तद्गुरुबन्धुः प्रभावको जातः ।
नृपसम्प्रतिमुपदिश्य, प्राभावयदार्हतं धर्मम् ॥११॥

जातौ शिष्यप्रवरौ कोटीमितसूरिमन्त्रजपपारौ ।
सुस्थित-सुप्रतिबुद्धौ, यदुपज्ञः कौटिकाख्यगणः ॥१२॥

तत्पट्टे सञ्जातो नाम्ना श्रीइन्द्रदिन्नसूरीशः ।
श्रीदिन्नाभिधसूरि-स्तदीयपट्टेऽभवद् विज्ञः ॥१३॥

तत्पट्टाम्बुधिचन्द्रो, जातिस्मृतिमानमानसामर्थ्यः ।
श्रीसिंहगिरिर्जातः, सूरीशोऽनर्ध्यगुणकलितः ॥१४॥

तच्छिष्यो वज्राख्यः, समजनि दशपूर्ववित्प्रथितवृत्तः ।
अक्षुब्धो नृपसंसदि, समगृह्णाद्यो रजोहरणम् ॥१५॥

प्रादादमरो यस्मै, सन्तुष्टो व्योमगामिनीं विद्याम् ।
यत उद्भूता शाखा, सम्प्रत्यपि राजते वज्री ॥१६॥ (युग्मम्)

श्रीवज्रसेननामा, तदीयपट्टे रराज सूरीशः ।
सोपारके विषान्ना-शनान्न्यवारीज्जनौघं यः ॥१७॥

तत्पट्टे चन्द्राह्वः, सूरिर्जातो हि चन्द्र इव सौम्यः ।
यस्माद् गणस्य नाम, प्रवर्तितं चन्द्रगच्छ इति ॥१८॥

सामन्तभद्रसूरि-स्तत्पट्टमलञ्चकार विरतिरतिः ।
वनवासीति चतुर्थं, गणस्य नामाऽभवद् यस्मात् ॥१९॥

श्रीवृद्धदेवसूरिः, समजनि गुणरत्नरोहणस्तस्मात् ।
प्रातिष्ठिपत् प्रभुं यो, वीरं कोरण्टके ग्रामे ॥२०॥

श्रीप्रद्योतनसूरिः, प्रद्योतनवत्तदीयपट्टेऽभूत् ।
यो निजगवाऽनुपमया, विश्वं प्राबोधयन्निखिलम् ॥२१॥

तत्पट्टोदयशैलं, द्योतितवान् मानदेवसूरीशः ।
यो निजबुद्धिमहिम्ना, सुरगुरुमपि सञ्जिगाय द्राक् ॥२२॥

यत्पददानावसरे, स्कन्धगते वीक्ष्य शारदाकमले ।
चारित्रच्युतिशङ्का-शीलं मत्वा स्वगुरुवर्यम् ॥२३॥

यावज्जीवं विकृतीः, षट् प्रत्याख्याच्च भक्तकुलभिक्षाम् ।
पद्मा-जयादिदेव्यो, यत्परिचर्यां च सञ्चक्रुः ॥२४॥ (युग्मम्)

श्रीमानतुङ्गनामा, सूरिर्जातस्तदीयपट्टधरः ।
प्रतिबुबुधे नृपतिं यो, विरच्य भक्तामरं स्तोत्रम् ॥२५॥

श्रीमान् वीराचार्य्य-स्तदीयपट्टेऽजनिष्ट सूरीशः
श्रीनमिजिनप्रतिष्ठां, नागपुरे यो व्यधाद् वर्याम् ॥२६॥

श्रीजयदेवाभिख्य-स्तत्पट्टप्रभाकरोऽभवत्सूरिः ।
यो वादिनो व्यजैषी-न्निरूप्य जैनेन्द्रसिद्धान्तम् ॥२७॥

देवानन्दाभिधानः, सूरीशोऽभूत्तदीयसत्पट्टे ।
तत्पट्टे सूरीशो, विक्रमनामाऽभवत्पूज्यः ॥२८॥

सूरिस्तदीयपट्टे, श्रीनरसिंहः श्रुतार्णवो जातः ।
येन पुरे नरसिंहे, मांसं सन्त्याजितो यक्षः ॥२९॥

तत्पट्टोदधिजन्मा, समुद्रनामाऽजनिष्ट सूरीन्दुः ।
वशमकृत नागतीर्थं, विजित्य दिग्वाससो वादे ॥३०॥

प्रापाऽम्बिकामुखाद्यो, विस्मृतमपि सूरिमंत्रमिद्धतपाः ।
हरिभद्रसूरिमित्रं, स मानदेवस्ततो जातः ॥३१॥

विबुधप्रभसूरीशस्तदीयपट्टेऽजनिष्ट दृढधर्मः ।
तत्पट्टेऽजनि सूरिः, श्रीमान् पूज्यो जयानन्दः ॥३२॥

स श्रीरविप्रभाख्यः, सूरीशोऽजायताऽनवद्ययशाः ।
नड्डुलपुरे प्रतिष्ठां,चकार यो नेमिनाथविभोः ॥३३॥

तत्पट्टाम्भोधिविधुः, सूरियशोदेवसञ्ज्ञको जातः ।
प्रद्युम्नदेवनामा, सूरिस्तत्पट्टधारको जज्ञे ॥३४॥

तत्पदमलङ्करिष्णु-र्जातः श्रीमानदेवसूरीशः ।
उपधानविषयशास्त्रं, निर्मायाऽरीरमल्लोकान् ॥३५॥

तत्पट्टालङ्कारो, जातः श्रीविमलचन्द्रसूरीशः ।
यो हेमसिद्धिविद्यां, प्राप्तोऽजैषीत्परान् वादे ॥३६॥

तत्पट्टाम्बुजतरणिः, श्रीमानुद्योतनाभिधो जातः ।
अर्बुदगिरेरधस्तात्-टेलीपुरसीम्नि सङ्गत्य ॥३७॥

वटवृक्षाधो योऽष्टौ, सूरीन् प्रातिष्ठिपन्निजे पट्टे ।
तस्मादभूद्गणोऽयं नाम्ना वटगच्छशुभसञ्ज्ञः ॥३८॥

तत्राऽभवत्प्रशस्यः, सूरिः श्रीसर्वदेवनामा यः ।
प्रास्थापत्सुचन्द्र-प्रभबिम्बं रामसैन्यपुरे ॥३९॥

गौतमगणधरवद्यस्तथाऽभवत्-शिष्यलब्धिसंपन्नः ।
श्रीकुङ्कुणं प्रधानं, प्रबोध्य किल दीक्षयाञ्चक्रे ॥४०॥ (युग्मम्)

श्रीदेवसूरिनामा, जातस्तत्पट्टपूर्वदिग्भानुः ।
'रूपश्री'रिति बिरुदं, नृपदत्तं यो दधौ रुचिरम् ॥४१॥

नाम्ना श्रीसर्वदेव-सूरिः प्राभासयत्तदीयपदम् ।
शिष्ययशोभद्रमुखा-नकृताष्टौ सूरिपदभाजः ॥४२॥

तत्पट्टकमलकैरव-विकासकृद्रविविधू विरेजाते ।
सूरियशोभद्राख्यः, तथाऽपरो नेमिचन्द्र इति ॥४३॥

तत्पट्टकमलमिहिरः, श्रीमुनिचन्द्राभिधोऽभवत्सूरिः ।
सौवीरमात्रपायी, प्रत्याचख्यौ स षट् विकृतीः ॥४४॥

हरिभद्रसूरिरचिताः, कृतयोऽनेकान्तजयपताकाद्याः ।
तार्किकवर्य्येण येन, विहिताः सुखबोधवृत्तियुताः ॥४५॥

सूरिरजितदेवाख्यः, तत्पट्टं शोभयाञ्चकार भृशम् ।
तद्गुरुबन्धुर्वादी, जितकुमुदो देवसूरिरभूत् ॥४६॥

तत्पदशोभाकरणो, जातः श्रीविजयसिंहसूरीशः ।
सोमप्रभमणिरत्नौ, सूरीशौ तत्पदेऽभवताम् ॥४७॥

मणिरत्नसूरिपट्टं, द्योतितवान्, सूरिराट् जगच्चन्द्रः ।
बुधदेवभद्रसङ्गात्, साधितवान् यः क्रियोद्धारम् ॥४८॥

द्वात्रिंशद्दिग्वसना-चार्यैर्वादं प्रतन्वता जयता ।
येनाऽऽपि भूपदत्तं, ह्याघाटे 'हीरला' बिरुदम् ॥४९॥

आजीवनमाचाम्ला-भिग्रहतः प्राप्तवान् तपाबिरुदम् ।
तत आरभ्य गणोऽयं, विख्यातोऽभूत् तपाभिधया ॥५०॥ (त्रिभिर्विशेषकम्)

सूरिर्देवेन्द्राह्वो, जज्ञे तत्पट्टभून्महाप्राज्ञः ।
श्राद्धदिनकृत्य-कर्मग्रन्थमुखा यश्चकार कृतीः ॥५१॥

तत्पट्टं दिनकरवद् व्यभासयद्धर्मघोषसूरीशः ।
पृथ्वीधरो यदुक्त्याऽभूषयदूर्वी जिनौकोभिः ॥५२॥

यश्च समर्थः सूरिर्योगिवरं दुर्जयं महामायम् ।
जित्वाऽवन्तीपुर्यां, श्रमणान् निरुपद्रवीचक्रे ॥५३॥ (युग्मम्)

श्रीसोमप्रभसूरिस्तत्पट्टाकाशभास्करो जज्ञे ।
यतिजीतकल्पसूत्र-प्रमुखान् जग्रन्थ यो ग्रन्थान् ॥५४॥

तत्पट्टशुक्तिमौक्तिक-आचार्यः सोमतिलकनामाऽभूत् ।
नव्यं क्षेत्रसमासं, प्राणैषीद्यः स्तवादि तथा ॥५५॥

तत्पट्टे सूरिवरो, देवादिमसुन्दरोऽजनिष्ट कृती ।
उदयीपाभिधयोगी, निजगुरुवचसा ववन्दे यम् ॥५६॥

तत्पदमबुभूषच्छ्री-सूरीशः सोमसुन्दरो नाम ।
योऽरचयद्योगशास्त्र-भाष्यमुखाः सत्कृतीर्बहुशः ॥५७॥

धरणाशाहविनिर्मित-चैत्ये त्रैलोक्यदीपके यश्च ।
प्रातिष्ठिपदादिनाथ-मुखमूर्ती राणके समहम् ॥५८॥ (युग्मम्)

श्रीमुनिसुन्दरसूरिं, स तु पट्टेऽस्थापयन्निजे गुरुराट् ।
बाल्येऽपि यो मनीषी, कृतवानवधानसाहस्रम् ॥५९॥

अष्टोत्तरशतकरमित-पत्रं बुधवेद्यचित्रकाव्यमयम् ।
निजगुरवे सम्प्रैषीद् य 'त्रिदशतरङ्गिणी' नाम ॥६०॥ (युग्मम्)

रत्नमिव साधुसङ्घे, तत्पट्टे रत्नशेखरो जातः ।
श्राद्धविधिसूत्रवृत्ति-प्रमुखैर्ग्रन्थैः श्रुतो भुवने ॥६१॥

श्रीस्तम्भनामतीर्थे, बाम्बीभट्टस्तदीयगुणतुष्टः ।
यस्मै सूरिवराया-ऽदाद् बालसरस्वतीबिरुदम् ॥६२॥

लक्ष्मीसागरसूरि-स्तदीयपट्टाब्धिवृद्धिकृच्चन्द्रः ।
अजनि, ततो बुधमान्यो, जातः श्रीसुमतिसाध्वभिधः ॥६३॥

सुविहितमुनिगणनेता, तत्पट्टेऽजायतोग्रचारित्रः ।
आनन्दविमलसूरिः कुमततमोवासराधीशः ॥६४॥

य उद्धधार श्रमणान्, संयमशैथिल्यपङ्कसंपृक्तान् ।
संत्याज्य मोहमाये, इभ्यान् प्राव्राजयन्नैकान् ॥६५॥

विद्यासागरगणिनं, षष्ठतपोऽभिग्रहं च सम्प्रेष्य ।
जेसलमेर्वादौ यः, प्राभावयदार्हतं धर्मम् ॥६६॥ (त्रिभिर्विशेषकम्)

तत्पट्टभूषणमणिर्जातः श्रीविजयदानसूरीशः ।
धनपतिरिव शिष्येभ्यो, योऽदात् श्रुतसम्पदं प्रीत्या ॥६७॥

गूर्जर-मालवमुख्ये, विहरन् विषये च यः प्रतापनिधिः ।
प्रातिष्ठिपज्जिनेशान्, स्तम्भनतीर्थादिसंस्थाने ॥६८॥

घृतवर्जपञ्चविकृती-र्यावज्जीवं त्यजन् महाधीरः ।
षष्ठाष्टमादिविविधं, सुदुस्तपं यस्तपस्तेपे ॥६९॥ (त्रिभिर्विशेषकम्)

तत्पदकुमुदसुधांशुः पूज्यः श्रीहीरविजयसूरिरभूत् ।
श्रीजिनशासनराज्ये, प्रवर्तितो नवयुगो येन ॥७०॥

यः प्रह्लादनपुर्यां प्राप्य जनिं त्रिविधु (१३) वर्षदेशीयः ।
आसादितजिनमार्गः, सूरिपदं जग्मिवान् [१]ऋक्षे ॥७१॥

लुङ्काधिपऋषिमेघः, शरभुज(२५)मुनिभिर्जगाम जिनदीक्षाम् ।
यत्सविधे निजमतमपि, दुर्गतिपातं विचिन्त्य रयात् ॥७२॥

षण्मासावधि यस्यो-पदेशतोऽकब्बरो नृपाधीशः ।
अकरोत्सदयोऽमारि-प्रवर्तनं सकलराज्येषु ॥७३॥

विहरन्ननेकदेशे, जिनधर्ममुपादिशन् जनान् यो हि ।
विहितविविधप्रतिष्ठः, शासनमुद्योतयामास ॥७४॥

जम्बूप्रज्ञप्तिवृत्ति-कर्तुर्मुनयो जगद्गुरोर्यस्य ।
आसन् द्विसहस्रमिताः, ज्ञानतपोरत्नवारिधयः ॥७५॥

नवषष्टितमे वर्षे, ह्युन्नायामाप देवलोकं यः ।
तत्स्थलकृतगुरुमन्दिर-महिमा प्रत्यक्ष एवाऽस्ति ॥७६॥

एतद्गुरोश्चरित्रं, वर्णितमेवाऽस्ति हीरसौभाग्ये ।
एवञ्च हीररासे, रम्ये च जगद्गुरोः काव्ये ॥७७॥ (अष्टभिःकुलकम्)

तत्पदमानसहंसो जातः श्रीविजयसेनसूरीशः ।
यो दानसूरिकरतो [२]ग्रहमितवर्षे ललौ दीक्षाम् ॥७८॥

प्रादादकबरसाहि-र्यस्मै 'काली-सरस्वती' बिरुदम् ।
विदितश्च यः 'सवाई-हीरविजयसूरि'रिति भुवने ॥७९॥

यत्संहतौ गुणिखनौ, पूज्या अष्टाऽभवन्नुपाध्यायाः ।
प्रज्ञांशाश्च शतोर्ध्वाः, मुनयो हि सहस्रयुग्ममिताः ॥८०॥

श्रीऋषभदासनामा, श्राद्धस्तच्छिष्यभावमापन्नः ।
यो निजकाव्येन्दुकरै-रदीपयद् भूतलं सकलम् ॥८१॥

---

१. ऋक्षे-सप्तविंशतिवर्षे, ऋक्षं नक्षत्रम्, तस्य सप्तविंशतिसङ्ख्यकत्वात् ।
२. नवमवर्षे इत्यर्थः ।

विदुषा येन महार्था:, सूक्तावल्यादयः कृता ग्रन्थाः ।
शतमर्था व्यरचि 'नमो-दुर्वारराग' सुपद्यस्य ॥८२॥

यत्सान्निध्येऽभूवन्-जिनप्रतिष्ठामहाः खपञ्च( ५० )मिताः ।
विजयप्रशस्तिकाव्ये, वर्णितमस्याऽस्ति सच्चरितम् ॥८३॥

स्वरिते यस्मिन् सूरौ, समभूत्सङ्घद्वयं तपागच्छे ।
श्रीदेवसूरनामा, तथाऽऽणसूराभिधानश्च ॥८४॥

श्रीविजयदेवसूरिर्गुरुरिव विज्ञो बभूव तत्पट्टे ।
यो निजजननीसहितो, व्रतमादाद्धायने नवमे ॥८५॥

यन्निरुपमगुणतुष्टः साहिजहाँगीरसंज्ञनृपवर्य्यः ।
प्रादात्प्रवचनसंसदि, यस्मै हि 'महातपा'बिरुदम् ॥८६॥

श्रीस्तम्भाभिधतीर्थे, यत्सूरिपदप्रदानपरममहे ।
श्रीमल्लसाधुमुख्यैः, [१]ख-शरसहस्त्रं धनं व्ययितम् ॥८७॥

यद्वचनामृतसिक्ता, राणकजगसिंहचित्तधर्मलता ।
सुषुवे जीवाहिंसा-गुरुभक्तिमुखानि सुफलानि ॥८८॥

प्रातिष्ठिपद् विशाला, यो जिनमूर्तीरनेकविषयेषु ।
सम्प्रत्यपि या भविनां, प्रमोदयन्ति द्रुतं चेतः ॥८९॥

निर्विकृतिं विकृतिं य-स्तत्याज समाञ्च भक्तगृहभिक्षाम् ।
आजीवनमुपयुक्तः, संयमयोगेषु सर्वेषु ॥९०॥

श्रीवीरविजयसंज्ञं, पण्डितवर्य्यं बिजापुरे नगरे ।
यो विधुखर्षिसुधांशौ, वर्षे पंन्यासमातेने ॥९१॥

उन्नाभिधानपुर्या-मष्टमभक्तो जगाम यः स्वर्गम् ।
देवानन्दाज्ज्ञेयं, तच्चरितं विजयदेवमाहात्म्यात् ॥९२॥ ( अ.कुलकम् )

---

१. पञ्चाशत्सहस्त्रम् ।

तत्पट्टकाननहरि-र्जातः श्रीविजयसिंहसूरीशः ।
दीक्षामासादितवान्, यो वयसो हायने दशमे ॥९३॥

विहरन् हिं मेदपाटे, मरुधरविषये च गूर्जरे देशे ।
समहं प्रस्थापितवान्, परःशता यो जिनप्रतिमाः ॥९४॥

सूरिपदमहो येषां, नगर इलादुर्गनाम्नि सञ्जातः ।
तस्मिन् सहजूश्राद्धो, भूरितरं व्ययितवान् वित्तम् ॥९५॥

श्रीसिंहे स्वर्गवति, गच्छाभ्युदयाय देवसूरीशः ।
कञ्चन सुयोग्यपुरुषं, नियोक्तुमैच्छत् स्वकीयपदे ॥९६॥

श्रीसूरिमन्त्रजापात्, प्रत्यक्षीभूय मन्त्रराजसुरः ।
श्रीवीरविजयनाम्नः, सूरिपदार्हत्वमाचष्ट ॥९७॥

तीर्थे श्रीगन्धारे, सङ्घीभूय प्रभूतपुरसङ्घैः ।
प्रारब्धे जिनचैत्ये, सहर्षमष्टाह्निकाख्यमहे ॥९८॥

गुरुदेवसूरिवर्य्योऽदात्सूरिपदं हि वीरविजयाय ।
उद्घोषितस्तदानीं, विजयप्रभसूरिरिति नाम्ना ॥९९॥

कृतसंस्कारो मणिरिव, भृशं दिदीपे स सूरिपदकलितः ।
जिनप्रतिष्ठाकृत्यैः प्राभावयदार्हतं धर्मम् ॥१००॥

श्रीसिंहसूरिपट्टे, पन्न्यासः सत्यविजयनामाऽभूत् ।
कृत्वा क्रियोद्धृतिं यः, शैथिल्यमपाकरोदुच्चैः ॥१०१॥

तत्समयेऽष्टावभव-न्नार्हतधर्मप्रभावका मुख्याः ।
यदुपकृतिं बहुमान्या, अधुना सर्वेऽपि मन्यन्ते ॥१०२॥ (युग्मम्)

योगिवरेण्यः श्रीमा-नानन्दघनो बभूव निजमग्नः ।
नृणामध्यात्मरुचिं, यत्स्तवन-पदानि पुष्यन्ति ॥१०३॥

वाचकवर्य्यो विनयः, शास्त्राम्बुधिपारगो द्वितीयोऽभूत् ।
आनन्दयन्ति विदुषः, सम्प्रत्यपि यत्कृताः कृतयः ॥१०४॥

शान्तसुधारसकाव्यं, सुबोधिका कल्पसूत्रवृत्तिश्च ।
लोकप्रकाशशास्त्रं, हैमीयप्रक्रिया लघ्वी ॥१०५॥

श्रीपालराजरासश्चैत्यस्तवनं विनयविलासश्च ।
कृत्वैतान् यो ग्रन्थान्, विद्वद्गणमाननीयोऽभूत् ॥१०६॥ (त्रिभिर्विशेषकम्)

महामहोपाध्यायो, जातः श्रीमद्यशोविजयनामा ।
जितवादो ज्ञसभायां, न्यायाचार्यत्वमापद् यः ॥१०७॥

उपगङ्गं स्तिमितो यः, समुपास्यैङ्कारजापतो वाणीम् ।
चिन्तामण्यादिनिखिल-शास्त्रेष्वपि दक्षतां लेभे ॥१०८॥

प्रवरविपश्चिद्गम्या, अध्यात्मन्यायमुख्यविषयेषु ।
यद्रचिताः सद्ग्रन्थाः परश्शताः शेखरायन्ते ॥१०९॥

अध्यात्मसारमाद्यं, वैराग्यकल्पलताभिधं ग्रन्थम् ।
को न विरज्येत भवा-दवगत्य ज्ञानसारञ्च ॥११०॥

निहितार्थशास्त्रवार्ता-समुच्चये विस्तृता कृता येन ।
प्रविरलबुधजनवेद्या, वृत्तिः स्याद्वादकल्पलता ॥१११॥

समताशतकं द्रव्या-दिमगुणपर्यायरासमालम्ब्य ।
असंस्कृतज्ञोऽपि जनो, जिनोक्ततत्त्वानि वेवेत्ति ॥११२॥

श्रीमान् लघुहरिभद्रः, कूर्चालसरस्वतीति यः ख्यातः ।
जयतात्स सर्वकालं, श्रुतिकेवलिकल्प इह भुवने ॥११३॥ (सप्तभिः कुलकम्)

तुर्यस्तेषु च पूज्यो, वाचकवर्य्यो हि मानविजयोऽभूत् ।
पुष्णाति प्रभुभक्तिं य-द्रचितस्तवनान्यनेकानि ॥११४॥

यतिगृहिधर्मनिरूपक आतेने धर्मसङ्ग्रहाभिख्यः ।
ग्रन्थो येन महार्थो, व्याडिविहितसङ्ग्रहप्रतिमः ॥११५॥

श्रीधीरविमलगणिनः, शिष्योऽभूज्ज्ञानविमलसूरीशः ।
योऽपूजयज्जिनेन्द्रं, स्तवनसुमैर्नवनवैर्नित्यम् ॥११६॥

य: श्रीपालचरित्रं, शतशः स्तवनानि सिद्धिगिरिराजः ।
व्यतनोच्चाऽऽनन्दघन-स्तवनचतुर्विंशतिस्तबकम् ॥११७॥ (युग्मम्)

श्रीउदयरत्ननामा, षष्ठोऽभूत्तेषु वाचकप्रष्ठः ।
य: कृत्वाऽनेककृती-र्बहूपकृतिमातनोल्लोके ॥११८॥

गूर्जरगिरि च 'शलोका'-रूपं विदितं ततान यः काव्यम् ।
श्रीनेमि-शालि-भरत-प्रमुखानुपमेयचरिताढ्यम् ॥११९॥ (युग्मम्)

श्रीमत्कृपाविजयबुध-शिष्यः श्रीमेघविजयनामाऽभूत् ।
वाचकवर्य्यो यत्कृत-कृतयः सम्प्रीणयन्ति ज्ञान् ॥१२०॥

देवानन्दाभ्युदयं, दिग्विजयं शान्तिनाथकाव्यञ्च ।
चन्द्रप्रभाभिधानं, व्याकरणं प्रक्रियाबद्धम् ॥१२१॥

मेघमहोदय-युक्ति-प्रबोधसंज्ञौ तथा महाग्रन्थौ ।
रचयाञ्चकार धीमानपि काव्यं सप्तसन्धानम् ॥१२२॥ (त्रिभिर्विशेषकम्)

गणिदेवचन्द्रनामा जातः श्रीदीपचन्द्रगणिशिष्यः ।
अपि खरतरगच्छीयः, समदृष्टिः सर्वगच्छेषु ॥१२३॥

नयचक्रागमसारौ, स्तवनानि, ध्यानदीपिकाप्रमुखान् ।
रचयित्वा यो ग्रन्थान्, कृतवानुपकारमतिविपुलम् ॥१२४॥

काले तस्मिन् धर्म-प्रभावका आसतैतदष्टमुखाः ।
ये निजशक्त्या शासन-मुच्चैः प्राभावयज्जैनम् ॥१२५॥ (त्रिभिर्विशेषकम्)

कर्पूरविजयनामाऽभूदथ गणिसत्यविजयपट्टधरः ।
श्रीप्रभसूरिर्यस्मै, पन्न्यासपदं ददौ समहम् ॥१२६॥

तत्पट्टाम्बरभानुर्जातः श्रीमान् क्षमाविजयनामा ।
प्रातिष्ठिपत्पृथिव्यां, यो जिनबिम्बानि सप्तशतम् ॥१२७॥

श्रीमज्जिनविजयाह्वः, पन्न्यासस्तदीयपट्टभूषोऽभूत् ।
स्तवनसुमैर्यद्ग्रथितै-र्भव्या जिनमर्चयन्त्यधुना ॥१२८॥

तत्पट्टभूषणोत्तम-उत्तमविजयाभिधो गणिर्जातः ।
गूर्जरसौराष्ट्रादौ बहुश्रुतो यो विजह्रेऽरम् ॥१२९॥

अष्टप्रकारपूजां, श्रीजिनविजयनिर्वाणरासञ्च ।
रचयित्वोपकृतिं यो, व्यदधादधुनातने लोके ॥१३०॥

तत्पट्टे पन्न्यासः, पूज्यः श्रीपद्मविजयनामाऽभूत् ।
श्रीधर्मसूरिकरतो, योऽभूत्पन्न्यासपदशाली ॥१३१॥

यः सकलागमसागर-पारीणः कविवरः क्रियानिष्ठः ।
ख्यातोऽभूदिह भुवने, पूज्यः परमद्रहाभिधया ॥१३२॥

उत्तमविजयकरास-स्तवन-स्तुतिदेववन्दनप्रभृतिः ।
यत्कृतकृतिसन्दोहोऽधुनाऽपि जनमानसं हरति ॥१३३॥ (त्रिभिर्विशेषकम्)

समजनि तदीयपट्टे पंन्यासो रूपविजयकविवर्यः ।
शर[५]वे[४]दागमपूजां, निजगुरुरासादि योऽरचयत् ॥१३४॥

पन्न्यासकीर्तिविजय-स्तत्पदमचकासयद् विततकीर्तिः ।
यद्गुरुबन्धव आसन्, कविमोहन-जीवविजयाद्याः ॥१३५॥

कस्तूरविजयनामा, पंन्यासस्तत्पदेऽजनिष्ट गणिः ।
येन जनुः स्वं सफलं, विदधे श्रामण्यपालनतः ॥१३६॥

श्रीमन्मणिविजयाह्वः, पंन्यासोऽलञ्चकार तत्पट्टम् ।
योऽप्रतिबद्धविहारी, प्रशान्तमूर्तिस्तपोनिष्ठः ॥१३७॥

तत्पट्टाब्जविकासी, पूज्यः श्रीबुद्धिविजयनामाऽभूत् ।
निःस्पृहशिरोमणिर्यो, योगिवरः स्वात्मसन्निष्ठः ॥१३८॥

अपि धृतढुण्ढकदीक्षो, दृष्ट्वा शत्रुञ्जयं महातीर्थम् ।
संवेगदीक्षितोऽभूत, सार्वागमविदितपरमार्थः ॥१३९॥

---

• ४५ आगमपूजाम् ।

ढुण्ढकसङ्घे येन, प्रवर्तितः शुद्धधर्मसन्देशः ।
कतिपयमुनयो जगृहुः, संवेगित्वं निजेन सह ॥१४०॥

नितरां भद्रप्रकृति-र्बहुसङ्ख्यकशिष्यवृन्दपरिकलितः ।
पञ्चनदीयो मुनिराट्, न हि केषां शंसनीयोऽभूत् ॥१४१॥ (चतुर्भिः कलापकम्)

तच्छिष्येषु प्रथमो, जातो गणिराजमुक्तिविजयाह्वः ।
प्रौढप्रभावनिलयो विदितोऽजनि मूलचन्द्र इति ॥१४२॥

संयमशैथिल्यं य-स्तत्कालीनं व्यपाचकार गणिः ।
साधूनां वर्यो यः, प्रस्थापितवान् श्रमणसङ्घे ॥१४३॥

केन्द्रस्थितसुरगुरुरिव, शासति तस्मिन् सुधर्मसाम्राज्यम् ।
सुस्थितमापुः सर्वा-ण्यपि धर्माङ्गानि सर्वत्र ॥१४४॥ (त्रिभिर्विशेषकम्)

सरलाशयो गुणाढ्यो गीतार्थो वृद्धिचन्द्रपुण्याख्यः ।
आसीदसौ द्वितीयः, संस्मारितपूर्वसत्पुरुषः ॥१४५॥

वैराग्यामृतवारिधि-रजनि तृतीयो हि नीतिविजयाह्वः ।
आनन्दविजयनामा, तुर्योऽभूच्चाऽपि सच्चरितः ॥१४६॥

श्रीमोतिविजयसंज्ञो, मुनिगणगण्यो हि पञ्चमो जातः ।
सूरिर्विजयानन्दः षष्ठोऽभून्न्यायपाथोधिः ॥१४७॥

आत्मनि सततं रमणादात्मोद्धाराय चोपदेष्टृत्वात् ।
वसुधायां ख्यातोऽभू-दात्मारामेति नाम्ना यः ॥१४८॥

यश्च दयानन्दमुखान्, विजित्य वादे यशो वरं लेभे ।
स्याद्वाददर्शनस्य, प्रवर्तितो येन जयघोषः ॥१४९॥

योऽज्ञानतिमिरभास्कर-तत्त्वादर्शादिसत्कृतीर्विदधे ।
पञ्चनदे कृतवाँश्च प्रभावनां जैनधर्मस्य ॥१५०॥ (चतुर्भि कलापकम्)

षष्ठाभिग्रहधारी, पञ्चनदीयो हि सप्तमो जातः ।
श्रीखान्तिविजयनामा, निजपरहितसाधनैकमनाः ॥१५१॥

अथ दानविजयनामा, विद्वद्वर्योऽष्टमो मुनिर्जातः ।
प्रविवेश यस्य धिषणा, कुशाग्रवन्न्यायसिद्धान्ते ॥१५२॥

इति बुद्धिविजयपट्टे, सञ्जातस्याऽस्य वृद्धिचन्द्रस्य ।
समभूवन्नव शिष्या, निधयो नव चक्रिणो हि यथा ॥१५३॥

आद्यस्तत्र हि केवल-विजयो धैर्यादिसद्गुणोपेतः ।
गीतार्थः पन्न्यासो, द्वितीयगम्भीरविजयाह्वः ॥१५४॥

पन्न्यासभाक् तृतीयो, धीरश्चतुरविजयाभिधो जातः ।
विद्वद्धुर्यस्तुर्यः, ख्यातः श्रीहेमविजयाख्यः ॥१५५॥

अथ पञ्चमो मनीषी, जातः श्रीविजयधर्मसूरीशः ।
यो गुरुभक्त्यनुभावा-दवाप्तवान् शास्त्रनैपुण्यम् ॥१५६॥

विद्वत्पर्षदि काशी-राजोऽदाद् वादजिष्णवे यस्मै ।
शास्त्रविशारद-जैनाचार्योपाधिं प्रणुन्नमनाः ॥१५७॥ (युग्मम्)

शासनसम्राट् श्रीमान् जातः षष्ठो हि नेमिसूरीशः ।
जिनशासनोदधिं यो, विधुरिव संवर्धयामास ॥१५८॥

श्रीप्रेमविजयनामा, मुनिवर्य्यः सप्तमो बभूव कृती ।
सन्मित्राध्यात्मरुचिः कर्पूराख्योऽष्टमो जज्ञे ॥१५९॥

सज्ज्ञानादित्रितया-राधनवशतो यथार्थयन्नाम ।
श्रीमानुत्तमविजयो, नवमो जातोऽनगारेशः ॥१६०॥

पट्टावलीयमिति वीरविभोर्वरेण्या,
दृब्धा मया तनुधियाऽपि गुरोः प्रसादात् ।
अन्तःस्थितोऽपि लघु तारयतीह वायुः,
किं नो दृतिं निरवधिं जलधिं जगत्याम् ॥१६१॥

॥ इति प्रथमः सर्गः ॥

# ( द्वितीयः सर्गः )

श्रीवृद्धिचन्द्रीयपदं पुनानो, योऽभूत् तपागच्छपतिर्मनीषी ।
श्रीनेमिसूरिर्महनीयकीर्तिर्व्यासेन तद्वृत्तमथोऽभिधास्ये ॥१॥ ( इन्द्रवज्रा )

( उपजातिः )

चरित्रमाकर्ण्य यदीयमिद्धं, बुधाः परं प्राप्नुवते प्रमोदम् ।
प्रकाशयन् श्रीजिनशासनाभ्रं, स तेजसा दीधितिराशिरासीत् ॥२॥

क्व तच्चरित्रं गुरुणाऽप्यवर्ण्यं, क्व मादृशो मन्दमतेः प्रयासः ।
स्तोतुं तथाऽपि व्यवसाययन्मां, तद्भक्तिरागो मुखरीकरोति ॥३॥

द्वीपेषु रम्यो वरिवर्ति जम्बूनामाऽद्भुतो द्वीपवरो धरित्र्याम् ।
जम्बूतरू रत्नमयो हि यत्र, विराजते शाश्वत इद्धरूपः ॥४॥

तत्राऽस्ति देशो भरताभिधानो, धर्मप्रधानः सुरलोकमानः ।
आर्या निवासेन विभूषयन्ति, यदेकदेशं महनीयवेशम् ॥५॥

तद्दक्षिणार्धस्थितमध्यखण्डे, सौराष्ट्रनामा विषयश्चकास्ति ।
चापल्यमुत्सृज्य निषेवते यं, रमाऽविरामं स्वरिव क्षमायाम् ॥६॥

शत्रुञ्जयो यत्र विभाति शैलः, संसारतापोपशमातपत्रः ।
सिद्धिं ययुर्यं शरणं प्रपद्य, विधूय कर्माणि जना अनन्ताः ॥७॥

गिरिस्तथा राजति रैवताद्रिः, यो भाति सोपानमिवेह मुक्तेः ।
ध्यानाग्निभस्मीकृतकर्मतूलो, यातः शिवं यत्र जिनेन्द्रनेमिः ॥८॥

पुण्यं तथा श्रीवलभीतिसंज्ञं, चिरन्तनं भाति पुरं प्रसिद्धम् ।
देवर्द्धिमुख्यैः किल सूरिवर्य्यैरकारि शास्त्रं लिपिबद्धमस्मिन् ॥९॥

अजाहरापार्श्वजिनेन्द्रतीर्थस्तालध्वजाद्रिर्नवखण्डपार्श्वः ।
कदम्बशैलः प्रथितः प्रभासो, यं देशमेते परिभूषयन्ति ॥१०॥

विराजते तत्र पुरी मनोज्ञा, सुदर्शनीया मधुमत्यभिख्या ।
यामद्भुतश्रीकलितां निरीक्ष्य, स्ववासकामं विबुधा न चक्रुः ॥११॥

इमां पुरीं प्राङ्नृपविक्रमार्को, ग्रामैर्युतां द्वादशभिर्न्ययच्छत् ।
प्रहर्षितः सद्वरभावडाय, सूनुस्तदीयोऽजनि जावडाह्वः ॥१२॥

अथैकदा विस्मयकृच्चरित्रः, समागतो वज्रमुनीश्वरोऽत्र ।
सुधाभमाकर्ण्य वचस्तदीयमुत्कोऽभवज्जन्मकृतार्थतायै ॥१३॥

तदीयवाचोल्लसितात्मभावः, शत्रुञ्जयं शाश्वततीर्थराजम् ।
उद्धृत्य भूरिद्रविणव्ययेन, चलाञ्चकाराऽप्यचलां स रायम् ॥१४॥ (त्रिभिर्विशेषकम्)

यस्यां प्रसूतो जगडूर्महेभ्यः, स्पर्द्धायमानो धनदेन ऋद्धया ।
कोटित्रयादप्यधिकं हिरण्यं, व्ययीचकाराऽव्ययशैलमुख्ये ॥१५॥

श्रीहेमचन्द्रान्वितभूमिपालः, कुमारपालः परमार्हतोऽत्र ।
सङ्घेन सङ्गम्य पुरीं स जीवत्-स्वामीशवीरं विभुमाववन्दे ॥१६॥

मन्त्रीश्वरो धर्मधनो हि तेजःपालद्वितीयो बुधवस्तुपालः ।
सङ्घाधिपः सन्नुपगत्य यत्र, ध्वजं समारोपितवान् स चैत्ये ॥१७॥

संवत्सरे षड्गगनाग्निचन्द्रे (१३०६), देवेन्द्र-चन्द्राभिधसूरिवर्यौ ।
संस्थापयामासतुरात्मदिष्ट्या, 'वाग्देवताकोष'मनन्यमत्र ॥१८॥

नगर्षिवेदेन्दुमिते हि वर्षे (१४७७), श्रीवैक्रमे सोत्सवमत्र सूरेः ।
पदं ददौ श्रीजिनसुन्दराय, सोमादिमः सुन्दरसूरिराजः ॥१९॥

यत्रोद्भवो राघवजीतनूजो, वाक्कीलकः श्रावकवीरचन्द्रः ।
गत्वा युरोपे जिनधर्मतत्त्वं, प्रावीविशत्तत्स्थितमानसेषु ॥२०॥

श्रीधर्मसूरिः किल यत्प्रसूतः, श्रीनेमिसूरेर्गुरुबन्धुवर्य्यः ।
संस्थाप्य यः संस्कृतपाठशालां, काश्यामनेकान् विदुषश्चकार ॥२१॥

दिवा विधेयेषु निमग्नचित्ताः, सायं जना यत्र पुरे वसन्तः ।
तरङ्गभङ्गोल्लसितं पयोधेर्निरीक्ष्य नैजं श्रममाक्षिपन्ति ॥२२॥

तालै रसालैरपि नारिकेलैरेलाभिधानैः कदलीविशेषैः ।
वातैः सुगन्धैः सरसैश्च यस्मिन्, ग्रीष्मेऽपि शैत्यानुभवं वहन्ति॥२३॥ (युग्मम्)

शीतैः पयोभिर्मधुरैश्च नादैः प्राधूर्णिकानां स्वपुरागतानाम् ।
निरन्तरं स्वागतमाचरन्ती, यत्राऽऽपगा राजति मालणाख्या ॥२४॥

चैत्ये वरे काचमणिप्रणीतैश्चित्रैरतिशोभितेऽत्र ।
मूर्तिः प्रभोर्वीरजिनस्य जीवत्स्वामीति नाम्ना प्रथिता चकास्ति ॥२५॥

समन्ततो भक्तजना असङ्ख्याः, समर्चनोपस्करशोभिहस्ताः ।
प्रातः समेत्याऽपचितिं नयन्तो यदाश्रयाज्जन्म कृतार्थयन्ति ॥२६॥

इभ्याः सदा सङ्गतबन्धुवर्गाः प्रतिश्रयं प्रातरुपेत्य यत्र ।
नत्वा मुनीन् तद्वदनान्निशम्य, धर्म्यं वचो जन्मफलं लभन्ते ॥२७॥

राजन्ति यत्राऽऽर्हतभक्तिभाजां, शतत्रयं शिल्पकलापराणि ।
वेदोक्तधर्माहृतमानसानां, सद्मान्यनेकानि सतां द्विजानाम् ॥२८॥

सद्धर्मनिष्ठं शुचिशीलयुक्तं, न्यायार्जितश्रीकृतसन्निवासम् ।
अन्योन्यसौहार्दमथाऽस्ति पद्मा-तारेतिनाम्ना प्रथितं कुटुम्बम् ॥२९॥

तस्मिन् नृरत्नाब्धिकुले कृतज्ञो, जैनेन्द्रधर्माहितसौवचित्तः ।
सन्मान्यवर्य्यो जनिमाप लक्ष्मी-चन्द्राभिधोऽन्वर्थगुणो महेभ्यः॥३०॥

औदार्यगाम्भीर्यमुखैर्गुणौघैर्न केवलं स स्वजनप्रियोऽभूत् ।
तस्मिन् समस्तेऽपि तु पत्तने स, सम्प्राप्तवान् सर्वजनप्रियत्वम् ॥३१॥

प्राप्तप्रतिष्ठो विरराम नाऽपि, कर्तव्यमार्गात् स सुधीः कदाचित् ।
गुणेष्वतृप्तो गुणिषु स्पृहावान्, धर्मे रतश्चाऽपि बभूव नित्यम् ॥३२॥

तद्गेहिनी स्वामिवचोऽनुषक्ताऽजनिष्ट धर्मैकधना दिवाळी ।
दीपावलीवत् सुगुणप्रदीपैः, कुलाम्बरं प्रोज्ज्वलितं ययाऽऽशु ॥३३॥

सर्वासु नैपुण्यवती क्रियासु, जाता प्रिया स्वल्पदिनैर्गृहे सा ।
पुरेऽपि तस्मिन् सदृशाबलानाम्, आदर्शभूताऽजनि सैव सुज्ञा ॥३४॥

चापल्यमौद्धत्यवियुक्तमस्याः, क्षमान्वितं शौर्यमगर्वधैर्यम् ।
सुदुर्लभं वीक्ष्य न कः शशंस, नृणां गुणा एव विभूषणानि ॥३५॥

कोपप्रसङ्गेऽपि तदीयमास्यं, निरीक्ष्य चन्द्रप्रतिमं प्रसन्नम् ।
सर्वेऽपि कोपं विजहुर्दवाग्नेः, कुतोऽवकाशः सति वारिवाहे ? ॥३६॥

वृद्धस्त्रियस्तस्य कुलस्य तस्यामकृत्रिमां वत्सलतामसिञ्चन् ।
तत्सख्यभावाय समा युवत्यो, वितेनिरेऽनल्पतमान् प्रयत्नान् ॥३७॥

समाप्य सा गैहिककृत्यमाशु, सायं स्वकृत्यं विधिनाऽऽचचार ।
प्राग्जन्मसंसाधितधर्ममार्गो, मुह्येत् कथं शर्मसु लौकिकेषु ? ॥३८॥

पञ्चेन्द्रियाणां विषया मनोज्ञाः, स्वल्पं न चेतश्चकृषुस्तदीयम् ।
मुक्ताफलास्वादनजाततृप्ती, रम्येत गुञ्जासु कथं मरालः ? ॥३९॥

दानादिधर्माचरणाद्धि जन्म, नैजं कृतार्थं हृदि मन्यमाना ।
भोगानुदारानपि रोगकल्पान्, बुभोज मत्वा हि निरुत्सुका सा ॥४०॥

स्वर्गाच्च्युतः कोऽपि तदीयकुक्षौ, जीवोऽवतीर्णः कृतभूरिपुण्यः ।
पुण्यैर्विना नैव जिनेन्द्रधर्मान्वितेऽन्वये जन्म जना लभन्ते ॥४१॥

निसर्गभव्याकृतिरप्यनूनं, रराज सा गर्भशिशुप्रभावात् ।
न दृश्यते किं जगतीह पूर्णः, सौम्यो भृशं शारदिकः शशाङ्कः ? ॥४२॥

दिनेषु यातेषु तदीयगर्भवृद्धया समं संववृधे नितान्तम् ।
देहद्युतिः मानसिकः सुभावः, शुभेषु कार्येष्ववितृप्तता च ॥४३॥

श्रीखण्डकश्मीरजपुष्पमुख्यैः द्रव्यैः शुभैः श्रीजिनमर्चयामि ।
सद्भावरोमाञ्चितगात्रयष्ट्या भोज्यादि साधून् प्रतिलाभयामि ॥४४॥

साधर्मिकेभ्यो वितरामि कामं, सम्मानपूर्वं रुचिरान् पदार्थान् ।
आरुह्य पीठं नृपमानगृध्नुः, शृणोमि हृद्यं जयशब्दमुच्चैः ॥४५॥

गर्भानुभावादिति सा महोजो-जनोचितं दोहदमाततान ।
तान् पूरयामास समान् सहर्षं, लक्ष्मीन्दुमुख्यः परिवारवर्गः ॥४६॥

स्वैराशु संपूरितदोहदा सा, चेतःप्रसत्तिं परमां दधार ।
भाग्येऽनुकूले सति मानवानां, फलावसाना हि मनोरथाः स्युः ॥४७॥

अङ्काक्षिनन्देन्दुमितेऽथ वर्षे( १९२९ ), श्रीवैक्रमे कार्तिकशुक्लपक्षे ।
असोष्ट सूनुं प्रतिपत्तिथौ सा, प्रोद्यन्तमैन्द्री दिगिवोष्णरश्मिम् ॥४८॥

गृहञ्च चेतः सममेव लक्ष्मीचन्द्रस्य तूर्यध्वनिभिः प्रमोदैः ।
आपूरितं, माद्यति को न लोके, मनोरथे सिद्ध्यति काम्यमाने ? ॥४९॥

बुधेन्दुशुक्राञ्चितकर्मभूमौ, धर्मस्थितेऽर्के, तनयेऽस्य लाभे ।
[1]यामित्रभावे गुरुभौमयुक्ते, तमोग्रहे तुर्यगते घटेऽङ्गे[2] ॥५०॥

इतिग्रहाणां सुगृहस्थितानां, प्रभावसंसूचितभाग्यलक्ष्मीः ।
प्राभूत् तनूजो विदितः स लक्ष्मीचन्द्रस्य सद्धार्मिककीर्तितस्य ॥५१॥

नीचस्थितार्काम्बुजराशिभर्त्रोः, केन्द्रस्थयोः काव्यमहीजयोर्हि ।
नृपोऽथवा धार्मिकचक्रवर्ती, भविष्यतीत्येवमवक् विधिज्ञः ॥५२॥

स्वीयेऽन्वये पुत्रजनिं निशम्य, प्रहर्षिता ज्ञातिजना बभूवुः ।
कुलाङ्गना हर्षविसर्पिचित्ता, मत्ता व्यधुर्मङ्गलगीतगानम् ॥५३॥

स जातमात्रोऽपि शिशुर्व्यजैषीद्, धाम्ना परं धामनिधिं दिनेशम् ।
जिगाय सौम्येन च शीतभानुं, नामावशेषीकृतसर्वदृश्यम् ॥५४॥

शनैः शनैः वृद्धिमियाय बालः, कामं द्वितीयाविधुवद् वरेण्यः ।
निरीक्ष्य तद्रूपमनिन्द्यमूचुर्महानुभावत्वममुष्य विज्ञाः ॥५५॥

कालोदिताम्भोजदलानुकारिनेत्रे गतिर्बालमरालतुल्या ।
वचः प्रियं काहलमय्यनल्पमहोऽस्य सर्वं वचसामगम्यम् ॥५६॥

अभूत् प्रियो दर्शनमात्रतोऽपि, सौभाग्यकर्मोदयान् समेषाम् ।
अङ्काङ्कसंरोपणतः कदाचिच्छशाक भूमौ न हि सोपवेष्टुम् ॥५७॥

---

१. यामित्रभावः - सप्तमस्थानम् । २. अङ्गे - लग्ने ।

श्रेष्ठी ततानाऽऽदशवासरं स, जन्मोत्सवं स्वीयसुतस्य वर्य्यः ।
ददौ च वर्धापनिकानिमित्तं, समीप्सितं सर्वजनेभ्य आशु ॥५८॥

बालो ह्ययं धर्मस्थितस्य नून-माधारभूतो भवितेति वीक्ष्य ।
सन्नेमिवत् स्वात्मभुञ्चकार, नाम्ना स नेमिं जनकोऽन्वगर्थम् ॥५९॥

गुणेन जात्या वयसा समानै-राक्रीडमानः शिशुभिर्वयस्यैः ।
सत्यापयन् भावि निजोत्तमत्व-मिवाऽऽप न क्वाऽप्यपकृष्टभावम् ॥६०॥

बालेऽप्यबालप्रतिभेऽचकासन्, गुणा विवेकप्रमुखा हि तस्मिन् ।
तन्नाऽद्भुतं संस्कृतभूमिकायां, चित्रं भवेल्लोकदृगुत्सवाय ॥६१॥

एकाग्रतानन्तमिवेक्ष्य बालं, काले कदा योगिनमात्मनिष्ठम् ।
वृद्धा जगू रे शिशुरेव पूर्व-भवात्मयोगीति वितर्कयन्तः ॥६२॥

इति वृषसुततुल्यो नेमिचन्द्रो हि बालो,
मुदितपरिजनानां स्नेहवृष्ट्या प्रकामम् ।
श्रुतिपथमधुरैश्चाऽऽसिच्यमानो वचोभि
र्निमिषमिव सहेलं बाल्यकालं निनाय ॥६३॥

॥ इति श्रीनैमिसौभाग्यकाव्ये जन्मवर्णनात्मकः द्वितीयः सर्गः ॥

## ( तृतीयः सर्गः )

अथोचितं कुमारं स्वं, वीक्ष्य तातः शुभायतिम् ।
पाठाय पाठशालायां, मुमोच समहोत्सवम् ॥१॥

पुष्पचन्दनवस्त्राद्यैर्भारतीं भाविभासिनीम् ।
पूजयित्वा लसद्भक्त्या, तुष्टुवे च स्थिरात्मना ॥२॥

धनवेशादिकं भूरि, प्रददौ प्रथमान्वितम् ।
उपाध्यायाय सच्छास्त्र-महाब्धेः पारदृश्वने ॥३॥

लेखिनी पुस्तकादीनि, भक्ष्यक्रीडनकाद्यपि ।
अवाप्य हर्षितस्वान्ताः, छात्राः संजज्ञिरे समे ॥४॥

सम्मानितोऽथ तं प्रीत्या, श्रीमयाचन्द्रपाठकः ।
अनन्यावहितचित्तेन, पाठनायोद्यतोऽभवत् ॥५॥

स नवीनागतो बालः, शुशुभे छात्रमण्डले ।
आकाशे विशदे दीप्यन्नक्षत्र इव चन्द्रमाः ॥६॥

अपि विद्यार्थिनस्तेन, मार्दवौदार्यशालिना ।
सख्याय स्पर्द्धयामासुर्नेमिचन्द्रेण धीमता ॥७॥

संस्कारात् पौर्वभविकात्, सकृच्छ्रुतमपि श्रुतम् ।
वज्ररेखेव संसक्त-मभूत् तस्मिन् सनातनम् ॥८॥

पठन्नवहितत्वेन, स विद्यां व्यावहारिकीम् ।
विशेषाद् धार्मिकाभ्यासे, बद्धलक्ष्योऽभवत् क्रमात् ॥९॥

जिनार्चास्तवन-ध्यानं, गुरूणां वन्दनादिकम् ।
सामायिकाद्यनुष्ठानं, तन्मनो रमयत्यलम् ॥१०॥

वयस्यैः क्रीडमानः स, सवयोभिः कदाचन ।
नीतिमान् भूप इव न, प्रतिज्ञातं व्यलङ्घत ॥११॥

अकस्मात्तन्मुखादुद्यद्-धर्मनिस्यूतभाषितम् ।
तस्य प्रत्याययत् पूर्वा-चीर्णामिव सुसाधुताम् ॥१२॥

विद्यया वपुषा कान्त्या, वर्धमानो निरन्तरम् ।
प्रकृत्याऽजनि नम्रः स, विटपीव फलोद्गमैः ॥१३॥

गृहे विद्यालये क्रीडाङ्गणे सौभाग्यशेवधिः ।
सर्वत्र चाऽपि सर्वेषा-मभूत् प्रीतिकरो भृशम् ॥१४॥

तत्क्षणं सकलां विद्यां, दधौ धीमान् स पाठकात् ।
पूर्वजन्मार्जितां सद्य-आगतामिव मोदितुम् ॥१५॥

संस्कारवारिपानाय, प्रपातुल्ये वसन् गृहे ।
सद्धर्मनीतिवार्ताभि-र्जीवनं स्वमकल्पयत् ॥१६॥

जगत्यादर्शचारित्रं, विधातुं निजनन्दनम् ।
जागरामासतुस्तस्य, पितरौ हि दिवानिशम् ॥१७॥

मातापित्रादयः सर्वे, प्रसन्नं वीक्ष्य स्वं सुतम् ।
विनयं मूर्त्तिमन्तं च, खेदं सर्वं विसस्मरुः ॥१८॥

कृतद्रव्यानुयोगादि-पाठभूरिश्रमः सुधीः ।
यस्य स्याज्जनकः किं स, भवेज्ज्ञानदरिद्रितः ? ॥१९॥

राज्याधिकारिणस्तेन, लक्ष्मीचन्द्रेण धीमता ।
चर्चां स्वविषयां कर्तु-माजग्मुस्तस्य वेश्मनि ॥२०॥

प्रस्तूयमानान् तैः सार्द्धं, वार्तालापान् रसेन सः ।
अश्रौषीन्निभृतं बालो-ऽप्यलक्षितनिजागमः ॥२१॥ (युग्मम्)

अनुजौ बालचन्द्राद्यौ, भगिन्यः प्रीतिनिर्भराः ।
सामीप्यमेकसूत्रोता, मुमुचुरिव नो मनाक् ॥२२॥

बाल्यतोऽपि स निर्भीकः, सत्यप्रियोऽभवत् सदा ।
कस्याऽपि दूषणं नैवा-ऽपह्नुते स्म कदाचन ॥२३॥

तस्मिन् दिग्वर्ष(८) देशीये, प्रसङ्गोऽयमुपस्थितः ।
भूतव्युद्ग्राहितेवाऽभूत्, काचित्तत्र नितम्बिनी ॥२४॥

सर्वेऽपि कथयामासु-र्जनास्तस्याश्चमत्कृताः ।
देवीवेयं विजानाति, भावान् भूतैष्यतो नृणाम् ॥२५॥

कुतूहलवशात् सर्वैः, सार्द्धं तत्र गतो ह्ययम् ।
मन्वानोऽप्यनृतं सर्वं, तत्स्त्रियाश्चरितं ननु ॥२६॥

कूटाकारां निरीक्ष्याऽपि, सर्वथा निर्भयः स तु ।
मुष्टिं बद्ध्वा जगादैनां, यदि सर्वमवैषि चेत् ॥२७॥

तदा मे मुष्टिमध्ये किं, विद्यते, ब्रूहि पण्डिते ! ।
नो चेत्त्वां किल वेत्स्यामो, धूर्तविद्यापरायणाम् ॥२८॥

सा तत्प्रतिवचोदाने-ऽसमर्था बुधमानिनी ।
भृशं विलक्षा सर्वेषां, हास्यपात्रमभूत्तदा ॥२९॥

निर्भयत्वं च चातुर्य-मस्य वीक्ष्य शिशोरपि ।
अन्वमंसत बालस्य, सर्वेऽपि भाविभव्यताम् ॥३०॥

आङ्ग्लद्वितीयकक्षाया-मुत्तीर्णाय प्रतिकृतिम् ।
ददावुपायनं तस्मै, महेभ्यो मनजी कृती ॥३१॥

नत्थु-मञ्छाभिधस्तस्मिन्, कालेऽभून्मायिकाग्रणीः ।
असम्भावितमप्यर्थं, दर्शयित्वा स्थले स्थले ॥३२॥

आश्चर्याम्भोधिसंभग्नान्, तत्क्रियाहृतमानसान् ।
नरानाबालवृद्धान् यः, कृतवान् स्वीयशक्तितः ॥३३॥ (युग्मम्)

तच्छक्तिदर्शनोत्पन्न-निजोत्कर्षदृढाग्रहः ।
स्वं विश्वाप्रतिमं कर्तुं, मानसे निश्चिकाय सः ॥३४॥

उत्तीर्णोऽपि परीक्षायां, बुद्ध्याऽविरहितश्च सः ।
तातभारापनोदाया-ऽध्ययनेऽभून्निरुत्सुकः ॥३५॥

कृत्वा किमपि वाणिज्य-मर्जयित्वा घनं धनम् ।
स्वजनानामहं भार-मपनेष्यापि साम्प्रतम् ॥३६॥

इति सञ्चिन्त्य संज्ञावान्, बुद्धिकाञ्चनशाणकम् ।
सद्वाभिधानमारेमे, वैपण्यं स शनैः शनैः ॥३७॥

सद्भाग्ययोगतः पूर्वं, किञ्चित् सम्प्राप्तवान् धनम् ।
किन्तु पश्चादभूत् तस्य, धनहानिर्हि भूयसी ॥३८॥

एकदा देवचन्द्राऽऽह्वो, जगाद तत्पितामहः ।
एतद्व्यापारमुत्सृज्य, श्रयाऽन्यद् भयवर्जितम् ॥३९॥

तमसौ सस्मितं प्राह, समीचीनं भवद्वचः ।
कथमेतद्विना मर्त्यः, किन्तु कौशल्यमाप्नुयात् ? ॥४०॥

इति नम्रगिरा सम्य-गनुनीय पितामहम् ।
व्यवसायादिकं कुर्वन्, न तत्र निरतोऽभवत् ॥४१॥

अपि दध्यौ भवेऽस्मिँश्चेत्, क्लेशार्जितधनादिकम् ।
सर्वं विहाय गन्तव्यं, को गुणस्तदुपार्जने ? ॥४२॥

दृश्यते यद्दिनारम्भे, न मध्याह्ने तदीक्ष्यते ।
मध्याह्ने यत्र तद्रात्रा-विति सर्वं चलं भुवि ॥४३॥

धर्मसाधनसामग्री-संयुतं प्राप्य दुर्लभम् ।
मानुष्यं जन्म नो कुर्यां, धर्मं प्रेत्यहितावहम् ॥४४॥

तदाऽवकेशिशाखीव, निष्फलो मे भवेज्जनुः ।
यतितव्यमतोऽवश्यं, मया धर्मे जिनोदिते ॥४५॥

इति चिन्तानिमग्नं तं, ध्यानस्थितमिवाऽऽत्मजम् ।
वीक्ष्य पित्रादयः सर्वेऽभूवन् कामं व्यथातुराः ॥४६॥

सौस्थ्याय तस्य कर्तव्यः, कोऽप्युपायः फलेग्रहिः ।
इति सम्यग्विचार्येत्थं, निश्चिक्युस्ते स्वमानसे ॥४७॥

सुमनः सङ्गमासाद्य, कीटः सन्मूर्ध्नि रोहति ।
एवं मर्त्यः सतां योगा-ज्जायते गुणभाजनम् ॥४८॥

भावपुरे मुनिप्रष्ठो, वृद्धिचन्द्रो विराजते ।
प्रेष्यस्तत्सन्निधौ सद्यो, यथा स्वस्थो भवेदसौ ॥४९॥

प्राप्तादेशो ययौ नेमि-चन्द्रोऽथ भावपत्तने ।
दृष्ट्वा नत्वा गुरुं वृद्धि-चन्द्रं प्रापाऽतुलां मुदम् ॥५०॥

गुरोर्भद्रस्वभावस्य, कोमलस्य सुमादपि ।
सङ्गस्तस्मै कृपामूर्ते-र्भव्याय रुरुचेऽधिकम् ॥५१॥

जीवनं निखिलं तस्य, यापयितुं पदाब्जयोः ।
सर्वेष्टकामघटयोः, सञ्जातः कृतनिश्चयः ॥५२॥

गुरुवक्त्रामृताम्भोद-वर्षितैर्वचनामृतैः ।
तद्धृदिस्था भृशं सिक्ता, ववृधे भावना लता ॥५३॥

संसाराद्विरतो रक्तो, ज्ञानाभ्यासे दिवानिशम् ।
गतं कालं न जानाति, यथेन्द्रः सुरसद्मनि ॥५४॥

नर्मदाशङ्कराभिख्यः, शास्त्रीश्रीमणिशङ्करः ।
बुधौ द्वौ संस्कृताभ्यास-मेनं कारयतो मुदा ॥५५॥

एकदा पत्रतोऽवेत्य, तातमातुर्मृतिं सकः ।
क्षणं विषद्य सद्बोधं, निजतातमलीलिखत् ॥५६॥

संसारः सारहीनोऽयं, न स्थिरः प्रियसङ्गमः ।
विहाय शोकं कर्तव्य-मतो धर्मे दृढादरः ॥५७॥

ज्ञात्वेत्यात्मभुवः पत्राद्, भवौदासीन्यमुत्कटम् ।
तत्स्नेहशृङ्खलाबद्धः, सुतं स्वं गृहमानयत् ॥५८॥

गृहागतोऽपि न स्वल्पं, तस्मिन् रक्तोऽभवत् सुधीः ।
स्थितो देहेन गेहेऽसौ, हृदा तु गुरुसन्निधौ ॥५९॥

स्मरन् पूर्वकृताभ्यासं, धर्मानुष्ठानमाचरन् ।
काङ्क्षन् मुनिव्रतं शीघ्रं, सप्त मासान्निनाय सः ॥६०॥

तादृशं मुनिकल्पं तं, वीक्ष्य पित्रादयः समे ।
मेनेरेऽयं हि संसारे, न स्थास्यत्येव कर्हिचित् ॥६१॥

नागरब्राह्मणज्ञाति-स्तत्रत्यो रूपशङ्करः ।
लक्ष्मीचन्द्रस्य वचसा, नेमिचन्द्रमथाऽऽह्वयत् ॥६२॥

पुरा साम्ना ततो दण्डात्, तेनाऽयं बोधितो बहु ।
मनाङ् न संयमादान-विचारात् श्लथितोऽभवत् ॥६३॥

दास्यन्ति संयमायैते, कथञ्चित्सम्मतिं न मे ।
विमृश्येति स मेधावी, गुप्तोपायं व्यचिन्तयत् ॥६४॥

स्वजनालक्षितो गत्वा, पुरं भावाभिधं रयात् ।
भवाभिष्वङ्गनिर्मुक्तः, संयमं स्वीकरोम्यहम् ॥६५॥

तत्रैको झीणियाभिख्य, औष्ट्रिकः प्रावसज्जनः ।
उष्ट्रमारोह्य यो लोकान्, नयति स्म स्थलान्तरम् ॥६६॥

इच्छाचन्द्राभिधं साक्षि-तया मध्ये प्रकल्प्य सः ।
तमाहूय शुभे घस्त्रे, प्रस्थातुं निर्णयं व्यधात् ॥६७॥

अज्ञात एव केनाऽपि, गृहान्निःसृत्य सात्त्विकः ।
मुमुक्षुदुर्लभेनाऽसौ, निश्यागान्नराद् बहिः ॥६८॥

निर्धारितस्थले पूर्व-मेवाऽऽयातं स वीक्ष्य तम् ।
औष्ट्रिकं मुमुदेऽरं क, इष्टे दृष्टे न मोदते ? ॥६९॥

अतिवाह्य त्रयोऽप्येते, त्रियामां विजनास्पदे ।
निर्भयं, प्रातरुत्थाय, चोष्ट्रमारुह्य प्रस्थिताः ॥७०॥

प्रान्तरेण यथा वर्ष-न्मेघैर्दुस्तीर्णसिन्धुभिः ।
अभीताः क्रमशः प्रापुस्तृतीयेऽह्नीष्टपत्तनम् ॥७१॥

तत्राऽवतीर्णवान् श्रेष्ठि-जसराजात्मजस्य सः ।
सद्मन्यमरचन्द्रस्य, पुण्ये सौधोपमे वरे ॥७२॥

उपेत्योपाश्रयं नत्वा, गुरुपादकजद्वयम् ।
समाख्यन्निखिलं नैजं, तस्मै वृत्तान्तमादितः ॥७३॥

व्यजिज्ञपच्च रे भीम-भवकान्तारसार्थप ! ।
भवच्छरणसम्प्राप्तं, मामुद्धर दयानिधे ! ॥७४॥

वर्षत्रयकृतायास-बलेनाऽद्याऽऽगतोऽस्म्यहम् ।
भवत्सकाशे आदातुं, संयमं गुरुसत्तम ! ॥७५॥

कृपां विधाय मे नाथ !, भवदुःखापहारिणीम् ।
शिवप्रासादनिःश्रेणिं, दत्त्वा दीक्षां कृतार्थय ॥७६॥

यद्यपि प्रोद्यतोऽसि त्वं, दीक्षायै वत्स ! साम्प्रतम् ।
किन्तु नोत्सहते चेत-स्तत्कृतेऽनुमतिं विना ॥७७॥

धृत्वा धैर्यमतो बाल !, विलम्बस्वाऽधुना कियत् ।
यावदाहूय ते तातं, तस्याऽनुमतिराप्यते ॥७८॥

असम्भावितमाकर्ण्य, गुरोरेवं वचस्तदा ।
म्लानाननो बभूवाऽसौ, हिमदग्धारविन्दवत् ॥७९॥

विचारितञ्च तेनेद-मनुज्ञायै गृहं यदि ।
गन्ताऽस्म्यहं तदाऽऽयातु-मेष्टाहे पुनरेव नो ॥८०॥

विलम्बालम्बनेनाऽपि, प्राप्स्याम्यनुमतिं नहि ।
विचार्येत्थमभूत् सज्ज आदातुं संयमं स्वयम् ॥८१॥

तेन सहाऽऽगतं तत्र, दुर्लभाख्यं तु भाविकम् ।
तादृग्विरोधविरहाद्, दीक्षयामास सत्वरम् ॥८२॥

तपस्विक्षान्तिविजया-न्तिषद्रत्नाभिधान्मुनेः ।
श्रीमुक्तिगणिनो धर्म-ध्वजं प्राप्य प्रमोदतः ॥८३॥

बाण[५] वेदा[४]ङ्क[९]चन्द्रे[१]ऽब्दे (१९४५), ज्येष्ठे शुक्ले रवेस्तिथौ ।
गृहीतसंयमोः सोऽभू-च्छ्रीनेमविजयाभिधः ॥८४॥

इत्थं लब्ध्वा प्रचुरजननावाप्तपुण्यप्रकर्षात्
दीक्षां मोहप्रचयतिमिरध्वंसनैकप्रसिद्धाम् ।
संसाराब्ध्युत्तरणतरणीं मोदमानः स्वचित्ते,
कृत्यं मेने सकलमखिलं चिन्तितं यच्चिरात्तत् ॥८५॥

॥ इति श्रीनेमिसौभाग्यकाव्ये दीक्षाग्रहणपर्यन्तवर्णनात्मक
तृतीयः सर्गः ॥

# ( चतुर्थः सर्गः )

अथ स्वहस्तादृतसाधुवेषो,
वैराग्यरङ्गोल्लसितात्मवृत्तिः ।
श्रीवृद्धिचन्द्राह्वगुरोः प्रसादं,
वाञ्छन्नुपेयाय तदंह्रिमूले ॥१॥ ( उपजातिः )

प्रसाददृष्ट्या गुरुणा स दृष्टः,
सम्भाषितश्चाऽपि सुहृद्यवाचा ।
तदीयसत्सव्यकराब्जनिर्यद्-
वासप्रचूर्णाञ्चितशीर्षकोऽभूत् ॥२॥

चारित्रमार्गे स्वसुतं विदित्वा,
सम्प्रस्थितं चन्द्रयुतः स लक्ष्मीः ।
न्याय्यं विदन् तद्धृदयेन किन्तु,
जज्ञे यियासुर्व्यवहारतो हि ॥३॥

इच्छन्न शक्नोति जनो विधातुं,
करोति चेच्छारहितोऽपि कृत्यम् ।
यतः स विश्वेऽतुलितप्रभावो,
राजेव भाति व्यवहार एव ॥४॥

तमेव संश्रित्य युतो हि लक्ष्मी-
चन्द्रः स्त्रिया भावपुरे समागात् ।
न न्याययुक्ता निजसूनुदीक्षे-
त्येवं जगौ न्यायगृहं प्रविश्य ॥५॥

न्यायैकनिष्ठो मगनाभिधान-
स्तत्राऽभवद् विश्वसनीयवृत्तः ।
श्रीनेमिपार्श्वे स्वयमभ्युपेत्य,
परीक्षयामास बहुप्रकारैः ॥६॥

सोवाच रे किं विहितं त्वयेद-
मज्ञोचितं कर्म विचक्षणेन ? ।
जानासि किं नो ह्यविचारितस्य,
कार्यस्य जायेत कटुर्विपाकः ? ॥७॥

विचार्य्य तस्मादधुनाऽप्यमुष्मात्,
त्वं साहसाद् वत्स ! विराममेहि ।
यथा भवेद् भाविनि ते न काले,
दुःखोद्भवः कारणमन्तरेण ॥८॥

नैयायिकस्येति निशम्य वाचं,
जगाद नेमिश्रमणस्तदानीम् ।
संसारदुःखौघजिहीर्षयैष-
आप्तो मया संयम आत्मबुद्धया ॥९॥

त्यक्ष्यामि तन्नैव कदाऽपि याव-
ज्जीवं गृहीतं शुचिसंयमं तम् ।
विश्वे विशीर्येत न जातु रागो,
माञ्जिष्ठिकः सूर्यकरैः सहस्त्रैः ॥१०॥

आलम्ब्य तन्न्यायपथं यदिष्टं,
स्यात्तद् यथेच्छं विदधातु देवः ।
अस्मादृशां स्वात्महितोद्यतानां,
कस्माद्भयं पापमृते भवेऽस्मिन् ॥११॥

प्रगल्भमाकर्ण्य वचस्तदीय-
मुदीरितं निर्भयमित्युदात्तम् ।
विरक्तभावं हृदि निश्चिकाय,
शुद्धं मुनेर्न्यायकृदस्य विज्ञः ॥१२॥

जिज्ञासमानं परिणाममस्य,
तत्तातलक्ष्मीन्दुमिदं न्यगादीत् ।
नाऽऽपाततः किन्तु हृदो विरक्ति-
स्त्वदीयसूनोरिह नाऽस्ति शङ्का ॥१३॥

मोहाभिभूता जननी तदीया,
तत्पार्श्वमागत्य भृशं रुरोद ।
बभाण मां त्वज्जननीं विहाय,
न युज्यते प्रव्रजितुं त्वयाऽङ्ग ! ॥१४॥

दत्वा जनिं त्वामपुषं स्वपोष-
मेतावतीं प्रापितवत्यवस्थाम् ।
त्वन्मातरं तोषयसीह नो चे-
देतादृशीं तत्तव साम्प्रतं किम् ? ॥१५॥

श्रुत्वेति मातुर्वचनं मनाङ् न,
गृहीतमार्गादभवच्च्युतः सः ।
विभावयन् किन्तु भवस्वरूपं,
तस्मिन् विशेषेण दृढादरोऽभूत् ॥१६॥

गिरा चचक्षे प्रियया प्रसूं स,
मा गाः शुचं प्राकृतमर्त्यवत् त्वम् ।
त्वया तु धर्मैकधियाऽधुनाऽहं,
सत्संयमे सक्तमना विधेयः ॥१७॥

उत्पद्यते जन्तुरिहैक एव,
देहं विहायैकक एव याति ।
ममाऽयमस्याऽहमिति प्रमादात्
प्राप्नोति दुःखं हृदि मन्यमानः ॥१८॥

सन्ध्याभ्ररागप्रतिमो हि लोके,
निरीक्ष्यतेऽस्मिन् स्वजनानुरागः ।
विरूपतां याति प्रतिक्षणं यः,
काऽऽस्था सतां तत्र विनाशशीले ? ॥१९॥

विमुच्य मोहं तत एव पूज्ये !,
ऽनुज्ञापय द्राङ् मम संयमाय ।
शुभाशिषं चाऽर्पय मे प्रसद्य,
यतोऽद्यतः स्वस्थमना भवेयम् ॥२०॥

स्थिरत्वमित्यात्मभुवोऽवगत्य,
स्नेहं जहौ तद्विषयं कथञ्चित् ।
दधौ च चित्ते परमां प्रसत्तिं,
सुतः स्वकीयोऽजनि संयतो यत् ॥२१॥

निजं पुरं प्रस्थितयोर्हि पित्रोः
प्राप्याऽतिहर्षं स्तुतयोर्जनौघैः ।
स्वाध्यायमग्नो विनयेन नम्रः,
सत्प्रीतिपात्रं भवति स्म नेमिः ॥२२॥

स पाठकाच्छ्रीमणिशङ्कराऽऽख्यात्,
प्रारब्धवान् व्याकरणादिपाठम् ।
जग्राह विद्यां प्रथमोदबिन्दुं,
महीव सच्छास्त्रविशुद्धबोधाम् ॥२३॥

ज्येष्ठस्थितिर्भावपुरे स्वकीया-
ऽऽद्याऽभूत् सह श्रीगुरुणा महर्द्धौ ।
उपादिशत्तत्र गुरुर्महीयान्
जैनागमं भव्यजनेभ्य इद्धम् ॥२४॥

इयेष सोऽभ्यासरतोऽपि चित्ते,
व्याख्यानतो बोधयितुं मनुष्यान् ।
प्रागाभिधानं दरबारयुक्तं,
पुरो निवेश्याऽभ्यसनं ततान ॥२५॥

उवाच चैनं मुनि नेमनामा,
भद्राऽऽगते पर्वणि वार्षिकाऽऽह्वे ।
श्रोतुं न सम्यक् प्रभविष्यसि त्वं,
जनप्रवादेन हि कल्पसूत्रम् ॥२६॥

अतः स्थिरं चित्तमलं विधाय,
मत्तोऽधुनाऽऽकर्णय कल्पसूत्रम् ।
कृत्वेति तं श्रावकमुत्सुकं स,
व्याख्यातुमारब्ध सुमुक्तकण्ठम् ॥२७॥

कार्यप्रसङ्गेन ययौ कदाचिद्,
रहःस्थले तत्र गुरुस्तदीयः ।
अलक्षितस्तेन निशम्य तस्य,
वाचः पटुत्वं नितरां तुतोष ॥२८॥

भव्याच्छभावाम्बुधिवृद्धिचन्द्रे,
दुर्भेद्यकर्माद्रिविभेदवज्रे ।
समागते पर्वणि वार्षिके तान्,
गुरुर्जगादाऽमरचन्द्रमुख्यान् ॥२९॥

भो भो ! दिने श्वो भवतां समक्षं,
नेमोऽयमाख्यास्यति कल्पसूत्रम् ।
आश्चर्ययुक्तान् पुनराह वीक्ष्य,
यथार्थमाख्यामि न धत्त शङ्काम् ॥३०॥

गुरुस्तुरीये दिवसेऽथ वाग्मि-
नैकेन साकं मुनिना सभायाम् ।
स्वीयोत्तरीयं परिधाप्य नूत्नं,
सम्प्रेषयामास गभीरवृत्तिः ॥३१॥

व्याख्यानमद्याऽस्ति मयाऽर्पणीय-
मेवं न जानन् परिषद्यगात् सः ।
व्याख्याय पूर्वं मुनिनाऽथ किञ्चि-
दाज्ञापितो नेममुनिस्ततोऽभूत् ॥३२॥

आज्ञप्तमेतद् भवता मुने ! कि-
माख्यायतां सम्प्रति किं करिष्ये ?।
मुनिर्जगौ वेद्मि परं न किञ्चद्-
गुर्वाज्ञयैवेदमकुर्वि कार्यम् ॥३३॥

गुरोर्निदेशं शिरसाऽवधार्य,
व्याख्यातमेतेन सुचारुरीत्या ।
प्राशंसि लोकैः पुरतो गुरोस्तद्,
द्वारं शुभारम्भ इहाऽस्ति सिद्धेः ॥३४॥

अध्यैष्ट विज्ञान्मणिशङ्कराऽऽख्यात्,
स चन्द्रिकाव्याकरणञ्च काव्यम् ।
न किन्तु तृप्तिं मतिराप तस्य,
जिज्ञासमानस्य महामहार्थान् ॥३५॥

कथाप्रसङ्गे गुरुवृद्धिचन्द्रः,
स्वीयान् जगाद श्रमणान् निशायाम् ।
न पाणिनीयं बहुलाच्च काला-
दधीतवान् व्याकरणं हि कोऽपि ॥३६॥

अतः पठेत् कोऽपि मुनिर्भवत्सु,
तन्मे मनस्तर्ह्यधिकं प्रसीदेत् ।
गुरूक्तमेतद्धृदि सम्प्रधार्य,
पाठाय तस्याऽऽदृतनिश्चयोऽभूत् ॥३७॥

अन्वेषणात्तत्र पुरे समन्ता-
दवापि भानुः किल शङ्करान्तः ।
प्राचार्य आसीत् स तु राजकीये,
विद्यालये विज्ञतमस्तदानीम् ॥३८॥

अथ प्रशस्ते दिवसे स नेमः,
प्रारब्धवान् व्याकरणं ततो ज्ञात् ।
एकाग्रचित्तेन सदा पठन् स,
मनीषिणश्चित्तमलं जिगाय ॥३९॥

॥ इति चतुर्थः सर्गः ॥

## ( पञ्चमः सर्गः )

पुण्योदयपुरुषार्थ-द्वययोगात् प्राप्य संयमं वर्य्यम् ।
क्षुधितस्य मिष्टभोजन-मिव सोऽत्यन्तं मुदं प्रययौ ॥१॥

ग्रहणासेवनशिक्षां, गुरुसेवालीनमानसोऽधिययौ ।
संयमयोगान्निखिला-निव स हि विदधे पुराभ्यस्तान् ॥२॥

प्रथमां चातुर्मासीं, निजगुरुणा सह सोऽकरोद्धि भावपुरे ।
विनयविवेकादिगुणै-र्जातश्च गुरोः कृपापात्रम् ॥३॥

सिद्धान्तचन्द्रिकाख्यं, यो व्याकरणं पपाठ यत्नेन ।
बुधमणिशङ्कर-रेवा-शङ्करबुधसन्निधौ तरसा ॥४॥

तद्बुद्धौ बुधकथिता, भावाः के[1] तैलबिन्दुवत्प्रसृताः ।
परमां प्रीतिमुपागात्, तद् दृष्ट्वा शास्त्रिणां चित्तम् ॥५॥

प्राप्याऽतर्कितमपि यः, स्वगुरुनिदेशं ददावसंक्षुब्धः ।
पर्षद्यपि सुमहत्यां, व्याख्यानं कल्पसूत्रस्य ॥६॥

निजशिष्यो यदि कोऽपि, प्राज्ञः सिद्धान्तकौमुदीं हि पठेत् ।
रम्यं तदेति बाढं, गुरुरनवरतं विचचार हृदि ॥७॥

ज्ञात्वा तदभिप्रायं, गुरोर्विनीतोऽवदत् स नेममुनिः ।
स्याद्यदि भवतामाज्ञा गुरो ! पठेयं च तां प्रेम्णा ॥८॥

प्रीतो गुरुरिति वचसा, तस्मै प्रददौ शुभाशिषो बह्वीः ।
को नहि तुष्येत्स्वमनो-नुसारिणीं गां निशम्य जनः ? ॥९॥

बुधभानुशङ्कराख्य-स्तत्राऽऽसीद् राजपण्डितो मुख्यः ।
तत्पार्श्वे शुभ दिवसे, प्रारेभे कौमुदीं स मुदा ॥१०॥

---

१. कं-जलम्, तस्मिन् ॥

कौमुद्याः शास्त्रार्था-नवधार्य यथाश्रुतान् स गुरुवदनात् ।
अस्खलितं श्वो दिवसे, सर्वानश्रावयत् स गुरुम् ॥११॥

नाथालालश्शङ्कितो-ऽप्यधीत्य काश्यां समागतो विद्वान् ।
यद्वाग्धारां वादे, श्रुत्वाऽस्खलितप्रचारां द्राक् ॥१२॥

काव्यं रघुवंशाख्यं, किरातकाव्यं च सोऽपठद् धीमान् ।
अपि वत्सरपर्याये, सतताध्ययनैकरतबुद्धिः ॥१३॥

प्रादुरभूत्तद्देहे-ऽसातोदयतो ज्वरो महास्निग्धः ।
अपि वत्सरे व्यतीते, नोपायशतैर्व्यपेतः सः ॥१४॥

तेनाऽभ्यासे विघ्नः, प्रवर्तमाने ह्युपस्थितः प्रबलः ।
चिन्ताक्लान्तं चित्तं, ततोऽभवन्नेमविजयस्य ॥१५॥

अनभ्यसनखिन्नहृदं, पूज्यश्रीवृद्धिचन्द्रगुरुवर्य्यः ।
समबोधयन्मधुरया, शिरीषमृद्वया गिरा तमिति ॥१६॥

मा खिद्यस्व मुने ! त्वं, खेदेन हि नाशमेति वरबुद्धिः ।
झटिति स्वस्थो भूत्वा, पुनरपि पाठं विधाताऽसि ॥१७॥

दीर्घज्वरोष्मवशत-स्तन्नेत्रे मन्दतेजसे जाते ।
आम्ररसव्यापृत्या, क्रमशः स्फीततेजसेऽभवताम् ॥१८॥

कतिभिर्मुनिभिः सार्द्धं, गुर्वाज्ञातो विहृत्य जैनपुरीम् ।
अगमत् पंन्यासवर्य्य-प्रतापविजयस्य सान्निध्ये ॥१९॥

ड्हेलोपाश्रयमध्ये, तदा स आसीन्मुनीश्वरैः परितः ।
राजन्नार्हतधर्म-प्रभावकः श्रुतवयःस्थविरः ॥२०॥

तत्पार्श्वे विधिपूर्वं, योगोद्वहनं विधाय शुभदिवसे ।
वर्य्योत्सवेन जगृहे, पुण्योपस्थापनां स ततः ॥२१॥

अहम्मदावादपुरे, चैत्यावलिराजिते पुरप्रवरे ।
धर्माढ्यजनाकीर्णे, कञ्चित्कालं स्थितिं कृतवान् ॥२२॥

श्रीहठीभाई-वाटि-कायां श्रीधर्मनाथजिनराजम् ।
श्रीजगवल्लभपार्श्वं, मूलेवापार्श्वनाथञ्च ॥२३॥

श्रीचिन्तामणिपार्श्वं, भाभापार्श्वं तथा च वीरविभुम् ।
गांधीमार्गस्थितं च, दर्शं दर्शं मुदं यायात् ॥२४॥

झह्वेरिवाडमध्ये, डोशीवाडाप्रतोलिकामध्ये ।
रम्या जिनवरमूर्ती-र्दृष्ट्वा न हि को मुदं यायात् ? ॥२५॥

गुणरत्नरोहणगिरीन्, स्वाध्यायतपःक्रियासु संलीनान् ।
वन्दित्वा च मिलित्वा, पूज्यान् प्रापत् परानन्दम् ॥२६॥

माघञ्च नैषधीयं, काव्यं व्युत्पत्तिसाधकं प्रवरम् ।
पेठे पण्डितसविधे, कौमुद्याः शेषभागश्च ॥२७॥

स्वीयं समाप्य कार्यं, भावद्रङ्गं समागते शिष्ये ।
हर्षाधिक्याद् गुरवो, व्यतरन् पुण्याशिषः प्रचुराः ॥२८॥

पूज्यगणिमुक्तिविजया, अभवन् प्रौढप्रतापधामानः ।
ये जिनशासनराज्यं, निपुणतयाऽशासनच्छधियः ॥२९॥

तच्छिष्यदानविजया-स्तर्के शब्दे च लब्धवैदुष्याः ।
अतिसाररोगरुग्णाः, समागताः वृद्धिगुरुपार्श्वे ॥३०॥

उचितौषधसेवनतो, वैयावृत्येन साधुवर्गस्य ।
भक्त्या श्राद्धगणस्य च, ते त्वरितं नीरुजो जाताः ॥३१॥

श्रीपादलिप्तनगरे, प्रारेभे तदुपदेशतो ह्येका ।
श्रमणाभ्यासाय शस्या, संस्कृतपाठस्य वरशाला ॥३२॥

तत्र मुनिदानविजया-ग्रहेण गुर्वाज्ञया च मुनिनेमः ।
समुपागतश्च तेन, वेगवती साऽभवच्छाला ॥३३॥

तत्र हि नानाशास्त्रा-भ्यासं कुर्वंश्च कारयन् प्रीत्या ।
कालः कियान् गमित इति, कथमपि न ज्ञातवान् नेमः ॥३४॥

इतश्च भावद्रङ्गे, विराजितः पूज्यवृद्धिचन्द्रगुरुः ।
आयुःपरिहाण्या किल, स्वरलञ्चकार समाधियुतः ॥३५॥

आकर्ण्य वृत्तमेतद्, दारुणदुःखप्रदं मुनिर्नेमः ।
किंकर्तव्यविमूढः, क्षणमेकं मूर्च्छितो जातः ॥३६॥

ग्रहवेदनवविधुमिते( १९४९ ), वर्षे [1]राधसितसप्तमीदिवसे ।
अरिहंत-सिद्ध-साहू-मन्त्रं ध्यायन् गतः स्वर्गम् ॥३७॥

गुरुविरहानलदग्धा, भावनगरवासिनो हि भक्तजनाः ।
महता यत्नेन मनः-समाधिमासादयन्नूनम् ॥३८॥

निजगुरुवर्यवियोगाद्, यूथच्युतहरिणशाववत् खिन्नः ।
जलनिर्गतमीन इव, न रतिं कुत्राऽपि लेभे सः ॥३९॥

वदति च रे दुर्दैव ! तवाऽपराद्धं मया हि किं ? येन ।
इदमतिदुःसहदुःखं, मयि क्षिपन् लज्जसे नैव ॥४०॥

अथ किं कुर्वे ? क्व च वा, गच्छामि ? वदामि कस्य वा पुरतः?
शरणविहीनस्य हहा ! -ऽऽकस्मिकदुःखौघ आपतितः ॥४१॥

पूज्य गुरो ! इति पदतो, भक्त्या वक्ष्यामि कं मधुरवाचा ?।
सम्प्रति वक्ष्यति को मां, रे नेमेत्याप्तवचनेन ॥४२॥

कः पाठयिष्यति च मां, सेविष्ये कस्य पादयुगलं वा ?।
शिरसि न्यस्य करं स्वं, को दास्यत्याशिषो मेऽन्यः ? ॥४३॥

इति गुरुविरहार्त्तं तं, प्रियवाण्याऽबोधयन्मुनिर्दानः ।
अन्तःखिन्नोऽपि बाढं, कथमप्यालम्ब्य सद्धैर्यम् ॥४४॥

रे भ्रातः किं शोचसि ? त्यज शोकं हृत्समाधिमाधत्स्व ।
ध्रुवमरणं जातस्ये-त्यागमवचनं च संस्मरतात् ॥४५॥

---

१. वैशाख

को नाम जगति शक्तो, मृत्युमुखाद् रक्षितुं जनं स्वीयम् ?।
श्रीतीर्थकृत्समा अपि, तं नूनं नाऽतिवर्तन्ते ॥४६॥

पूज्या गुरवस्तु पुनः, संयममाराध्य निर्मलं सुचिरम् ।
उपदिश्य भव्यलोकान्, निजजननं सार्थकं चक्रुः ॥४७॥

अथ कार्यमेकमेवा-ऽस्माकं न्यायादिशास्त्रमभ्यस्य ।
प्राप्याऽतुलवैदुष्यं, तत्पट्टोद्भासनं कुर्मः ॥४८॥

इति तद्वचोऽपनीत-स्वगुरुवियोगार्तिराप्य हृद्स्वास्थ्यम् ।
संयमयोगे नित्यं, नियमितचित्तोऽभवन् मुदितः ॥४९॥

लघुसंयमपर्याये, वयसि लघौ गुरुवरं विना वसनम् ।
प्राप्तं तदपि न धैर्यं, जहौ स्वभाग्यैकविश्वस्तः ॥५०॥

पञ्चमः सर्गः समाप्तः ।

(सत्यानुकूल्ये अग्रे रचना विधास्यते)

❀ ❀ ❀

## २०. श्री सिद्धचक्र स्तोत्रम्

जगदुद्धारकृते यः, प्रवर्तयामास तीर्थमिदमनघम् ।
सुरराजसंस्तुतपदं, भक्त्याऽर्हन्तं हि तं प्रणुवे ॥१॥

ध्यानानलेन कर्मे-न्धनानि खलु यो हि भस्मसाच्चक्रे ।
अरुज-मजर-ममरपदं, प्राप्तं सिद्धं स्तुवेऽविरतम् ॥२॥

योऽमृतनिभया वाचा, भव्यानुपदिशति धर्ममश्रान्तम् ।
आचारपालनरतं, सूरिं तं सूरभं वन्दे ॥३॥

पाषाणसमो हि नरः, पूजां लभते यदीयसेवातः ।
पाठननिरतः पाठक-वर्य्योजयतात् सदा विश्वे ॥४॥

प्रविहाय देहममतां, नित्यं कुर्वन्ति ये तपो विविधम् ।
संयम-साधन-प्रवणान्, तान् साधून् भावतोऽभिनुवे ॥५॥

ज्ञानं तथा च चरणं, यत्सहितं चैव सार्थकं भवति ।
सर्वगुणमूलरूपं, तत्सद्दर्शनमहं वन्दे ॥६॥

कृत्याकृत्यं भक्ष्या-भक्ष्यादि येन वेद्यते निखिलम् ।
अज्ञानान्धदिनकरं, तत् सज्ज्ञानं स्तुवे सततम् ॥७॥

देवेन्द्र-चक्रवर्ति-प्रभृतिभ्यः शर्म यत्र नैकगुणम् ।
मुक्तिपदराजवर्त्म, चारित्रं तज्जगति जयतात् ॥८॥

निजमुक्तिं जानन्तो, विदधति तीर्थंकरा हि यन्नियतम् ।
कर्मक्षयैकहेतु, मम मनसि तत्तपो लसतात् ॥९॥

नवपदमयसिद्धचक्र-स्तोत्रं रचितं हि भक्तिभावभृता ।
गुरूदेवपादपङ्कज-मधुलिह मुनि हेमचन्द्रेण ॥१०॥

(रचना : वि.सं. २०६४, श्रा.सु. ५ बुधवार
महासुख भुवन, पार्ला (वेस्ट))

## २१. विषयत्यागाष्टकम् ।

चतुरशीतिलक्षासु, योनिषु भ्राम्यता मया ।
यद् यदाचरितं पापं, तद्वक्तुं नैव पार्यते ॥१॥

असंवृतेन चित्तेन, तथाऽसंस्कृतया गिरा ।
दुष्प्रवृत्तेन कायेन, भृशं पापमुपार्जितम् ॥२॥

देवादिगतयस्तिस्रो, गतिमेकामिमां विना ।
बन्धाय पुण्यपापानां, केवलं, न क्षयाय तु ॥३॥

अद्य प्राप्तोऽस्ति संयोगो, दुर्लभो जन्मकोटिभिः ।
तं लब्ध्वा किल कुर्वेऽहं, विपुलां कर्मनिर्जराम् ॥४॥

शब्दादिविषये यत्नात्, प्रतिबन्धमपि त्यजे ।
यतस्ते सर्वदा नैक-स्वरूपाः सन्ति देहिनाम् ॥५॥

यद्रूपमेकदा दृष्ट्वा, नृत्येते स्माऽक्षिणी भृशम् ।
सम्मुखं चाऽऽगतं तन्न, रोचतेऽद्य निरीक्षितुम् ॥६॥

श्रोतुं भोक्तुं तथा स्प्रष्टुं, द्रष्टुमाघ्रातुमिच्छति ।
सदा नवं नवं चाऽयं, भुक्तपूर्वोऽप्यनन्तशः ॥७॥

करुणाब्धेऽथ नाथ ! त्वा-मद्य प्राप्य निरञ्जनम् ।
सर्वेभ्यो विषयेभ्योऽहं, भवेयं विरतो विभो ! ॥८॥

❀ ❀ ❀

# २२. शरणाष्टकम् ।

अनाद्यनन्तविश्वेऽस्मि-न्नश्रान्तं भ्राम्यतो मम ।
अधुना केवलं ह्येकः, त्वमेव शरणं विभो ! ॥१॥

यत्र वा तत्र वा गत्वा, यं वा तं वा प्रणम्य च ।
यन्मयोपार्जितं पापं, तत्सर्वं क्षमयाम्यहम् ॥२॥

पिता माता तथा बन्धु-र्दयितो दयिताऽथवा ।
स्वामिन्नाऽलं समुद्धर्त्तुं, निमज्जन्तं भवाम्बुधौ ॥३॥

चेतस्त्वय्येव संसक्तं, रतिं न लभते मम ।
गृहे वा विपिने वाऽपि, पण्ये वोपवनेऽपि वा ॥४॥

कीदृशो मन्दभाग्योऽहं, सति नाथे भवादृशे ।
मुक्त्वा त्वच्चरणोपास्तिं, विलसामि भवेऽनिशम् ॥५॥

हस्तमादाय मां नाथ !, त्वमिहाऽऽनीतवानसि ।
मार्गमध्ये निराधार-मथ मां किं विमुञ्चसि ? ॥६॥

गुणानां नाऽस्ति ते पार-मौदार्यं चाऽप्यनुत्तरम् ।
गुणमेकं न किं मह्यं, तेभ्यो नाथ ! प्रयच्छसि ॥७॥

इदं सुनिश्चितं विद्धि, करुणाम्भोनिधे ! प्रभो !।
त्वां मुक्त्वा कोटिकपटैः, श्रये देवं न चाऽऽपरम् ॥८॥

❀ ❀ ❀

## २३. स्वर्णाक्षरीय कल्पसूत्र प्रशस्तिः ।

ॐ ह्रीँ अर्हँ नमः ।
अर्हँ विजयते शश्वत्, अर्हँ वन्दे निरन्तरम् ।
अर्हँ दृष्टः शुभः पन्थाः, अर्हँ नित्यं नमोऽस्तु ते ॥
अर्हँ दुःखक्षयः शीघ्रं, अर्हँ रूपमनुत्तमम् ।
अर्हँ श्रीर्ह्री धृतिःकीर्तिः, अर्हँ आगच्छ मे मनः ॥ (मंगलश्लोकौ)

• • •

श्रेयः श्रेणिं स नित्यं वितरतु भगवान् वर्धमानो जिनेन्द्रो,
यस्त्रैलोक्यं समस्तं करगतफलवत् केवलेनाददर्श ।
यत्पादाब्जे विनम्रैः सुरपतिनिकरैश्चारु हंसायितं च,
वाणीं जीमूतवद्यो व्यपगतदुरितो वर्षयामास दिव्याम् ॥१॥
(स्त्रग्धरा)

सर्वातिशायिनि यदीयमहिम्नि लोके,
कामं वितन्वति हतप्रहतप्रभावाः ।
याताः पलाय्य सुररत्नमुखा विदूरं,
शङ्खेश्वराधिपतिरस्तु मुदे स पार्श्वः ॥२॥ (वसन्त०)

रे कामकुम्भ सुररत्न सुरद्रुमाद्या-
एतर्हि यान्तु ननु दूरभुवं भवन्तः ।
चिन्तामणौ स्फुरति पार्श्वजिने जगत्यां,
मन्येत मन्दमतिरप्यथ को नु युष्मान् ॥३॥ (वसन्त०)

निखिले भुवनेऽपि यत्समं,
न हि रूपं प्रवरं विलोक्यते ।
सकलेप्सित कल्पमाश्रये,
प्रभुपार्श्वं जगवल्लभं सदा ॥४॥ (वैतालीयम्)

सूरीणां चक्रवर्ती विरलगुणखनिः प्रौढसाम्राज्यशाली,
साक्षात् वाचस्पति र्यो निजपरसमये नैकसद्ग्रन्थकर्ता ।
तीर्थोद्धारे च रक्तो मुनिगणमहितो बाल्यतो ब्रह्मचारी,
पूज्य श्रीनेमिसूरिर्जगति विजयतां श्रीतपागच्छधुर्यः ॥५॥ ( स्त्रग्धरा० )

विहितनैकतमाद्भुतसत्कृति-
र्विजयधर्मधुरन्धर सेवितः ।
कविवरोऽ समशास्त्रविशारदो,
जयति सूरिवरो विजयामृतः ॥६॥ ( द्रुतविलम्बितम् )

यद्दर्शनेन भविनोऽसुखमाशु हित्वा,
हर्षप्रकर्षमतुलं तरसा लभन्ते ।
द्राक्षेव यो मधुरहृद्वरसौम्यमूर्तिः,
शान्ताकृतिः स जयताद् गुरुदेवसूरिः ॥७॥

तदीय पट्टोदयभानुकल्पः,
शब्दादिशास्त्रे कृत भूरियत्नः ।
गाम्भीर्य धैर्यादिगुणावलीढः,
सूरिः सदा राजति हेमचन्द्रः ॥८॥

तस्यानुजन्मा प्रथमश्च शिष्यः पंन्यासवर्य्यो गुणरागपीनः ।
सार्वागमाभ्यासरतो ह्यजस्रं, प्रद्युम्ननामा जयतीह साधुः ॥९॥ ( इन्द्रवज्रा )

तच्छिष्यरत्नो मुनिराजहंसः,
स्वाध्यायलीनो विनयेन पीनः ।
प्रसन्नचेतोवदनो नितान्तं,
चारित्रमाराधयति प्रकामम् ॥१०॥ ( उपजातिः )

पूज्यांह्रि-हीरविजयः सरलात्मवृत्ति-
र्विस्मर्यते न हि स तातमुनिः कदापि ।
पत्नी-सुतद्वयसुताश्च जिनेन्द्रमार्गे,
प्रस्थाप्य यः स्वयमपि प्रततान दीक्षाम् ॥११॥ ( वसन्त )

साध्वी हेमलताऽऽख्या,
पद्मलताऽऽख्या च संयमे सक्ता ।
भगिनी तथा च जननी,
तपोरता जयति गुणमहिता ॥१२॥ (आर्या)

नवसारीनगर संघ-विज्ञप्तिं भावसंभृतां मत्वा ।
वर्षावासाय सार्द्ध-मेभिः समहं समायातः ॥१३॥ (आर्या)

वर्षेऽक्षिवेदाम्बर नेत्र (२०४२) संख्ये,
ज्येष्ठस्थितिः श्री नवसारी मध्ये ।
व्याख्यानमासक्षमणादिभिश्च,
प्रशंसनीया ह्यभवत् समेषाम् ॥१४॥ (उपजातिः)

इषुवदेप्रमितागम-वरपूजा भूर्युत्सवेन संकलिता ।
यैश्च तदानीं दृष्टा, प्राशंसन् के न तां लोके ॥१५॥ (आर्या)

पं. प्रद्युम्नविजयगणि-वरोपदेशेन कल्पसूत्रस्य ।
श्रुतरागि भक्तवर्गैः भक्त्या विपुलार्थ-भूरि द्रव्येण ॥१६॥

स्वर्णाक्षरैः प्रतिरियं, मंगलभूता च लेखिता जयतात् ।
यावद् दिनकरचन्द्रौ, तावद् बुधवाच्यमाना कौ ॥१७॥ (आर्यायुग्मम्)

वर्ष्येऽग्निवेदाभ्रविलोचनेऽब्दे, (२०४३)
कल्पप्रशस्तिं कृतवान् मनोज्ञाम् ।
श्रीनेमिसूरेरमृतस्तदीय-
देवस्य शिष्यो मुनि हेमचन्द्रः ॥१८॥ (इन्द्रवज्रा)

श्रीवाचकावतंसस्य, यशोविजयजिद्गणेः ।
त्रिशताब्दयां च दृब्धेयं,
प्रशस्तिः स्वस्तिशालिनी ॥१९॥ (अनुष्टुप्)

"भूयाद् भद्रं श्री श्रमणसंघस्य"
(रचना - सं. २०४३)

❀ ❀ ❀

# २४. पूज्याचार्यवरेण्य-श्रीविजयोदय-सूरीश्वराणाम् गुणसङ्कीर्तनम् ।

—पं. हेमचन्द्रविजयो गणिः (राजनगरम्)

(आर्या-वृत्तम्)

जिनवर-शासन-भासन-निरतः शरदभ्रशुभ्रकीर्तिभरः ।
श्री विजयोदय सूरि-र्जयति सदा सूरि मूर्धन्यः ॥१॥

सुरतरुरिव सकलार्थित-कर्ता श्री स्तंभनाधिपति पार्श्वः ।
यत्र विराजति तस्मिञ्-जनिरजनि स्तंभने यस्य ॥२॥

पूर्वाद्भूतसंस्कारा-दुपदेशान्नेमिसूरिसम्राजः ।
संसारान्निर्विण्णः, प्रवव्रजे यो नवे वयसि ॥३॥

गुरुपदकमलसमर्पित-सर्वस्वः स्वल्पकालयोगेन ।
यः पूर्वाधिगतमिव, स्वीचक्रे सकलशास्त्रार्थम् ॥४॥

एकत्र सर्वविद्याः, सहवासविधित्सया मिथः स्नेहात् ।
वर्य्यं गुणगणनिलयं, दयितं यं वव्रिरे त्वरितम् ॥५॥

षड्दर्शन तत्त्वानां, स्याद्वादनयेन देशनां यस्य ।
श्रुत्वा नाम विपश्चि-न्न चालयेत्कः स्वमूर्धानम् ॥६॥

यस्य जगद्विस्मयकृ-च्छिल्पमुहूर्त्तादि शास्त्र-नैपुण्यम् ।
सार्वाऽऽगमोपनिषदो, ज्ञानं चासीत् सुविख्यातम् ॥७॥

श्रमणादिभ्यो योऽदा-दागम-शास्त्रादि-वाचनामनिशम् ।
तीर्थोद्धृतिसत्कृत्यं, कारितवान् स्वोपदेशेन ॥८॥

श्रुतपर्य्यायवयोभि-र्वृद्धो गीतार्थशेखरः श्रीमान् ।
प्रविदित-परोपकारः, प्रशमनिधिः प्रवरपाण्डित्यः ॥९॥

जलधिरसप्रमित समान् प्रपाल्य सत्संयमं पुरे भावे
स्वरलंचकार सारं, दद्यादुदयं सदा सोऽयम् ॥१०॥

❀ ❀ ❀

## २५. प्रकीर्णकोपदेशकश्लोकाः

जिना मोक्षमार्गं दिशन्तश्च सिद्धा-गुणौघैर्युताः सूरयो भासयन्तः ।
मतं चार्हतं वाचका बोधयन्तः, श्रुतं शङ्कराः साधवः शं विदध्युः ॥१॥

प्राङ्नैकवर्य्यभव पुण्यबलेन लब्ध्वा,
सम्पत्तिमत्र धनदेन समामनल्पाम् ।
दानं प्रमुक्त करमेव न चेद्धि दद्या-
रक्षिस्यतीह वद दुर्गतिपाततः कः ॥२॥

वपुस्तेऽस्तरोगं वयश्चापि नव्यं, धनं तेऽस्ति पार्श्वे सुपर्वाद्रितुल्यम् ।
वचो मिष्टमच्छं विनीतं कुटुम्बं, न धर्मे मतिश्चेत् तदा व्यर्थमेव ॥३॥

मनोवाञ्छितं किं तवास्तीह विज्ञ !,
किमर्थं मुधा भ्राम्यसीतस्ततश्च ।
यदाऽऽप्यं हि तत् सन्निधौ तेऽस्ति सर्वं,
ततस्तत्र कार्यो नितान्तं प्रयत्नः ॥४॥

रे रे जनाः ! शान्तहृदा विचार्य, यूयं कुरुध्वं करणीयमत्र ।
यतोऽल्पमायु र्बहवोऽन्तराया, बहूनि कार्याणि करस्थितानि ॥५॥

प्रात र्हि यद् दृष्टिपथावतीर्णं, सायं हि तत् कर्हिचिदीक्ष्यते न ।
तस्माद्रसारं परिहाय कार्यं, सारं विधेयं विबुधेन कृत्यम् ॥६॥

❀ ❀ ❀

॥ ॐ ह्रीँ अर्हँ नमः ॥
॥ श्री आदिनाथाय नमः ॥
॥ श्री गौतमस्वामिने नमः ॥
॥ नमो नमः श्री गुरु नेमिसूरये ॥

# २६. श्री केसरिया-वीर-परम्परा-प्रासाद-प्रतिष्ठाप्रशस्तिः

श्रेयः श्रेणिं तनुतात्, सततं श्री मारुदेव-जिनचन्द्रः ।
नवनवति-पूर्वकृत्वः, समवसृतः सिद्धशैले यः ॥१॥

अर्हत्पदकजयमलं, प्रणिपत्याभीप्सितार्थदानचणम् ।
श्री केसरियाचैत्य-प्रशस्तिरिह लिख्यतेऽल्पधिया ॥२॥

देशे भारतसंज्ञे, पुण्यतमे नैकतीर्थपरिकलिते ।
भूवलयविश्रुतोऽसौ, नाम्ना विषयोऽस्ति सौराष्ट्रः ॥३॥

पूज्यश्री-पादलिप्त-सूरीश्वर-पादसेवनाभिरुचिः ।
साधितविद्यः श्राद्धो, नागार्जुननामको जज्ञे ॥४॥

गुरुनाम्नेदं नगरं, वासितवान् पादलिप्तसंज्ञं सः ।
जननिवहस्तं सम्प्र-त्यभिधत्ते पालिताणेति ॥५॥

तत्पुरपरिसरवर्ती, शत्रुञ्जयशैलेशेखरो भाति ।
मुक्तिं यत्रानन्ता, जीवाः प्रतिकङ्करं प्राप्ताः ॥६॥

जलनिधिजलपरिमाणं, गङ्गातटरेणुनिकरसङ्ख्यानम् ।
कुर्यात्कोऽपि कथञ्चि-न्नपुनः सिद्धाद्रिसंस्तवनम् ॥७॥

राजति वरचैत्यालिः, शुभ्राद्रौ यत्र तुङ्गश्रृङ्गमयी ।
मन्ये स्वरापगा सा, हिमवद्-भ्रान्त्या समवत्तीर्णा ॥८॥

नगरे सूर्यपुराऽऽह्वे, भुवनाद्भुतदर्शनीयसद्विभवे ।
२ २ ० २
नयन-द्वि-खा-क्षिवर्षे-, विधाय समहं चतुर्मासम् ॥९॥

शासनसम्राड् गुरुवर-पूज्य श्री नेमिसूरिपट्टधरः ।
विजयामृतसूरीशः, कविरत्नः शास्त्रनिपुणमतिः ॥१०॥

श्री विजय रामसूरिः, सूरिः श्रीविजयदेवनामा च ।
धर्मधुरन्धरसूरि-र्गणिश्च मुनि हेमचन्द्राऽऽह्वः ॥११॥

इत्यादिशिष्यकलितो, झगडीयापादचारिसङ्घयुतः ।
ग्रामाद्ग्रामं विहरन्, प्राप्तः श्री पादलिप्तपुरम् ॥१२॥

अञ्जनमहोत्सवस्त-न्निश्रायां सोद्यमं बभूव वरः ।
शत्रुञ्जय विहारे-ऽभूवन् दीक्षाद्यनेकमहाः ॥१३॥

दोलतनगरीय श्री-शङ्खेश्वरपार्श्वनाथसंस्थायाः ।
ट्रस्टिमहोदयवर्ग-मुपादिशत्सूरिराऽमृतः ॥१४॥

प्रतिपद्य सदुपदेशं, शत्रुञ्जगिर्युपस्यकायां सा ।
राठोडादक्रीणाद्, वसुदशशतकरमितां भूमिम् ॥१५॥

खननमभूत्तद्भूमौ, गुणनयनाकाशनेत्र (२०२३) मितवर्षे ।
मङ्गलविधानपूर्वं, माधववसित-शैलजातिथ्याम् ॥१६॥

शिल्पकलानिष्णातं, सोमपुरानन्दलालनामानम् ।
मन्दिरनिर्मितिकार्यं, समर्पितं सोमचन्द्राद्यैः ॥१७॥

प्रगुणीकृत्य समग्रां, सामग्रीं सोऽपि कार्यमारभत ।
प्रतिपद्विधुवद्ववृधे, क्रमशः कार्यञ्च शीघ्रतरम् ॥१८॥

श्री केसरियावीर-परम्परानामकं महाचैत्यम् ।
भव्यतमं जननयना-नन्दकरं रच्यमानमभूत् ॥१९॥

पीताश्मनिर्मितं तत्, सुवर्णरचितमिव चैत्यमाशुशुभे ।
दर्शं दर्शं प्रापु-र्न जातु तृप्तिं जनाक्षीणि ॥२०॥

यस्यास्ति शिल्पशास्त्रे, संज्ञा श्री पापनाशनेतिशुभा ।
रम्यं तन्मण्डपेन, चैत्यमजनि मेघनादेन ॥२१॥

शृङ्गैः पञ्चभिरम्बर-संस्पर्शि चतुस्तलं महच्चैत्यम् ।
सार्द्धद्विवर्षमात्र- कालेनाल्पीयसा यदभूत् ॥२२॥

नूनमदृश्येण तत्र, दिव्यप्रभावेण केनचिद्भाव्यम् ।
कथमन्यथेदृशं स्यान्-महत्तमं कार्यमनपायम् ॥२३॥

श्री केसरियामन्दिर-नाम्ना ख्यातोऽभवत्प्रदेशोऽयम् ।
केसरियानगरेत्ति - पुण्याभिधया हि सर्वत्र ॥२४॥

भोजनशाला-धर्म-शाले प्रवरेऽपि तत्र शुशुभाते ।
यात्रिकचेतोवपु-र्ददतु र्ये निर्वृतिं नितराम् ॥२५॥

सज्जीभूतेऽथ तस्मिन्, शिल्पकलानुत्तमे वरे चैत्ये ।
अञ्जनबिम्बस्थापन-महाय संयेतिरे मुख्याः ॥२६॥

रसनेत्राम्बरनयन ( २०२६ ) प्रमिते-ऽब्दे राघकृष्णसप्तम्याम् ।
कर्तुं शुभप्रतिष्ठां, बुधदिवसे निर्णयो विहितः ॥२७॥

बृहतीं कलाकलयितां, श्रीसङ्घामन्त्रणार्थमतिरम्याम् ।
प्रतिनगरं सा प्रैषीत्, कुङ्कुमवरपत्रिकां संस्था ॥२८॥

ध्वजतोरणादिकलितं, ततान पटमण्डपं सुविस्तीर्णम् ।
यत्र सहस्राणि जना, आसेरन् मुक्तसाङ्कीर्ण्याः ॥२९॥

बाणाक्षि ( २५ ) मितां वामां-रचनामैतिह्यविषयसम्बद्धाम् ।
आसेचनिकामग्रे-रङ्गाजीवैररचयच्च ॥३०॥

समुच्छ्रितो दारुमयो, मेरुमहीध्रोऽर्हतोऽभिषेकार्थम् ।
मण्डपमध्ये विहितो, यथा विदेहे सुमेरुगिरिः ॥३१॥

ग्रहविधु (१९) दिनमितदीर्घं, विविध महापूजनैर्युतं स्फारम् ।
कर्तुं निर्णयमकरोन् - महोत्सवं श्री प्रतिष्ठायाः ॥३२॥

शासनसम्राट् समुदय-वर्तिनोऽन्येऽपि साधवो बहवः ।
साध्व्य इह महोत्सवाय, दूराद् विहृत्य सम्प्राप्ताः ॥३३॥

भावपुरस्थः श्रीमद्-विजयोदयसूरिराट् सुविज्ञप्तः ।
इच्छन्नागन्तुमपि, शरीरदौःस्थ्येनागतवान् ॥३४॥

निजमतिविभवपराजित-धिषणः श्री नन्दनाह्वसूरीशः ।
विजयामृतसूरीशः प्रासादस्योपदेष्टास्य ॥३५॥

श्रीमोतिप्रभसूरिः, सिद्धान्तपटुश्च रामसूरीशः ।
श्रीमेरुप्रभसूरिः, प्रभावकः वाग्मिधौरेयः ॥३६॥

श्री विजयदेवसूरिः, सौम्यप्रकृतिर्मदीयगुरुवर्य्यः ।
सूरि जयानन्दाऽऽख्यः सुतशिष्यः पुण्यविजयस्य ॥३७॥

धर्मधुरन्धरसूरि-एतच्चैत्योपदेशकार्यपरः ।
वाचक कीर्तेश्चन्द्रो, सूर्योदय-संज्ञपन्न्यासः ॥३८॥

पं. हेमचन्द्रविजयः, प्रायेणाऽन्येऽपि षष्टिसंङ्ख्याकाः ।
इति शासनसम्राज्ञां, श्रमणाः समुपस्थिता बहवः ॥३९॥

निजशिष्यैराययौ च, सूरिः कैलाससागरः शान्तः ।
शुभनिश्रायामित्या-दीनामभवत्समं कार्यम् ॥४०॥

माधवसितपञ्चम्याः, मङ्गलगीतैर्मनोहरैर्वाद्यैः ।
कुम्भस्थापनपूर्वं, महोत्सवारम्भ इह जातः ॥४१॥

गजरथतुरगैर्कलितं, विविध-पुरायात-भूरिजनपूर्णम् ।
जलयात्रा-कल्याणक-वरघोटकषट्कमऽयमभूत् ॥४२॥

जिनबिम्ब-स्थापनाया-तिथ्यं बहिरागतातिथीनाञ्च ।
सुचारुतर-व्यवस्था-पूर्वं विहितं परमहृद्यम् ॥४३॥

राधासितपञ्चम्यां, शुभलग्ने शुद्धविधियुतं जज्ञे ।
पञ्चशताधिक जिनवर-बिम्बाञ्जनसद्विधानमिह ॥४४॥

सप्तम्यां बुधवारे, कृष्णे राधे प्रशस्ततरयोगे ।
श्री मेरुप्रभसूर्युप - दिष्टः श्री प्रागजीभाई ॥४५॥

श्री केसरियामूल - नायकमुख्यत्रिकं झवेरसुतः ।
दानाधरितसुरद्रुः प्रातिष्ठिपदच्छभावेन ॥४६॥

श्री पार्श्वमन्तरिक्षं, भूगर्भेऽस्थापयद् दमणवासी ।
उत्तमसुतो गुलाब-चन्द्रः पुण्यापगासिन्धुः ॥४७॥

श्री शङ्खेश्वरपार्श्व-मुपरितनेऽस्थापयद् वदान्यवरः ।
हाथीजणवास्तव्यो, हरिलालात्मजमूलचन्द्राऽऽख्यः ॥४८॥

भव्याकृतीन् जिनेशा-नि ते ते श्रेष्ठिनो लसितभावाः ।
प्रातिष्ठिपञ्च भव्ये, चैत्ये श्री गौतमादिगुरून् ॥४९॥

नभसो निरीक्ष्य पतितां, पुष्पनिभविमानतः कुसुमवृष्टिम् ।
जिनप्रतिष्ठावसरे, ऽभूवञ्चकिता न के तत्र ? ॥५०॥

शान्तिस्नात्रे प्रवरे - ऽष्टाधिकशतजातरूपमुद्राभिः ।
विहितापूजा श्रेष्ठि - प्रवरेण प्रागजीभात्रा ॥५१॥

अपरञ्च पालिताणा - नगरं निखिलं हि भोजितं तेन ।
यद् भाषायां 'झांपे-चोखे' त्याख्यायते लोकैः ॥५२॥

समुपस्थिताः प्रतिष्ठा-काले शरतेत्र ( २५ ) दशशतं लोकाः ।
उदघोषयन् प्रकामं, जय जय शब्दं जिनेन्द्राणाम् ॥५३॥

श्री मफतलाल नामा, शस्तविधानं ह्यकारयद विधिकृत् ।
मर्त्यान् जिनभक्तिरतान् गेयज्ञो गजाननो विदधे ॥५४॥

धन्यास्ते कृतकृत्याः, पवितं तैर्जन्मना निजञ्च कुलम् ।
यैरिह धनव्ययेन, प्रापि प्रवरः सुकृतलाभः ॥५५॥

रत्नोपमजिनबिम्बै-र्मन्दिरमेतद् विराजितं ह्यधुना ।
गिरिराजयात्रिकानां, ह्यनयनोल्लासकृज्जातम् ॥५६॥

कार्याधिकारिणः श्री शंङ्खेश्वरपार्श्वचैत्यसंस्थायाः ।
निम्नोल्लिखिता इभ्याः, सेवोद्यत्तमानसा नित्यम् ॥५७॥

श्री सोमचन्द्रनामा, ठाकरशीभ्यो वरालियोपाह्वः ।
श्रेष्ठि धीरजलालो, मनःसुखः शान्तिलालश्च ॥५८॥

श्रीमान् नटवरलालो, लघुरपि वयसा विमर्शकृक्कमलः ।
कृत्वा श्री तीर्थसेवा - मेते समुपार्जयन् सुकृतम् ॥५९॥

यावन्मेरुगिरीन्द्रो, यावल्लवणोदधिश्च विधुसूर्यौ ।
तावदिदं जिनचैत्यं, नन्दतु भुवि भव्यसंसेव्यम् ॥६०॥

पं. हेमचन्द्रविजयः, श्री गुरुदेवांह्रि-सेवनाप्तमतिः ।
श्री केसरिया चैत्य - प्रशस्तिमेता-मलिखदनधाम् ॥६१॥

रचयिता-शासनसम्राट् श्री विजय नेमि-अमृत-देवसूरि शिष्यः
विजय हेमचन्द्रसूरिः ॥

रचना सं. २०२८

# २७. पूज्यंप्रति दलकमलम्-आचार्यगुणसंकीर्तनम् ।

शास्त्रविशारद-न्यायवाचस्पति-कविरत्न-सिद्धान्तमार्तण्ड पूज्यापादाचार्य श्रीविजयनन्दनसूरीश्वरमहाराजान् प्रति दोलतनगरात् प्रहितं दलम् ॥

प्रेषक :- परमपूज्य-आचार्य-श्रीविजयदेवसूरीश्वराणां शिष्यः
पंन्यास-श्री हेमचन्द्रविजयो मुनिः

यदुपज्ञं धर्मनाव-मधिरुह्य तरन्ति भीमभवजलधिम् ।
भव्यास्तमर्चयेऽहं, जिनराजं राजराजिनतम् ॥१॥

नगरे दोलतसंज्ञे, विराजिनं प्रसृमरप्रभावाढयम् ।
श्रीशङ्खेश्वरपार्श्वं, भक्त्या प्रणिपत्य पार्श्वार्च्यम् ॥२॥

लब्धिनिधानं ध्यात्वा, गणभृत् श्रीगौतमं सुरेन्द्रनतम् ।
'श्रीनेमि'मन्त्रमेवं, स्मृत्वा सर्वेष्टकामघटम् ॥३॥

श्रीपादलिप्तनगरे शत्रुञ्जयतीर्थराजसांनिध्ये ।
साहित्यनिलयसौधे विराजमानान् विबुधवर्यान् ॥४॥

निज-परसमयाम्भोनिधि-मन्थनलब्धाद्वितीयचिद्रत्नान् ।
कृतिगणनायां प्रथमस्थानापन्नान् परमपूज्यान् ॥५॥

---

आ.विजयनन्दनसूरिस्मारकग्रन्थे प्रकाशितम् ।

श्रीजिनशासनभासन-कृतोद्यमान् सन्ततं च तत्र रतान् ।
श्रीनन्दनसूरीशान्, स्थविरानप्यस्थविरचित्तान् ॥६॥

भक्त्या नतोत्तमाङ्गो, योजितकरकुड्मलः सरोमाञ्चः ।
पं. हेमचन्द्रविजयो, गुरुवरदेवाङ्घ्रिपद्मालिः ॥७॥

वन्दनकोटिसनाथं, कुशलोदन्तेन संयुतं पत्रम् ।
श्रीमद्दोलतनाम्ना, वर्यान्नगरान्निवेदयति ॥८॥

वरिवर्ति सांप्रतं शं, तीर्थोद्धृतिदत्तचित्तवृत्तीनाम् ।
शासनसम्राजां श्री-गुरुपादानां प्रसादेन ॥९॥

दलकमलं भवदीयं, सुखसातोदन्तबोधकं प्राप्तम् ।
तेनास्मदीयचेतः, प्रमोदभरभाजनं जातम् ॥१०॥

अत्रास्मद्गुरुवर्याः, संप्रति कुशलान्विता विराजन्ते ।
भव्यजनाञ्जिनमार्गे, प्रवर्त्तयन्तो गिरा शुभया ॥११॥

अध्ययनाध्यापनयोः संयोजितमानसो मुनिः स्वस्थः ।
प्रद्युम्नाऽऽख्यस्तपसः साधितवानोलिकां दशमीम् ॥१२॥

जनकमुनिर्हीराख्यः, सत्यप्यवगण्य देहदुःस्थत्वम् ।
सद्वाचनमालादौ, सुखमास्ते व्यापृतस्वान्तः ॥१३॥

मुनिदर्शनविजयाख्यो, दीर्घविहारश्रमं विनोदयितुम् ।
किञ्चिद् विश्रम्य तदनु स्वाध्यायचिकीः ससुखमास्ते ॥१४॥

कर्मग्रन्थं तथा सूत्र-मुत्तराध्ययनं पठन् ।
कुरुते पुण्डरीकाख्यो, वर्धमानाभिधं तपः ॥१५॥ (अनुष्टुप्)

कृताभिधानकोशोऽयं चन्द्रकीर्तिमुनिस्तथा ।
दृढीकरोति सत्तर्कसंस्कारान् भूरियत्नेन ॥१६॥ (अनुष्टुप्)

विद्याधरोऽपि श्रीवर्ध-मानाख्यं तप आचरन् ।
तत्त्वार्थं संस्कृतं चापि, समधीते स्थिराशयः ॥१७॥ (अनुष्टुप्)

विनयपुरस्सरमेते, वन्दनमावेदयन्ति सर्वेऽपि ।
तत् स्वीकार्यं कृपया, गुणरत्नाम्भोधिना भवता ॥१८॥

तत्र भवन्तः पूज्या, भव्याम्भोजं विबोधयन्तो द्राक् ।
वर्तिष्यन्ते कुशला, इत्याशासेऽहमनवरतम् ॥१९॥

तत्रत्या मुनिवर्याः, समेऽपि सातान्विता भविष्यन्ति ।
नामग्राहं तेभ्यो वाच्यो, मे वन्दनादिविधिः ॥२०॥

प्रारप्स्येते श्रीम-ज्जम्बूचरितं च पञ्चमाङ्गमिह ।
आवश्यके तृतीयः, प्रविभागः वाच्यते ह्यधुना ॥२१॥

पंन्यासशीलभद्रा निरुपायं राजपत्तनं प्रहिताः ।
तस्मात् शून्यं स्थानं तत्प्रतिभायादिति स्पष्टम् ॥२२॥

तदपि न कार्यो भवता प्राकृतजनवत् कदाप्यधृतिभावः ।
अपि विरहः कतिकृत्वः प्रीतिकरो जायतेऽपूर्वः ॥२३॥

जानन्त्येव भवन्तः, शास्त्रैदम्पर्यवेदिनः पूज्याः ।
भ्रमति सदाऽस्मिन् भुवने, संयोग-वियोगयोश्चक्रम् ॥२४॥

अथ च अत्रत्या वार्तमानिकी स्थितिः

आर्द्रानक्षत्रादनु, प्रायः समवैति प्रत्यहं मेघः ।
औष्ण्यं ततोऽपनीतं, परितो भूः शाद्वला जाता ॥२५॥

दिनकृत् किरणैः स्वीयैः, क्षणपूर्वं तापयेद् भुवं यावत् ।
तावत् तां जलपूर्णा-मभ्रं कुरुते कुतोऽपि संगत्य ॥२६॥

न जाने कोऽप्ययं रागो, भुव्यस्यां वारिदस्य यत् ।
वारंवारमविश्रान्त-एनामाश्लेष्टुमिच्छति ॥२७॥

दक्षिणोत्तरदिग्भागे, गव्यूत्यर्धान्तरे गते ।
पुरुषोत्तमपार्काख्यं, स्थानं ग्रामो दहीसरः ॥२८॥

वर्तेते तत्र राजेते, श्रीशान्तिः सम्भवप्रभुः ।
तापत्रितयसन्तप्त-भव्यशान्तिविधायकौ ॥२९॥

बोधिवल्लिपुरं भाति, प्रतीच्यां तावदन्तरे ।
तत्र चैत्यं महोत्तुङ्गं, राजते सम्भवप्रभोः ॥३०॥

इतश्च दिशि पूर्वस्यां, राजते पर्वतावलिः ।
तथा द्रुमौघसंकीर्ण-मुद्यानं सुमहत्तरम् ॥३१॥

पुरुषोत्तमपार्केऽभूत् प्रतिष्ठाया महोत्सवः ।
सम्पन्नोऽद्य महोत्साहपूर्वकं जिनबिम्बयोः ॥३२॥

पत्रोत्तरप्रदानेना-नुगृह्योऽयं जनः स्वकः ।
अस्मद्योग्या च निर्देश्या, कार्यसेवा कृपावता ॥३३॥

भवन्ति कृतपाप्मानः पुण्यवन्तो यदीक्षणात् ।
तद्गिरिराजयात्रायां स्मरणीया वयं सदा ॥३४॥

(वि० सं० २०२८, वर्षाकालः)

❁ ❁ ❁

# २८. आ.श्री विजयप्रद्युम्नसूरिवरं प्रतिलिखितं पत्रम् ।

(सं. २०३८, श्रावण सुद-१३)

नानातरु कृतवप्रा, मालणसरितस्तटे विलसमाना ।
निजरुचि जित सुर भवना, नाम्नेयं मधुमती नगरी ॥१॥

जलनिधिरपि निजसलिलै-र्यत्पादौ क्षालयत्युभयसन्ध्यम् ।
साम्प्रतसमये सा किल, महुवेत्यभिधीयते लोकैः ॥२॥

फलकुसुमभारनम्रै-र्वल्लिद्रुमसञ्चयैः सुरुचिराणि ।
उद्यानानि समन्ताद्, यां नगरीं भूषयन्ति भृशम् ॥३॥

यज्जाता नारिकेला, आप्यायन्ति स्ववारिणा मनुजान् ।
यद्भवसहकारफला-न्यास्वाद्य जनो भवति तृप्तः ॥४॥

काश्मीरेतिपुरीं यां, सौराष्ट्रे सर्व एव कथयन्ति ।
यत्रस्थाः किल लोकाः, कामं धनधर्मसङ्कलिताः ॥५॥

श्रीनन्दिवर्धनेन, स्वामिभ्रात्रा विधापिता पूर्वम् ।
वीरविभोर्वरमूर्तिः, ख्याता भुवि जीवितस्वामी ॥६॥

जितरविविधुवृषरूपं, रूपं यस्यावलोक्य चारुतरम् ।
मन्यन्ते हृदि भविकाः, स्वाक्ष्णां साफल्यमतिवेलम् ॥७॥

---

આ. શ્રી વિજય હેમચન્દ્રસૂરિ મહારાજે મહુવાથી પાટણ,
પં. પ્રદ્યુમ્નવિજય મ. ઉપર લખેલ પત્ર - સં. ૨૦૩૮, શ્રા. સુ. ૧૩

मणिरत्नै-रुज्ज्वलिते, काचकलामञ्जुले प्रवरचैत्ये ।
बह्व्यो विराजमाना: किन्नहि जिनमूर्तयो नम्या: ॥८॥

शासनसम्राट्च्छ्रीमत्-परमगुरोर्नेमिसूरिराजस्य ।
जन्मस्थानस्योपरि, निर्मापितमस्ति चैत्ययुगम् ॥९॥

श्रीपार्श्वनेमिचैत्यं, चैत्यं श्री आदि शान्ति नामधरम् ।
हृदयाऽऽह्लादक जिनवर-बिम्बैरति भूषितं भव्यैः ॥१०॥

अदबदजीतिवराऽऽख्या-मुन्मुखदृश्यां प्रभोर्बृहन्मूर्तिम् ।
दर्शं दर्शं यान्त्या-बालस्थविरा मुदं परमाम् ॥११॥

सार्द्धशताधिकसङ्ख्या, लघु लघु बाला उपेत्य जिनस्नात्रम् ।
मधुररवं प्रतिकल्यं, विदधति भक्त्याऽऽर्हतं भवनम् ॥१२॥

यत्राऽऽगत्याऽऽसन्न-ग्रामेभ्यो ज्ञानलिप्सवो बाला: ।
विद्यामधीयते स, बालाश्रमोऽस्ति यशोवृद्धिः ॥१३॥

पुरपश्चिमदिग्भागे, नेमिविहाराभिधे सुभगचैत्ये ।
श्री शान्तिनाथमूर्ति-र्विराजिता भवति शान्तिकरी ॥१४॥

नत्वाऽऽर्हतपदकमलं, ध्यात्वा हृदि नेमिसूरिगुरुराजम् ।
एवं वर्णित पूर्वान्-निवेद्यते मधुमती-नगरात् ॥१५॥

श्री विजयहेमचन्द्रा-ऽऽचार्येण सहानुवन्दनेन दलम् ।
पत्तनपुरकृतचातु-र्मासा: प्रद्युम्नविजयगणिन: ॥१६॥

वन्दित्तासूत्रार्थं, पेथडचरितञ्च मधुरया वाचा ।
व्याख्यानयन् तृतीय-मङ्गन्नु वाचयन् विशदम् ॥१७॥

भव्यान् धर्माचरणे, युक्तिवचोभिश्च योजयन्ननिशम् ।
कच्चित् कुशलोऽस्ति भवान्, वाचनसल्लेखनादिरत: ॥१८॥

जनकमुनि: श्रीहीर:, स्वाध्यायादौ निरन्तरं निरत: ।
ग्लानोऽप्यग्लानमना:, कच्चित् कुशली प्रसन्नमुख: ॥१९॥

काव्य-प्राकृतविषया-भ्यासं भक्तिं च भावतः कुर्वन् ।
मुनिराजहंसविजयः, किमु तनुमनसो निराबाधः ॥२०॥

साध्वी प्रियदर्शनाऽऽख्या, हेमलताऽऽख्या तथा च पद्मलता ।
अन्या अपि श्रमण्यः, सर्वाः किं सन्ति कुशलिन्यः ॥२१॥

तासां किं सर्वासां, प्रचलति पठनं तपश्च निरपायम् ।
ताभ्योऽनुवन्दना च, वाच्या सुखसातवृत्तयुता ॥२२॥

श्री वर्धमानतपसो, या दीर्घा ओलिका मुदितचित्ताः ।
आराधयन्ति ताः किल, दृष्ट्वा तत् के-न हृष्यन्ति ॥२३॥

निजसद्वचनविनिर्जित-द्राक्षासिक्तामृतादिमाधुर्यः ।
गुरुवर देवाचार्यो, वात्सल्याब्धिः स सुखमास्ते ॥२४॥

विविधौषधोपचारैः, शामितकफशैत्यमुख्यरोगरिपुः ।
किञ्चित्स्वास्थ्ययुतः स, अनुवन्दनवन्दनं तनुते ॥२५॥

श्रीगुणशीलाभिख्योऽभ्यस्यति लघुकौमुदीं च रघुवंशम् ।
मुनि धर्मघोषविजयोऽधीते सत्प्रक्रियां हैमीम् ॥२६॥

नाम्ना ललिताङ्गमुनिः, स्तोत्रं भक्तामरं पठन्नास्ते ।
ते सर्वे सद्भक्त्या, वन्दनामावदेयन्ति तराम् ॥२७॥

व्याख्याने पञ्चमाङ्गं, प्रचलति सर्वानुयोगमयमतुलम् ।
मलयाभिधसुन्दर्या-श्चरितञ्च कुतूहलोपेतम् ॥२८॥

मुनिवरसामाचारी-वर्णनरूपा वरौघनिर्युक्तिः ।
उपमितिनामाग्रन्थो, वाच्येते प्रतिदिनञ्चात्र ॥२९॥

श्री श्रेणि-सिद्धिनाम-तप इह विरलं हि श्राविका बह्वः ।
आराधयन्ति विधिना, दूरीकृत देहमोहधियः ॥३०॥

विंशतिसत्स्थान तप-श्चतुर्थभक्तौलिकाऽधुना क्रियते ।
उपवासाः षड्जाता, गुरुदेवप्रभावतस्तस्य ॥३१॥

विपुलयशाश्रीप्रभृति-साध्व्योऽष्टा वेदयन्ति प्रणति ततीः ।
यत्सन्निभित्तवशतोऽस्माकं स्वाध्यायवरलाभः ॥३२॥

धामी चीमनभाई, दृढभक्तिः श्रावकः सुरेशश्च ।
महुवा समस्तसङ्घो, वन्दनमावेदयन्ति मुदा ॥३३॥

श्राद्धो बकुल-झवेरी, कान्ती-मङ्गल-महेन्द्र-श्राद्धवराः ।
प्रतिदिनमनर्घ्यलाभं, लान्ति मुदा सैव तोषकरः ॥३४॥

तेभ्यस्तथा च पत्तन-पुरसत्कश्रीसमस्तसङ्घाय ।
वाच्यो हि धर्मलाभोऽस्माकं कुशलादिवृत्तयुतः ॥३५॥

श्री नेमिनाथ चैत्ये, बिम्बस्थापनमहामहश्चलति ।
सम्प्रति तेन हि सर्वे, तदनुष्ठाने रताः सन्ति ॥३६॥

श्रावणकृष्णप्रतिपदि, प्रभु-प्रतिष्ठाविधि-र्गुरौभावी ।
अवलोकयितुं तं किल, भृशमुत्का मधुपुरीमर्त्याः ॥३७॥

या जनयित्री शासन-सम्राजो विजयधर्मसूरेश्च ।
विद्वीरचन्द्र प्रभृतेः, किन्न हि शस्याऽक्षितिः सेयम् ॥३८॥

यो भवकोटिशतार्जित-पुण्यौर्लब्धोऽस्ति साधनावसरः ।
मनसा वाचा क्रियया, तत्साफल्ये प्रयतितव्यम् ॥३९॥

पञ्चासरमुखभव्य-प्रासादानां हि दर्शनावसरे ।
स्मृतिमानीय विधत्ता-मस्मानपि तत्सुकृतकलितान् ॥४०॥

यत्किमपि स्यात्कार्यं, तन्निःसङ्कोचमत्र लिखितव्यम् ।
नाश्रयितव्यं धैर्य-मेतद्दल प्रतिवचोदाने ॥४१॥

वसुवह्निनभोऽक्षिसमे( सं. २०३८ ), श्रावणशुक्लेत्रयोदशीतिथ्याम् ।
चन्द्रदिने दलमेतत्, प्रीणयतु ज्ञान् मया लिखितम् ॥४२॥

॥ इति शम् ॥

# પુનઃ પ્રકાશન પ્રસંગે

શ્રી કીર્તિકલ્લોલ કાવ્ય પુસ્તક આજથી ૬૦ વર્ષ અગાઉ પ્રકાશિત કરવામાં આવ્યું હતું. તેને જેમનું તેમ રાખીને અહીં મુદ્રિત કરવામાં આવી રહ્યું છે. સં. ૨૦૧૦-૧૧-૧૨ એમ ત્રણ વર્ષના સતત પ્રયત્નના ફલસ્વરૂપે આ કાવ્ય તૈયાર થઈ શક્યું હતું.

આ સમયે પંડિત શ્રી બબુઆઝા તથા પંડિત શ્રી બંસીધર ઝા-આ બંને શાસ્ત્રીજીઓનો પ્રાપ્ત થયેલો સહયોગ સ્મૃતિપથમાં આવ્યા સિવાય રહેતો નથી એટલે કૃતજ્ઞ ભાવે તેઓનો નામોલ્લેખ કરવામાં આવ્યો છે.

ભૂતકાળમાં આ પુસ્તકની બીજી આવૃત્તિ છપાવવા માટેનો ઉપક્રમ થયેલો ખરો અને એકવાર તો એનો અનુવાદ કરીને પણ છપાવવા માટે તો વિચાર થયેલો પણ એનું અંજળ આવ્યું નહિ. આજે શ્રી દેવગુરુની કૃપાથી આનું પ્રકાશન થઈ રહ્યું છે. તે આનંદની વાત છે.

પરમ હિતૈષી પૂ.પં. શ્રી મેરુવિજયજી (આચાર્યશ્રી) મ. તથા અમારા પરમોપકારી પૂજ્ય ગુરુ મહારાજશ્રીએ કરેલા ઉપકારની તો વાત જ થાય એમ નથી આની રચના સમયે તેઓ સતત પ્રેરણા કરતા ન રહ્યા હોત તથા રચાયેલા શ્લોકો જોઈ, સાંભળી આનંદ ઉત્સાહ અને સંતોષ વ્યક્ત કર્યો ન હોત તો આ કાવ્ય આ રીતે તૈયાર ન જ થઈ શક્યું હોત. વળી આ કાવ્યના કેટલાક શ્લોકોને સિદ્ધાન્ત માર્તંડ પૂજ્ય આ.ભ. શ્રી વિજયનન્દનસૂરીશ્વરજી મ.શ્રીની દૃષ્ટિ તળેથી પસાર થવાનું સૌભાગ્ય પણ મળ્યું છે. મનમાં ઊંડે ઊંડે એવી ભાવના છે ખરી કે આ કાવ્ય અનુવાદ સાથે બહાર પાડવું. આ કાવ્યના કેટલાક શ્લોકો તો એવા પ્રાસાદિક તથા કાવ્યની દૃષ્ટિએ ચમત્કાર પૂર્ણ છે કે એના વાચનથી સહૃદયવાચક ભાવ વિભોર બન્યા સિવાય ન જ રહે.

સં. ૨૦૭૩ મહા વદ-૫, ગુરુવાર<br>
૬૯ મો દીક્ષાદિન,<br>
દેવબાગ-પાલડી, અમદાવાદ

—હેમચન્દ્રસૂરિ

॥ प्रथमतीर्थपति-श्रीमदादिनाथस्वामिने नमः ॥

॥ लब्धिभृत् श्री गौतमस्वामिने नमः ॥

# श्रीकीर्तिकल्लोलकाव्यम्

तच्च

शासनसम्राट्-तपागच्छाधिपति-प्रौढप्रतापशालि-पूज्यपादाचार्य-महाराज **श्रीविजयनेमिसूरीश्वरजी** - पट्टालंकार - शास्त्र-विशारद - कविरत्न - पीयूषपाणि - पूज्याचार्यमहाराज - **श्रीविजयामृतसूरीश्वरजी** - शिष्यरत्न - विद्वद्वर्य - पंन्यासप्रवर - **श्रीदेवविजयजी**-गणिवरान्ते वासिना

**हेमचन्द्रविजयेन** मुनिना

विरचितम्

**-: द्रव्यसहायक :-**

शेठ धरमचन्द् दयाचन्द पेढी

सादड़ी (मारवाड़)

सादडी श्रीसंघ तरफथी भेंट

सन् १९५७

-: प्रथमावृत्तिः :-

वीर संवत्-२४८३ विक्रम संवत् -२०१३ नेमि. संवत्-८

-: द्वितीयावृत्तिः :-

विक्रम संवत् -२०७३

—: प्रकाशक :—
शेठ धरमचन्द दयाचन्द वती
शेठ गुमानचन्दजी चुनीलालजी
सादडी ( मारवाड )

—: प्राप्तिस्थान :—
( १ ) शेठ धरमचन्द दयाचन्द
ठि. न्यातीनोरा,
मु. सादडी ( राजस्थान )

( २ ) शा. धनसुखलाल हीरालाल
ठि. रामवाटिका
गिरधरनगर सामे, अमदावाद

( ३ ) जैन प्रकाशन मंदिर
३०९/४, डोशीवाडानी पोळ,
अमदावाद

—: मुद्रक :—
लक्ष्मीबाई नारायण चौधरी
निर्णयसागर प्रेस, २६-२८
कोलभाट स्ट्रीट, मुंबई-२

## ।। श्रीगौतमस्वामिने नमः ।।

### प्रास्ताविकम्

जैन संस्कृति आर्यावर्तनी प्राचीनतम संस्कृतिओमांनी एक छे. तेनो इतिहास जेटलो प्राचीन छे तेटलो ज गंभीर अने महत्त्वपूर्ण छे. आ संस्कृति पूर्वे विशालक्षेत्रमां प्रसरेल तेमज पूर्ण रूपे विकास पामेली हती. तेनो आछो ख्याल भारतनी धरतीपर ठेर ठेर पथरायेलां उज्जवल कलाना आदर्श नमूना भूत पवित्र तीर्थधामोथी थाय छे. तेवा तीर्थोमांनुं एक राजस्थानमां आवेलुं श्रीराणकपुरजी महातीर्थ छे, जेनुं शिल्पस्थापत्य अने उन्नतकलासौन्दर्य सौ कोईने आश्चर्यकित बनावे छे. गोलवाड प्रान्तनी पंचतीर्थिमां आ तीर्थ मुख्य छे.

फालना स्टेशनथी २१ माईल अने सादडी गामथी ६ माईल दूर आडावला (अरवली) पर्वतनी रम्य उपत्यका (तलेटी)मां श्री राणकपुरजी तीर्थ आवेलुं छे. पूर्वे मेवाडमां अने अत्यारे राजस्थानमां गणातुं आ तीर्थ जैनोनी भूतकालीन जाहोजहाली तेमज अजोड शिल्पकलानुं मूर्त दर्शन करावे छे. चारे बाजु सघन वनराजिथी वींटायेलुं आ स्थान खूबज रमणीय छे. पंदरमी सदीमां राणकपुर घणुं ज मोटुं अने समृद्ध नगर हतुं, कारणके ते वखते जैनोना ज केवल ३००० घरो हतां, तो बीजा वर्णना पण घणां ज घरो हशे तेमां शंका नथी. पं. श्री मेहकविए सं. १४९९मां रचेला 'श्रीराणिगपुर चतुर्मुख प्रासादस्तवन'मां तेओ राणकपुरनुं आंखोए जोयेलुं वर्णन करतां कहे छे. "राणकपुर जोईने मनमां घणो ज आनन्द अने उल्लास थाय छे. आ नगर अणहिलपुर पाटण जेवुं छे. तेना गढ मन्दिर पोलो वगेरे अत्यन्त सुन्दर छे. नगरनी वचमां नदीना निर्मल नीर वहे छे. कुवा, वाव-वाडी-दुकानो अने जिनमन्दिर घणां छे. वली अहिं अढारे वर्णना लोको अने लक्ष्मीवंत वेपारीओ घणां रहे छे, तेमज पुण्यवंतोनो तो पार ज नथी-बहु वसे छे. तेमां संघवी धरणाशा मुख्य छे. जेना दान, पुण्य, अने जस जगमां विस्तरायेलां छे, अने जिनभवननो उद्धारक छे, तेनी मातानुं नाम कामलदे छे जे रतनसिंह अने धरणिंद नामना पुत्ररत्नोने जन्म आपी धन्य धन्य गवाय

छे" आ वर्णनथी पंदरमां सैकामां राणकपुर केवुं विशाल नगर हशे तेनो सुन्दर ख्याल मले छे.

श्री मेह कविना कथन मुजब पंदरमी सदीमां अहिं सात जिनमन्दिर हतां. त्यारपछी १९५५मां श्री ज्ञानविमलसूरि म.नी तीर्थमालामां अने अढारमासैकामां पं. श्रीमहिमाकविए रचेली तीर्थमालामां अहिं पांच जिनमन्दिर होवानो उल्लेख छे. अत्यारे अहिं त्रण जिनमन्दिर छे.

लगभग ५९ वीघाना विशाल कंपाउंडमां त्रण जिनमन्दिर, त्रण धर्मशाला, भोजनशाला, उन्नत नगारखानुं, बगीचो, रेंट, कुंड विगेरे विद्यमान छे. कंपाउंड चारे बाजु मजबूत कोटथी घेरायेलुं छे. त्रण जिनमन्दिरोमां मुख्य श्री आदिनाथ भगवाननुं अति मनोहर चैत्य छे. आनी बारीक कोरणी अने वैविध्यभर्युं कलाकौशल भलभलाने मंत्रमुग्ध बनावी दे छे. प्राग्वाटकुलावतंस परमार्हत श्री धरणाशाहे बंधावेल आ मन्दिर जाणे स्वर्गमांथी कोई देवविमान उतरी न आव्युं होय तेम भासे छे. श्री हीरविजयसूरि रासमां आ तीर्थनो महिमा गातां श्री ऋषभदासजी कविए कह्युं छे के :—

"गढ आबु नवि फरसीयो, न सुण्यो हीरनो रास,
राणकपुर नर नवि गयो, त्रिण्ये गर्भावास"

खरेखर आबु अने राणकपुरनी यात्रा जेणे नथी करी तेनुं जीवतर नकामुं छे, ए लोकवाणीनुं कथन ए तीर्थोनां साक्षात् दर्शन कर्या पछी जरूर यथार्थ लागे छे. तेमज मारवाडी भाषामां पण आ तीर्थ माटे एक कहेवत प्रसिद्ध छे 'टुकडो टुकडो खाणो, पण राणकपुरजी जाणो' अर्थात् गमे तेटलुं कष्ट वेठीने, दुःख सहन करीने पण श्री राणकपुरजीनी यात्रा जीवनमां जरूर करवी..

कंपाऊंडमां प्रवेश करतां मुख्य दरवाजामां पेसतां पंहेला 'मघाई' नामनी नदी आवे छे, कलकल शब्द करती प्रभु दरबारमां जतां भावुकोनुं स्वागत न करती होय तेम वही रही छे.

**त्रैलोक्य दीपक मन्दिर—**

धरणविहार लगभग ४८००० चोरस फीटना विस्तारमां आवेलुं छे. एने नलिनीगुल्मविमान, त्रिभुवनदीपक-चतुर्मुख प्रासाद आदि

नामोथी पण संबोधाय छे. मन्दिरनी प्रथमभूमिका जमीनना समतलथी ४०, ४५ फीट ऊँची छे. मन्दिरमां प्रवेश करतां पहेलां वीश पचीश पगथीयां चड्या पछी एक चोकी आवे छे, तेनी छतमां एकज मस्तकमां जोडायेली पांच पूतलीओ कोतरेली छे. तेनां अंगमरोड अने शिल्पलावण्य भलभलाने आश्चर्यमग्न बनावी दे छे. अहिं आजुबाजु बीजां पण अनेक भावो कोतरेलां छे. तेमज छतमां स्वस्तिक, नंद्यावर्त अने यंत्र वगेरे पण कोतर्यां छे. त्यांथी आगल चालतां प्रवेशद्वारमां गया पछी बंन्ने बाजु भोंयरामां बिराजमान नानी मोटी प्रभु मूर्तिओनां दर्शन थाय छे. त्यांथी आगल ऊपरनी छतमां रहेलां कल्पवृक्षना पत्रनी अतिनाजुक बेनमून कोरणी, स्तंभोनुं शिल्पलालित्य, एकज पत्थरमां आरपार कोतरी अद्धर गोठवेलां तोरणो वगेरे जोईने मन अमन्दआनन्द-सागरमां तणावा मांडे छे. आ मन्दिरने चारे बाजु प्रवेशद्वार छे. तेमां पश्चिम तरफनुं द्वार मुख्य गणाय छे. आखुं मन्दिर सेवाडी अने सोनाणानी खानना आरसपाणथी बनाववामां आव्युं छे.

मन्दिरमां फरती ८० देवकुलिकाओ छे. जेमां ७६ देरीओ नानी तेमज शिखरबंधी छे. बधी एकसरखी छे. अने चार मोटी देरीओ छे. वली चोकमां चारे दिशामां एक एक महाधर प्रासाद छे. जेना नाम 'कर्माप्रथम महाधर चैत्य' 'कर्णाप्रथममहाधर चैत्य' 'स्तंभनकावतार चैत्य' अने 'अरिघातचतुर्थ महाधर चैत्य' आ प्रमाणे उपलब्ध थाय छे. आ रीते अहिं ८४ देरीओ छे. देरीओमां भूत, भविष्य अने वर्तमान त्रणे चोवीशीना प्रतिमाजी भगवंत बिराजमान छे. पहेली देरीमां श्री सोमसुन्दरसूरि म.नी पीला-पाषाणनी मूर्ति मूलनायक भगवाननी बाजुना गोखलामां बिराजमान छे. मूल गभाराना जलवटमां पण तेओनी एक मूर्ति बिराजमान छे.

मूलमन्दिरमां श्री ऋषभदेव भगवाननी लगभग सवाचार फीट ऊँची एटले के परिकर साथे आशरे आठ फीट ऊँची चार मनोहर मूर्तिओ बिराजमान छे. पूर्व पश्चिम अने दक्षिण दिशाना मूलनायकजीनी मूर्ति ऊपर सं. १४९८नो लेख छे. केवल उत्तर दिशानी मूर्ति ऊपर सं. १६७९नो लेख छे. तेमां राणा कर्णसिंहना राज्यमां श्री देवसूरिजी महाराजना उपदेशथी प्रतिष्ठा थयानो उल्लेख

छे. आ उपरथी एम जणाय छे के पू.आ.म. श्री सोमसुन्दर-सूरिजी म. ए एकज समयमां चारे जिनबिंबोनी प्रतिष्ठा करी हशे, परन्तु उत्तरदिशाना मूलनायकजीने कोई कारणसर बदलवा पड्या हशे. मूलमंदिरनी चारे बाजु चार विशाल मंडपो छे. तेना मुख्यमंडप तथा रंगमंडप जुदा जुदा छे.

मन्दिरमां नकशीथी भरपूर १४४४ थांभलाओ छे. मूलनायकनी आगल मंडपमां रहेली नाच करती अने वाद्य वगाडती देवीओ तो साचेज नाच करती करती संगीत न गाती होय तेम लागे छे. मन्दिरमां शिल्पकलाथी शोभतां २४ रंगमंडपो छे.

मूलनायकनी डाबी बाजु शिखरमां अधिष्ठायकदेवदेवीनी मूर्ति कोतरेली छे. आ अधिष्ठायक देवनो अहिं घणोज प्रभाव छे. जमणी बाजु चोकमां पांचसो वर्षनुं जूनुं 'रायणवृक्ष' अने तेनी नीचे श्री आदिनाथ भ.ना पादुका श्री शत्रुंजय तीर्थाधिराजनी याद आपे छे. श्री समेतशिखरजीनी नकशीयुक्त रचना, श्रीअष्टापदजीनी (अधूरी) अद्भुतरचना, बे शिलाओ ऊपर यंत्राकारे गोठवेली श्रीनंदीश्वरद्वीपनी कलापूर्णरचना, कलाना भंडारसभा झुम्मरो, तेमज सहस्त्रकूटनी मनोरम रचना वगेरे जोई मन घणुं ज आह्लादित बने छे.

देरासरनी भमतीमां एक भींत ऊपर सहस्त्रफणा श्रीपार्श्वनाथ भ.नुं शिल्प एक अखंड शिला ऊपर कोतरेलुं छे. काउस्सग्गध्याने श्री पार्श्वनाथ भ. नागेन्द्रनी पीठ ऊपर ऊभेला छे. नागनागणीओ आंटा लगावीने १००८ छत्र भगवंतनी ऊपर धारण कर्या छे. आ शिल्प शिल्पीनी समग्र शक्तिथी उपज्युं होय तेम लागे छे. तेना ऊपर सं. १९०३नो लेख छे.

मूलनायकना सभामंडपना थांभलामां श्रेष्ठिवर श्रीधरणाशा अने स्थपतिवर श्रीदेपानी ऊभी मूर्तिओ प्रतिमाजीना हरसमये दर्शन करी शके एवी गोठवणपूर्वक कोतरेली छे. एक खूणाना देरासरमां पाघडी खेश आदि वस्त्राभूषणोथी सज्जित हाथमां माला राखेली श्रीधरणाशानी मूर्ति पण दृष्टिगोचर थाय छे.

थांभलाओनी एकसरखी गोठवणी, एकसरखा रंगमंडप, सभामंडप, मुख्य मंडप, अने एकसरखी देरीओ जोतां शिल्पीनी

अनुपम कलाकुशलतानो सारो ख्याल मले छे.

मूलमन्दिर त्रण मालनुं छे. तेमां बीजा अने त्रीजा मालमां श्री चौमुखजीनी मूर्तिओ बिराजमान छे. समवसरणना देरासर ऊपर समवसरणनुं देरासर अने अष्टापदजीना देरासर ऊपर श्रीचौमुखजीनुं देरासर छे. मन्दिरनुं शिखर ऊंचुं अने कोरणीथी भरपूर छे ऊपरना मालोमां फर्या पछी नीचे उतरवुं होय तो नीचे आववानो मार्ग शोधवो मुश्केल पडे छे. आवी कलामय छे अहिंनी बांधणी. आखा मन्दिरने जोतां धरणाशाहे करेल उदात्तधनव्यय अने शिल्पी श्री देपाए करेलु बुद्धिपूर्वकनो शक्तिव्यय नजरे पडे छे.

## मन्दिर बंधावनार धरणाशा–

धनकुबेर धरणाशाह पहेलां मारवाड (सिरोही स्टेट)ना नांदिया गामना वतनी हता. तेमनी मातानुं नाम कामलदे अने पितानुं नाम कुरपाल हतुं. तेमने धारलदे नामनी संस्कारी पत्नी अने जाज्ञा तथा जावड नामना बे पुत्ररत्नो हतां. तेमना मोटाभाईनुं नाम रत्नाशाह हतुं, तेओने पण रत्नादे नामनी पत्नी अने लाखा-मना-सोना अने सालिग नामना चार पुत्रो हतां. कहेवायछे के एक वखत मांडवगढना बादशाहनो पुत्र तेना पिताथी रीसाईने राज्य छोडी चाल्यो जतो हतो. रस्तामां नांदिया गाम आव्युं. त्यां रत्नाशाह अने धरणाशाह बंने भाईओए तेने घणुं समजावी एना घेर पाछो मोकल्यो. बादशाहने आ वातनी जाण थतां ते खूबज खुश थयो अने बंने भाईओने मानपूर्वक बोलावी पोताना दरबारमां राख्या. बुद्धिबलथी अल्पसमयमांज तेओ राजा अने प्रजाना मान्य थया. आ वात ईर्ष्यालु लोकोने न रुची. तेओए साची खोटी रीते राजाना कान भंभेर्या, काचा कानना बादशाहे तेओने गुनो न होवा छतां दंडित कर्या. महा महेनते तेओ दंड भरी त्यांथी राणकपुरनी दक्षिणे आवेला मानगढ (पालगढ) गाममां आवीने वस्या.

त्यारबाद धरणाशानी उज्जवल कीर्तिने सांभलीने मेवाडना महाराणाए तेमने पोताने त्यां बोलावी सारा स्थाने स्थाप्यां. अने शेठनी प्रतिभानो परिचय थया पछी मंत्रीपदनो भार पण तेमने शिरे सोंप्यो. कार्यदक्ष शेठे अल्प समयमां नीतिपूर्वक राज्य कार्य करतां

सारुं द्रव्य एकठुं कर्युं, अने बृहत्तपागच्छीयाचार्य महाराज श्री सोमसुन्दरसूरिजी म.ना उपदेशथी तेओ धार्मिक कार्योमां विशेष रुचिवाला बन्या. सं. १७४६मां श्री शीलविजयजी म.ए रचेल तीर्थमालाना उल्लेख प्रमाणे श्रीधरणाशाहे ३२ वर्षनी भर जुवानीमां श्रीशत्रुंजयनी यात्राए आवेला ३२ गामना संघोनी वच्चे संघतिलक करावी चोथुं श्रीब्रह्मचर्यव्रत उच्चर्युं. त्यां तेओए दानादि शुभ कार्योने विषे अढलक द्रव्य खर्च्युं.

त्यारपछी आ. श्री सोमसुन्दरसूरीश्वरजी म.ना सदुपदेशथी श्री धरणाशाहने जिनमन्दिर बंधाववानो मनोरथ थयो. रात्रे देवीए नलिनी गुल्मविमाननुं स्वप्न आप्युं. स्वप्नुं जोई विमानना आकारवालुं जिनालय बंधाववानो निश्चय कर्यो. मन्दिर माटे सादडी गाम पासेनी जमीन पसंद करी महाराणा कुंभा पासेथी खरीदी लीधी. राणाए जिनमन्दिरनी साथे गाम वसाववानी शरते जमीन आपी. गामनुं नाम राणाना नाम ऊपरथी 'राणकपुर' राखवामां आव्युं.

कहेवाय छे के त्यारबाद कुलदेवी ए तेमने एक निधान बताव्यो अने पछीथी धरणाशाहे मन्दिरना नकशा माटे पचासेक मोटा मोटा शिल्पीओने बोलाव्या. बधा शिल्पीओ नाना मोटा अनेक जातनां नकशा दोरी लाव्या, परन्तु तेमांनो एक पण नकशो शेठने गम्यो नहीं. आखरे मुंडाराना शिल्पी देपाए नकशो दोरी शेठने बताव्यो. आ नकशो नलिनी गुल्मविमानना आकारवालो होवाथी शेठने गमी गयो. कहे छे के श्री देपाए नकशो दोर्यो एमां पण देवीनी सहाय हती-कारण के ते समये देपो संन्यासी जेवो अने सामान्य शिल्पी हतो. ते पछी धरणविहारनो पायो नांखवामां आव्यो ते पायो सात माथोडां ऊंडो खोदवामां आव्यो हतो. तेमां कस्तूरी, केशर, हीरा, माणेक, सुवर्ण आदि बहुमूल्य वस्तुओ नांखवामां आवी. श्री शीलविजयजी म.नां कथन मुजब सं. १४४६मां मन्दिरनो पायो नंखायो होय तो सं. १४९६मां मन्दिरनी प्रतिष्ठा थई होवाथी पचास वर्ष सुधी मन्दिरनुं काम चाल्युं हशे. वली श्री ज्ञानविमलसूरि म.ना स्तवनमां सं. १४९५मां धरणविहारनो पायो नंखायो अने सं. १४९७मां प्रतिष्ठा थयानो उल्लेख छे, ए प्रमाणे तो आवुं विशाल मन्दिर घणां टूंक समयमांज

दैविकप्रभावथी थयुं होय तो ए पण असंभवित न कहेवाय. तेमज एकमत प्रमाणे ६४ वर्ष अने बीजा मत प्रमाणे ६२ वर्ष सुधी धरणविहारनुं काम चाल्युं तेवो निर्देश छे. गमे तेम होय परन्तु आवा विशाल अने नकशीदार मन्दिरने बंधातां जरूर घणां वर्षो लाग्यां हशे तेमां शंका नथी. पहेला अहिं ८४ भूगर्भ ( भोंयरा ) हता. पण वर्तमानमां पांच भोंयरा खुल्लां छे.

## मूल नायकनी प्रतिष्ठा–

आवुं विशाल अने अनुपम मन्दिर बंधायुं होवा छतां धरणाशानी भावना तो सात मालनुं मन्दिर बंधाववानी हती, पण तेम करवा जतां कदाच प्रतिष्ठानो लाभ चूकी न जवाय ए आशयथी त्रण माल लगभग पूरा थयां एटलामांज पू. आचार्यदेवेश श्री सोमसुन्दरसूरिजी म.ना हाथे प्रतिष्ठा कराववानो निर्णय कर्यो. धरणाशेठनी विनंतिथी आचार्यश्री धरणाशाए बंधावेल विशाल पौषधशालामां पधार्या. तेमनी साथे ५०० साधुओनो परिवार हतो. तेमां चार सूरिवरो तेमज नव उपाध्याय महाराजो हता. सं. १४९८ फागण वद ५ना शुभ दिवसे आ.म. श्री सोमसुन्दरसूरिजी म.ए सूर्यसम तेजस्वी मूलनायक श्री आदिनाथ भ.ना चार बिंबोनी प्रतिष्ठा करी.

मूलनायकना दरवाजा पासे विशालकाय लेख छे. तेमां त्रैलोक्यदीपक चतुर्मुख युगादीश्वर प्रासादनी सं. १४९६मां प्रतिष्ठा कर्यानो उल्लेख छे. वली श्री ज्ञानविमलसूरिजी म. ए रचेल 'श्री राणकपुर तीर्थ स्तवन'मां सं. १४९७ मां प्रभुजीनी प्रतिष्ठा कर्यानुं जणाव्युं छे. पण मूल नायकजीनी मूर्ति ऊपर सं.१४९८नो लेख होवाथी प्रभुजीनी प्रतिष्ठा तो १४९८मां ज थई हशे. मूल नायकजीना प्रतिष्ठा समये बीजां ३४००० प्रतिमाजी महाराजनी प्रतिष्ठा करवामां आवी हती. धरणाशानी अंतिम घडीए तेमना मोटा भाई रत्नाशाहे तेमनी अभिलाषाने बनती शक्तिए पूर्ण करवानुं वचन आप्युं हतुं अने तदनुसार पाछलनां आठ दश वर्ष सुधी रतनाशाहे जे काम कराव्युं ते पहेलां करतां वधु कलामय बने तेवी रीते कराव्युं होय तेम रत्नाशाहे करावेलां कामो जोवाथी जणाय छे. एक शिलालेख ऊपरथी श्रीहीरसूरीश्वरजी म.ना उपदेशथी मेघनाद महामंडप बंधावरावी आ

मन्दिरनो उद्धार थयो छे. देरीओना मूल नायकजी ऊपर पण बीजा बीजा सद्गृहस्थो तरफथी प्रतिष्ठा थयानो शिलालेख मली आवे छे.

### श्री पार्श्वनाथ भ.नुं मन्दिर–

श्री आदिनाथ भ.ना मन्दिरथी थोडे दूर पश्चिममां जमणी बाजु श्री पार्श्वनाथ भ.नुं सुन्दर मन्दिर छे. मूल गभारामां परिकर-वाली श्री पार्श्वनाथ भ.नी अद्भुत प्रतिमा आशरे २॥ फीट ऊंची विराजमान छे. मन्दिरनी चारे तरफनी भींत ऊपर युगलीयांओनी नग्न पूतलीओ जोवामां आवे छे. तेथी युगलिक पुरुषोनी स्वाभाविक अवस्थानुं दृश्य होय तेम लागे छे. केटलांक विद्वानो आने कामशास्त्रीय चोरासी आसनो कोतर्यां छे एम कहे छे. त्यारे केटलांक श्री स्थूलिभद्रजी म. कोशानी चित्रशालामां चोमासु रह्यां ते समये कोशाए करेल हावभावादिनुं दृश्य होवानुं जणावे छे. तेमज केटलांक श्री नेमिनाथ भ.नी जानना वरघोडानुं दृश्य बतावे छे. अने केटलांक सुन्दर कलामय दृश्य ऊपर दोषना परिहार माटे आवुं रूप आलेखाय छे एवुं पण माने छे. जेम राजाओनी अश्वशालामां सारा अश्वो ऊपर दृष्टिदोषना परिहार माटे आगलना भागमां घेटो बांधवामां आवतो हतो. आ मन्दिर सोमल पोरवाड नामना धरणाशाना मुनीमे बंधाव्युं होवानुं जाणवा मले छे. आ मन्दिरनी कोरणी मूल मन्दिरना जेवी ज छे.

### श्री नेमिनाथ भ.नुं मन्दिर–

धरणविहारनी बराबर सामे पश्चिममां थोडे दूर श्री नेमिनाथ भ.नुं मन्दिर आवेलुं छे. मूल गभारामां श्री नेमिनाथ भ.नी श्यामवर्णी प्रतिमा खूबज आह्लादक छे. मन्दिर शिखरबंधी छे. शिल्पकलानी दृष्टिए सादु होवा छतां मनोहर छे. आने 'सलोंटाका मन्दिर' केटलांक कहे छे. एटले के राणकपुरमां काम करता सलाटोए आ मन्दिर पोताना खर्चे बांध्युं छें. कोटनी बहार दक्षिण दिशामां प्राचीन श्री सूर्यमन्दिर छे. नदीना किनारा ऊपर भातभातनी कोरणीथी सुशोभित आ मन्दिर हालमां जीर्ण छे. कहेवाय छे के आ मन्दिर महाराणा कुंभाए बंधाव्युं हतुं.

घणां वर्षोथी सादडी श्री संघे आ तीर्थनो वहिवट अमदावाद श्री आणंदजी कल्याणजी पेढीने सोंपेलो छे. सादडीमां कार्यालय राखी श्री राणकपुरजी, गामनुं मुख्य श्री चिन्तामणिजीनुं देरासर तथा बहार श्री चन्द्रप्रभुजीनुं देरासर, राजपुर देरासर अने मादा देरासरनो वहिवट संभाले छे.

प्रायः सं. १९७२मां पू. शासनसम्राट् तपागच्छाधिपति आ.म.श्री विजयनेमिसूरीश्वरजी म. आदि विहार करतां करतां मेवाडथी अत्रे पधार्या. ते वखते देवविमान जेवा श्री धरणविहारना जीर्णोद्धारनी भावना थयेली. पण त्यारपछी जेसलमेर, फलोधी, कापरडाजी, पाली वगेरे स्थलोए विचरी तेओने गुजरातमां पधारवानो प्रसंग आव्यो. पछी सं. १९७६मां शेठ साराभाई डाह्याभाईना श्री केशरीयाजीना संघमां पधार्या. अने उदयपुर चोमासुं करी त्यांथी संघवी अर्जुनलालजी मुणावतना संघमां श्री राणकपुरजी पधार्या. ते वखते सादडी मारवाड़ना तथा अमदावादना सद्गृहस्थोने जीर्णोद्धार माटे उपदेश आप्यो अने तमाम भोंयरामांथी प्रतिमाजी महाराजने बहार पधराव्या. देरीओमां प्रतिष्ठा करावववानो निर्णय पण थयेल. तेमज महोत्सव तथा नोकारशीओ पण नोंधाई गयेल. परन्तु कुदरते तेओश्रीजीने जाबालवाला शा. रूपचन्दजी तथा मूलचन्दजीना श्री सिद्धगिरिजीना संघमां गुजरात पधारवानुं थयुं. बाद तेओश्रीना उपदेशथी शेठ आणंदजी कल्याणजीनी संस्था तरफथी शेठ कस्तूरभाई लालभाईनी देखरेख नीचे आ तीर्थनो प्रशस्त रूपे जीर्णोद्धार करवामां आव्यो.

सं. २००७नी सालमां ज्यारे जूनुं जीर्ण थयेलुं परिकर बदलीने तेने स्थाने नवीन परिकर मूकवामां आव्युं. ते समये जूना परिकरना नीचेना भागमां एक नानी पीठिका ऊपर आरसनुं कमल अने तेमां चौमुखजीनी सुन्दर प्रतिमाजी बिराजमान थयेलां निकल्यां हतां. तेमज सोपारी, पैसो, चोखा वगेरे पण निकल्युं हतुं. चौमुखजी, सोपारी पैसो विगेरे पाछा अन्दर तेने ते स्थाने पधरावी दीधां हतां. मूल स्थानने साचववा अन्दर चौमुखजी पधराव्या होय तेम लागे छे. जे बहारना शिलालेखमां १४९६नी संवत् छे ते कदाच आ चौमुखजीनी प्रतिष्ठानो समय होई शके.

## श्री राणकपुरजीनी पुनः प्रतिष्ठा–

पू. शासन सम्राट् श्रीजीनी आ तीर्थनी अद्भुत रीते प्रतिष्ठा करवानी अभिलाषा हती. पण कालनी विचित्र गतिए ते इच्छा अपूर्ण ज राखी, अंते तेओश्रीना पट्टालंकार सिद्धान्तवाचस्पति पू.आ.म. श्री विजयोदयसूरीश्वरजी म., न्यायवाचस्पति पू.आ.म. श्री नन्दन-सूरीश्वरजी म., समयज्ञ पू.आ.म. श्री विज्ञानसूरीश्वरजी म., तथा प्राकृतविशारद पू.आ.म. श्री कस्तूरसूरिजी म. पोताना शिष्य प्रशिष्यादिपरिवार सहित सादडी श्री संघ तथा श्री आणंदजी कल्याणजी पेढीना आग्रहथी अहिं पधार्या. अने तेओना पवित्र हस्ते श्री राणकपुरजी तीर्थमां प्रतिष्ठानी मांगलिक क्रियाओ करवामां आवी. महोत्सवमां अनेक गच्छना, अनेक समुदायना साधु-साध्वी महाराजनो आशरे ३५०नो परिवार पधार्यो हतो. जेमां पं. श्री विकाशविजयजी म. आदि (पू.आ.श्री वल्लभसूरिजी म.ना) मुनि श्री प्रद्योतनविजयजी म. आदि (पू. आ. श्री प्रेमसूरिजी म.ना) मुनिराज श्री दर्शनविजयजी म. त्रिपुटी आदि मुनिश्री दर्शन-विजयजी म. आदि (आ. श्री भक्तिसूरिजी म.ना) मुनि श्री कान्ति सागरजी (खरतरगच्छी) वगेरे वगेरे हता. तेमज लाख जेटली मानव मेदनी एकत्रित थई हती. मालवा, मेवाड-काठियावाड, गुजरात, महाराष्ट्र, कच्छ आदि दूर देशोथी मोटो जनसमुदाय प्रतिष्ठा-महोत्सव जोवा राणकपुरमां आव्यो हतो. अहिंनुं प्राकृतिक सौन्दर्य निहाली सौ कोई घणां ज आनन्दित बन्यां हता. आ महोत्सव एक महामहोत्सवरूपे हतो. महोत्सवने सफल बनाववा सादडी श्री संघनी पूर्ण जहेमत हती अने आ. क. पेढीनो सारो साथ हतो. तेओए आवा जंगलमां पण करेली सुन्दर सगवडता जोई भलभला दिङ्मूढ बनी गया हता. धनाढ्य लोको पण तंबु अने कंताननी ओरडीओमां बंगला करतां विशेष आनन्दनो अनुभव करता. ते समये अहिं कीडीनी माफक मानव महेरामण उभरायो हतो. कंताननी ओरडीनी वात तो दूर रही परन्तु बेसवा जेटली जग्या जो मली जती तो पण लोको पोताने भाग्यशाली समजता.

## सादडी श्री संघे उजवेल अपूर्व प्रतिष्ठा-महोत्सव–

सादडी श्री संघ तरफथी अग्यार दिवस सुधी नोकारशी थई हती. तेमां कुंभस्थापनना दिवसे-शा. छगनलालजी पुखराजजी ( धरणाशाना वंशज ) तरफथी नोकारशी करवामां आवी हती. सादडी श्री संघे जे उत्साह संप अने उदारताथी महोत्सव उजव्यो ते बीजाओ माटे अनुकरणीय तथा अनुमोदनीय हतो. लगभग लाख जेटली मानव मेदनी, गिरिराज श्री सिद्धाचलजी अने रैवता-चलजीनी भव्य रचना, कीर्तिस्तंभ, आशरे चालीस हजारना खर्चे बंधावेल देवविमान जेवां मंडप, ( जेमां दश हजार माणसो खुशीथी बेसी शके ) तेमां गोठवेल विजलीथी हालता चालता भावबोधक चित्रो श्री पावापुरीजीनी मनोहररचना, अने विजलीथी दोडती रेलगाडी वगेरे आ महोत्सवना अविस्मरणीय संस्मरणो हतां. मारवाडी फा. व. १२थी महोत्सवनो प्रारंभ अने फा. सु. ६ना रोज पूर्णाहूति थई हती. वीर सं. २४७९ अने विक्रम सं. २००९ ना फा. सु. ५ने बुधवारना शुभ दिवसे श्री धरणविहारमां ( ऊपर, नीचे अने भमतीमां ) तथा श्री पार्श्वनाथ भ.ना मंदिरमां, अने श्री नेमिनाथ भ.ना मंदिरमां अपूर्व उत्साहथी प्रतिष्ठा करवामां आवी.

ते वखते "ॐ पुण्याहं पुण्याहं"ना पावननादथी आखुं ये वन शब्दायमान बन्युं हतुं. कदी न भूलाय तेवुं हतुं ते वखतनुं अद्भुत दृश्य ! धरणाशाना चौदमी पेढीना वंशज शा. छगनलालजी तथा पुखराजजी हालमां घाणेरावमां रहे छे. अत्यार सुधी धरणाशाना वंशजो धरण विहार ऊपर धजा चडावे छे. अने प्रभुजीने पहेली पूजा पण तेओ करे छे. तेज रीते प्रतिष्ठा वखते पण धजा तेओ तरफथी चडी हती. आ धजा पण हजार रुपियानी आशरे २१ फीट लांबी तथा ४।। फीट पहोली हती.

श्री राणकपुरजी तीर्थमां कायम माटे चैत्र व. १० ( गुजराती फा. व. १० ) नो मोटो मेलो भरातो. आजुबाजुना गामोथी हजारो यात्रिको अहिं आवी श्री युगादिदेवनां दर्शन पूजन करी खूबज आनन्दित बनतां. खावा माटे केटलांक साथे भातुं लावतां तो केटलांक बे चार भेगा मलीने रसोई करता अने कोई वखत कोई

भाग्यशाली तरफथी नोकारशी पण थती. प्रतिष्ठा पछी मेलानो दिवस फा. सु. ५ (प्रतिष्ठादिन) निश्चित करवामां आव्यो छे. दर पूनमना दिवसे पण सादडी वाली लुणावा आदि गामोथी घणां माणसो यात्रा करवा आवे छे.

प्रतिष्ठा पछी आ तीर्थनी जाहोजहाली घणी ज वधी छे. कोईक दिवस ज खाली जतो हशे के जे दिवसे कोई यात्रालु राणकपुरना आंगणे न आव्यो होय.

तेवा विश्वविख्यात तीर्थनुं तेमज तेमां उजवायेल अनुपम प्रतिष्ठा महोत्सवनुं वर्णन लखवा में यत्किंचित्प्रयास कर्यो छे पण तेवी लोकोत्तर गुणविशिष्ट वस्तुनुं वास्तविक स्वरूप लखवा आ जड लेखनी क्यांथी सफल थई शके. आमां करेल वर्णन तो केवल दिग्दर्शन मात्र ज छे. प्रतिष्ठामहोत्सवनुं विशेषवर्णन शा. हस्तीमलजी कोठारीए 'श्री राणकपुर तीर्थप्रतिष्ठा दिग्दर्शन' नामना पुस्तकमां करेलुं छे. तेओए रचेला हिन्दी पद्योने वांचतां प्रतिष्ठासमयनुं आबेहूब दृश्य आंख सामे खडुं थई जाय छे. पद्यो सरल अने रोचक होवा उपरांत अर्थलालित्यवालां छे.

जेओनी प्रेरणा तेमज सहायताथी आ वर्णन लखवा प्रेरायो अने लखी शक्यो ते परमपूज्य परमोपकारी पंन्यासप्रवर श्री मेरूविजयजी गणिवर्य तथा पूज्यपाद गुरुवर्य्य पंन्यासप्रवर श्री देवविजयजी गणिवरने ज आ कृतिनुं सघलुं श्रेय घटे छे.

जेमनी आर्थिक सहायताथी आ पुस्तक प्रकाशित थई रहेल छे ते सादडी श्री संघे करेल ज्ञान भक्ति खरेखर अनुमोदनीय छे.

आ वर्णन लखवामां राणकपुरना मुनीमजी शा. हरगोवन भाईए आपेल तीर्थ सम्बन्धी माहिती तेमज 'राणकपुरनी पंचतीर्थी' विगेरेनो उपयोग कर्यो छे.

अन्ते छद्मस्थपणाने लईने अगर मुद्रणदोषथी कांई पण अशुद्धि रही जवा पामी होय तो ते विशेषज्ञो सुधारीने वांचे तथा आवश्यक सुधारा अमने जणावी उपकृत करे.

वि.सं. २०१२
विजयादशमी — विनीतो
नागजी भूधरनी पोल, अमदावाद — मुनि हेमचन्द्रविजयः ।

# काव्य कर्ता का परिचय

इस 'कीर्तिकल्लोलकाव्य' की रचनाको देखते हुए किसी प्रौढ कलमसे लिखा हुआ प्रतीत होता है । पर जब देखते सूनते हैं तब तो यह वर्णन १८ वर्ष की उम्रवाले पूज्य मुनिराजने लिखा है, तब आश्चर्य होने लगता है । सचमुच यह आपकी प्रथम कृति होने पर भी इसकी प्रासादिक रचना छंदोवैविध्य अलंकारों की जमावट देखते हुए आशास्पद मालुम होती है ।

इस काव्य के ऐसे निर्माता के जीवन विषय में हमने झांकी की तो प्रतीत हुआ कि, यह बालमुनि श्री हेमचन्द्रविजयजी का जन्म गुजरात की पुण्यभूमि पर भरूच जिला का जंबूसर गाँव के निकटवर्ती 'अणखी' गाँव में वि.सं. १९९३ के पोष सुदि १५ मंगलवार को हुआ था । इनके पिता का नाम हीराभाई जो दीपचंद शेठ के पुत्र हैं और माता का नाम है प्रभावती देवी मातापिताने पुत्र का नाम हसमुख रक्खा । शा. हीराभाई व्यापार निमित्त अपने जन्मभूमि से साबरमती गाँव में आकर रहते थे । संस्कारी मातापिता का सुसंस्कार पुत्र के ऊपर पडने लगा और उस संस्कार की प्रवृत्ति प्रतिदिन द्विगुणित बढ़ने लगी ।

भाई हसमुख अपने बड़े बहन भाई इन्दुबेन एवं धनसुख के साथ विनोद करता हुआ बढ़ने लगा । मातापिता की प्रेरणा पूर्वजन्म का संस्कार और पू. साधु महाराजों के उपदेशसे भाई हसमुख के हृदयमें धार्मिक भावना का सञ्चार हुआ । सं. २००२ में शास्त्रविशारद कविरत्न पूज्य आ. श्री विजयामृतसूरीश्वरजी म., और पू. मुनिराज श्री देवविजयजी म. आदि का चातुर्मास साबरमतीमें हुआ । तब भाई हसमुख उनके पास धार्मिक अभ्यास करने जाया करता था । जब कि २००३ में शासनसम्राट् पूज्यपाद आ.म. श्री विजयनेमिसूरीश्वरजी म. आदि चातुर्मास के लिये साबरमती (रामनगर) पधारे, उस समय शासनसम्राट् के प्रशिष्य पू. मुनिराज

(हाल पंन्यासप्रवर) श्री मेरुविजयजी म. और पू. मुनिवर्य (हाल पंन्यासजी) श्री देवविजयजी म. का विशेष समागम हुआ । इस समागमसे भाई हसमुख के दिलमें सोया हुआ वैराग्यभाव जाग ऊठा । पू. महाराजश्री के उपदेशने आत्मा के ऊपर छाई हुई मोहकी जाल काट दी ।

अब भाई हसमुख इस असार संसार को छोड़कर दीक्षित बनने की बातचीत करने लगा । किन्तु इनकी छोटी उम्र के कारण मातापिताने दीक्षा की अनुमति नहीं दी । तब भाई हसमुखने एक वर्ष तक मातापिता की अनुज्ञा से पू. महाराजश्रीकी साथ रहकर पंच प्रतिक्रमण, चार प्रकरण, चार कर्मग्रन्थ और संस्कृत के दो भाग आदि का अध्ययन किया ।

जब भाई हसमुखने वारंवार मातापिता के पास दीक्षा के लिये अनुमति मांगी तब उनका उत्कट वैराग्य भाव और दृढनिश्चय को देखकर मातापिता वगेरहने दीक्षा दिलवाने का निर्णय किया । बाद कोठ (गांगड) में सं. २००५ के फाल्गुन वदि-५ (गुजराती महा. व. ५) गुरुवार को विद्वद्वर्य पूज्य मुनिप्रवर श्री मेरुविजयजी म.के करकमलोंसे भाई हसमुखने मातापिता और इन्दुबेन, धनसुख, हंसा, प्रवीण वगेरेह अपने विशाल कुटुम्बादिको छोड़कर बडा महोत्सवके साथ दीक्षा ली । इनका 'हेमचन्द्रविजयजी' नाम रखकर पूज्य मुनिवर्य श्री देवविजयजी म. के शिष्य बनाये गये । आपकी बुद्धि प्रशंसनीय है । इतनी छोटी वयमें पाणिनीय व्याकरण, प्रौढमनोरमा, महाभाष्य, मुक्तावली, पञ्चलक्षणी आदि न्याय व्याकरण और साहित्य के ग्रन्थों का सुन्दर अभ्यास किया है और अभी आप अध्ययन में आसक्त है ।

आपके सांसारिक कुटुम्ब की धर्माराधना भी सराहनीय है । आपकी बहन हंसाने तेरह वर्ष की लघुवय में हमारे सादडी गाँव में सं. २००९ चैत्र व. २ (गु.फा. व. २) को सिद्धांतवाचस्पति पूज्य

आ. म. श्री विजयोदयसूरीश्वरजी म. व शास्त्रविशारद पू.आ.म. श्री विजयनन्दन-सूरीश्वरजी म. के करकमल से दीक्षा ली । दीक्षा के समय सादडी श्री संघने अच्छा महोत्सव किया था । वह आज बालसाध्वी हेमलताश्रीजी के नामसे साध्वीजी श्री चारित्रश्रीजी की शिष्या हैं । इस दीक्षा प्रसंग का वर्णन इस काव्य के अन्त में पूज्य महाराजश्रीने सुन्दर ढंग से किया है।

आपकी माता प्रभावती बेनने भी अमदावाद (पांजरापोल) में सं. २०१२ जेठ सुद ३ सोमवार को महोत्सव के साथ पू.आ.म. श्री उदयसूरिजी म. व पू. आ. म. श्री विजयनन्दनसूरिजी म. के करकमल से दीक्षा ली है । उनका 'साध्वी पद्मलताश्रीजी' नाम रखकर सा. चारित्र श्रीजी की शिष्या बनाई गई हैं ।

कोटिशः वन्दन हो आप जैसे मुनिराजों को एवं संस्कारी कुटुम्बी जनों को !

निर्ग्रंथमुनियों का चरणरज
शा. हस्तीमल कोठारी
सादड़ी-मारवाड़

पूज्यपाद शासनसम्राट् तपागच्छाधिपति
भट्टारकाचार्य महाराजाधिराज श्रीमद्विजय नेमिसूरीश्वराः



॥ श्रीराणकपुरमण्डनश्रीऋषभदेवस्वामिने नमो नमः ॥

॥ श्री गौतमस्वामिने नमः ॥

नमो नमः श्रीगुरुनेमिसूरये

# २९. कीर्तिकल्लोलकाव्यम्

वाग्देवी यस्य वाचं श्रयति सुरतरुः पुष्पवृष्टिं विधत्ते,
तूच्चैर्धत्तेऽनुरागाद्रविरपि सकलम्मण्डलम्भाभिरारात् ।
देवैस्संपूज्यमानन्नुतितिविततञ्चामरैर्वीज्यमानं,
शस्तन्तं राणकस्थञ्जिनवरमनिशं स्तौमि भक्त्याऽऽदिनाथम् ॥१॥

मेवाडे राजते यो गुणगणनिलयो ह्यर्वली शैलराजो,
नात्यन्ते दूरदेशे विलसति नगरं राणकाख्यं हि तस्य ।
नित्यं शब्दायमाना प्रवहति शमदा निम्नगा तस्य पार्श्वे,
आसीत्पूर्वे गृहस्थाऽऽलयसमुदयो निर्जनं विद्यतेऽद्य ॥२॥

स्रग्धराच्छन्दः

सौधङ्किङ्किमु नन्दनङ्किमलका दृष्ट्वाऽभ्रमन्मे मनः,
आयातम्बहुधा ततं भुविगतङ्कान्तारवर्त्मस्थितम् ।
भक्ता यान्तु यदीहितं हि सफलङ्कर्तुं मनो वर्धते,
गान्धर्वन्नगरन्तदेकभवनं पुण्यात्मभिर्लभ्यते ॥३॥

शार्दूलविक्रीडितं वृत्तम्

विततशततरूणाम्पार्श्वभागेऽर्धभागे,
निहितहिततत्तीनां सङ्गशो यत्र सङ्गः ।
शुकपिकनिनदानाञ्जायते यद्यदुच्चैः,
प्रभवति मनसोऽलं "स्वागतं" स्वागतानाम् ॥४॥ मालिनीच्छन्दः

स्थाने स्थाने दृश्यते यत्र कुञ्जः, कुञ्जे कुञ्जे श्रूयते मञ्जुनादः ।
नादे नादे विद्यते रागिरागो, रागे रागे येऽप्रमत्ताः प्रमत्ताः ॥५॥
शालिनीच्छन्दः

आदीशनेमिप्रभुपार्श्वनाथैः, संराजितानि प्रवराणि यत्र ।
गुणैः सहस्त्रैर्भवनानि भान्ति, कलाकलापैः कलितानि तानि ॥६॥
उपजातिच्छन्दः

प्राकारवेष्टनवतीषु गतासु शाला-
मालासु भोजनविहारवतीषु तासु ।
ऋद्धासु राजवसुधासु ततासु रन्तुं,
येऽत्राऽऽगताः किल गता ननु स्वर्गमध्ये ॥७॥
वसन्ततिलकाच्छन्दः

उदयपुरपुराणे राजराजेन्दुदीप्ते,
निवसति "धरणाशा" मन्त्रिराजो महेभ्यः ।
नवनवतिमकार्षीद् योऽत्र लक्षाणि रायाम्,
व्ययमनुपमचैत्ये राणके पुण्यहेतोः ॥८॥ मालिनीच्छन्दः

सन्ति सन्तो न वा सन्ति, केचित्सन्ति वदन्ति नो ।
असन्तस्सन्ति भूयांस-स्सन्तमाच्छादयन्ति ते ॥९॥ अनुष्टुप्च्छन्दः

विबुधवृन्दसुगीतगुणावलिर्निरुपमोऽद्भुतशिल्पविभूषितः ।
धरणपूर्वविहार इतीरितो लसति हर्षकरो हि दिवौकसाम् ॥१०॥
द्रुतविलम्बितं वृत्तम्

नलिनीगुल्मविमानो, निर्जरलोकञ्जिगमिषुर्विभाति ।
धरणाशाहस्य यशो, देवसभायाम्प्रवक्तुमिव ॥११॥ आर्याच्छन्दः

विमानना नास्ति यतो विमानन्न मानमस्तीति कुतो विमानम् ।
विमानवद्भाति यतो विमानं, विमानमेवास्ति ततो विमानम् ॥१२॥
अनुष्टुप्च्छन्दः

दश दश दश वेदाँस्त्रिशताऽऽयोज्यवर्षै-
घटयति घटनीयम्मन्दिरन्देववन्द्यम् ।
इह विलसति मध्ये स्तम्भसंख्या विशाला,
विधुजलधिशतैर्या वेदवेदैः प्रमेया ॥१३॥ मालिनीच्छन्दः

श्रीमत्कामलदेसुतस्य धरणाशाहस्य निर्देशतो,
मुण्डारापुरवासिशिल्पनिपुणेनेदं यथा निर्मितम् ।
"देपाकेन" कुतोऽस्य मूर्ध्न्युपचितन्त्रैलोक्यदीपाभिधं,
यत्कृत्यं समकारि विस्मयकरं सर्वस्य लोकोत्तरम् ॥१४॥

माताकामलदे पिता च कुरपालोऽभूद्गुणाढ्योऽग्रजो,
रत्नाख्यश्च सुतावुभो निगदितौ जाज्ञा तथा जावडः ।
भाया धारलदे बभूव नितराम्भाग्येष्वनुत्सेकिनी,
प्राग्वाटान्वयभूषणस्य धरणाशाहस्य सम्बन्धिनः ॥१५॥

प्रासादस्य पुरश्चकास्ति सुषमम्प्रेक्षागृहम्प्रोन्नतं,
वाद्यन्मन्दमृदङ्गमङ्गलमनोहारीव संराजते ।
पार्श्वे यस्य विभाति हर्षजनको वृक्षैरनेकैर्वृतः,
आरामः किमु नन्दनङ्किमलका गीर्वाणखेलाऽऽस्पदम् ॥१६॥
शार्दूलविक्रीडितम्

चतुर्मुखस्यास्य चतुर्षु देवद्वारेषु दृष्टन्नु पश्चिमायाम् ।
यथोच्छ्रितं शोभि विलोभनीयं, द्वारं प्रधानन्निलयोत्तमस्य ॥१७॥

परश्शता यत्र परः सहस्रा, जिनेश्वरा भान्ति जिनालयेषु ।
यथाऽऽदृताश्चित्रकथां प्रकर्तुं, शिल्पातिसौक्ष्म्यन्ननु बोधयन्ति ॥१८॥
उपजातिः

चतुर्विंशतिधा भूमौ, रङ्गमण्डपमण्डलम् ।
राजन्ते स्तम्भखचिता नृत्यन्त्यः शालभञ्जिकाः ॥१९॥ अनुष्टुप् वृत्तम्

शालास्वन्तः शोभमाना विभान्ति,
शालामालादीपमालास्सदोऽन्तः ।
हाहाहाहा हास्यविस्फूर्जमानाः,
शालामाला स्वर्गसोपानमाला ॥२०॥ शालिनी

रङ्गद्वारसुतोरणोत्तरतलस्थाने नभोमण्डलं,
प्राप्तम्पत्रमिहास्ति कल्पकतरोश्चित्रेऽतिचित्रं स्फुटम् ।
श्रूयन्ते बहुधाऽत्र देवतरवः पूर्वे युगे भूमिषु,
नेदानीन्दिविषद्भिरेवमुषितास्तेभ्योऽपतद्यद्भुतम् ॥२१॥
शार्दूलविक्रीडितम्

दिशोऽवकाशेषु दिशोऽन्तराले,
प्रशान्तमुद्राः प्रविभान्ति देवाः ।
तदीयषट्सप्ततिदेवकुल्या,
आबद्धभावाः सततञ्जयन्ति ॥२२॥ उपजातिः

यावानायतकाय एष विहितस्स्वच्छावकाशङ्गत-
स्तावानेव ततोऽन्तरे विनिहितो भूगर्भभूतो बिलः ।
कालेनाऽत्यधिकेन शङ्कितमनोवाक्कायकर्माशयैः,
शङ्कास्थानतयाऽधुनाऽस्ति पिहितः पञ्चावशिष्टाः कृताः ॥२३॥

एतत्प्राङ्गणशोभिवृक्षनिकटादारभ्य दिक्षु क्रमात्,
प्रासादा दिविगा विभूतिभरिताः सत्तोरणैः सत्कृताः ।
चत्वारो द्युतिमाप्नुवन्ति परमां राजाधिराजाज्ञया,
राजानो विनिवेशिताः स्वसविधे सन्मण्डलेशा यथा ॥२४॥
शार्दूलविक्रीडितम्

चतुर्मुखञ्चतुर्द्वार-ञ्चतुस्तलविभूषितम् ।
मन्दिरं राजते ग्राव्णः, स्वच्छस्फटिकसन्निभम् ॥२५॥

मन्दिरेऽन्तः स्थितन्नाम, पयःफेनाभमुत्तमम् ।
नानाशिल्पकलोत्कृष्टं, रम्यम्परिकरम्महत् ॥२६॥

तदङ्के पृष्ठतोऽजस्त्रं, कारिण्यो नयनोत्सवम् ।
चतस्त्रो मूर्तयो दिक्षु-चतसृषु चकासति ॥२७॥

याभ्यो दिग्भ्यस्तु यो यायात्, ताभ्यो दिग्भ्यः पुरःस्थितम्
श्रीजिनेशं स पश्येच्च, परमानन्ददायकम् ॥२८॥ अनुष्टुप्

मूलं स्थानङ्खनित्वा तदनुगतजलं वीक्ष्य लग्ने शुभेऽद्रेः-
खण्डम्पाथोधिमध्ये क्षिपति ननु यथा पद्मनालं व्यधत्त ।
नालस्याग्रे सुपद्मं तदुपरि कृतवान् मूलमूर्तीश्चतस्त्रस्ता
द्रष्टुन्नैव शक्तः प्रभवति सकलोयोऽपि कोपीश्वरोऽपि ॥२९॥

एतत्पद्मन्तु मुक्तामणिगणखचितं स्वर्णपद्माद्विचित्रञ्,
चित्रञ्चित्रन्न चित्रम्भवति यदि तथाऽलौकिकम्पद्ममेतत् ।
सद्योमूलेऽस्ति नालं तदुपरि भवनं यत्र सम्यक् विभान्ति,
चत्वारः श्रीजिनेशा दुरितभयहरा याञ्जनाः संस्तुवन्ति ॥३०॥
स्त्रग्धरा वृत्तम्

एतद्रूपमघौघदावदलने दावानलो जायते,
मन्येऽमोघमिदञ्जनार्तिहरणे सद्योऽद्रिपुञ्जेऽशनिः ।
कृत्वाऽकर्म निषिद्धकर्मणि पटुः पापीयसामग्रणीर्दष्ट्वा
रूपमिदम्प्रयाति सदनन्देवस्य यद्दुर्लभम् ॥३१॥ शार्दूलविक्रीडितम्

बहुचित्रमनोहारि, दिविषद्भिरधिष्ठितम् ।
राजते चैत्यमत्यर्थं, महेन्द्रनिलयोपमम् ॥३२॥ अनुष्टुप्

प्रभोरादिनाथस्य मुख्यस्य मूर्तेः, सदा शोभते वामपार्श्वे प्रसन्नः ।
मनः कामनापूरणे ख्यातकीर्ति-रधिष्ठायको राणकस्थः पुनातु ॥३३॥
भुजङ्गप्रयातम्

पार्श्वनाथस्य मूर्तिर्या, शोभते पृष्ठतोऽनिशम् ।
फणासहस्त्रवाञ्छेषः, छत्राकारेण सेवते ॥३४॥ अनुष्टुप्

कृत्रिमा दन्तिनो भान्ति, यथास्थानं निवेशिताः ।
उद्भवं सफलीकर्तुं, सम्प्राप्ता दिग्गजा इव ॥३५॥ अनुष्टुप्

आचार्य्यवर्य्यतपगच्छनभोदिनेशैः,
श्रीसोमसुन्दर विचक्षणसूरिराजैः ।
साकञ्च पञ्चशतसाधुवरैस्सहर्षं,
प्रातिष्ठिपन्वसु[८]नव[९]अब्धि[४]सुधाकरे[१]ऽब्दे ॥३६॥ वसन्ततिलकाच्छन्दः

नन्दा[९]अश्व[७]षट्[६]चन्द्र[१]मितेऽथविद्वाञ्छ्रीदेवसूरिः कृतवान्प्रतिष्ठाम् ।
कालेन जीर्णस्य तथोत्तरस्यां, श्रीमूलनाथस्य पुरेव पश्चात् ॥३७॥
इन्द्रवज्राच्छन्दः

निर्माता धरणाशाहो, मन्दिरं साध्वसाधु वा ।
नित्यमीक्षितुमक्षिभ्यां, मूर्तिभूतो विराजते ॥३८॥

चतुष्षष्टिसमाः पूर्वं, शिल्पिनं स्थाप्य योऽग्रतः ।
प्रतिकृत्य शिलां न्यस्य, "देपा" याहि विसृष्टवान् ॥३९॥ अनुष्टुप्

नलिनिगुल्मविमानमिवाम्बरे, ददृशिवानिह स्वप्नदशान्तरे ।
तदिव दिव्यदर्शं समकारयत्, समदृशम्भवनञ्जगतीपतेः ॥४०॥
द्रुतविलम्बितं वृत्तम्

स्वप्ने तद् दर्शयित्वा यदपि गतवती साभिमाना कुलश्री-
देवी द्रव्यम्प्रभाते वदति पुनरहोऽदृश्यरूपाऽस्य भाग्यम् ।
प्राप्तानन्दः प्रणम्य खनति कृतिकृते यावदर्थं सुवर्णं,
तेनेदङ्कृत्यमेतल्लसति दिवि गतो मोदतेऽक्ष्णः परस्तात्॥४१॥ स्त्रग्धरा

एषा जनश्रुतिरलं प्रथिता पृथिव्याम्,
अम्बाकृपा भवननिर्मितिहेतुरस्ति ।
नांन्याङ्गतिङ्कृतिमतो भवनं विलोक्य,
वक्तुञ्च पारयति कोऽपि कृतज्ञबुद्धिः ॥४२॥ वसन्ततिलकाच्छन्दः

यशःपुञ्जे यस्य प्रसरति हिमाम्भः किमु हहा,
परं म्लाना जाता सितकरकला व्योमपतिता ।
दिवाभूता रात्रिर्जलमपि पयोभिस्समतुलां,
गतं हंसास्तेन भ्रममुपगताः क्षीरविषये ॥४३॥ शिखरिणीच्छन्दः

धरणाशाहपुत्रस्य, पुत्रः पौत्रः प्रपौत्रकः ।
क्रमागतस्तु यस्सोऽयञ्चतुर्दशपदे स्थितः ॥४४॥

रक्षयन्कुलमर्यादां, घाणेरावे व्यवस्थितिम् ।
आस्ते छगनलालोऽसौ, धरणाशाहवंशजः ॥४५॥

पुखराजोऽस्य पितृव्य-पुत्रो भ्रात्रा समोऽर्थवान् ।
सहायो यस्सदा साधु-कार्ये पश्यत बन्धुताम् ॥४६॥ अनुष्टुप्

जिनेन्द्रः श्रीपार्श्वः सकलकलिपापौधशमनः,
कलाभिः संयुक्ते निलयतिलके राजतितराम् ।
महादुःखाऽऽक्रान्ता ? भवजलनिधौ त्रस्तमनुजा ?
भवद्भयः शन्दत्ते सुरवरगणैः पूज्यचरणः ॥४७॥

महच्चैत्यन्तुङ्गं विलसति भृशं शान्तिसदनं,
जिनो नेमिर्यस्मिन् सकलजनपूज्यो विजयते ।
प्रभोस्सौम्या मूर्तिर्गुणगणगृहं वाञ्छितकरी,
मनोज्ञं सद्रूपं हरति हृदयन्निर्मलतरम् ॥४८॥ शिखरिणीच्छन्दः

सूर्य्यो नास्तमियात् इतोऽस्य पुरतो दिग्दक्षिणस्याम्बहिः,
एतत्सूचयतीव तिष्ठति सदा विद्वत्प्रतिष्ठः किमु ।
प्राचीनः प्रतिभाति भाभिरधिको जीर्णो रथे मन्दिरे,
घण्टानादनिनादितः प्रतिदिनं सद्योऽधुनाऽऽलोक्यते ॥४९॥
शार्दूलविक्रीडितम्

मुधा सुधा विषायेत, स्यादकीर्तिर्युगे युगे ।
तीर्थध्वंसापराधेन, विनश्येद्राणकं यदि ॥५०॥

भण्डारी-फूलचन्द्राख्यः, सन्तोकेन्दु[1]मुदैक्षत
आनाय्य नथमलजी[2] भोः, सत्वरं यद्विधीयताम् ॥५१॥

ऊनविंशे शततमे द्विपञ्चाशत्तमे गते ।
वर्षे सादडिसङ्घेन, कार्यभारः प्रदीयते ॥५२॥ अनुष्टुप्

संस्थाऽऽनन्द[3]समञ्चिता शिवकरी कल्याणसंशोभिता,
तस्यां श्रेष्ठिवराः सुबुद्धिनिधयस्संपत्तिसंभूषिताः ।
तीर्थत्राणविधौ निबद्धमतयो नित्यं रतास्सद्धितौ,
श्राद्धानाम्मुकुटे मणेस्समरुचो नामानि तेषां शृणु ॥५३॥
शार्दूलविक्रीडितम्

कस्तूरः[4] श्रेष्ठिवर्य्यो जिनमतनिरतो लालभाई[5] सुदक्षः,
सम्पत्तौ किन्नरेशो मनसुख[6] इति यः ख्यातनामा गुणाढ्यः ।
धर्मे श्रद्धा यदीया सततमविचला स प्रतापो[7] वदान्यः,
संस्थालंकारभूतास्सुमतिभृत इमेऽन्येऽभवन्श्राद्धवर्य्याः ॥५४॥
स्रग्धराच्छन्दः

अनुरूपम्मनोरूपं, संस्थासंस्थितिकारणम् ।
पुष्णाति कारणङ्कार्य्य-महो राणकपालनम् ॥५५॥ अनुष्टुप्

सूरीशो नेमिसूरिर्जयति गुरुवरः स्थम्भनन्तीर्थराजं,
कापर्डा-शेरिसादिप्रथितबहुतरन्तीर्थमेवङ्कदम्बम् ।
उच्चैरुन्नीय नुन्नः पुनरपि परया देवभक्त्याऽनुरागै-
र्मेदिन्यां दत्तदृष्टिः पुरमिदमनघं राणकं सञ्जगाम ॥५६॥

---

१. सन्तोकचन्दजी बम्बोली, २. नथमलजी सजमलजी शा. हीराचन्दजी रूपचन्दजी, ३. श्री आणंदजी कल्याणजी पेढी, ४. नगरशेठ कस्तूरभाई मणीभाई, ५. शेठ मनसुखभाई भगुभाई, ६. शेठ लालभाई दलपतभाई, ७. शेठ प्रतापशीभाई मोहनभाई ।

दृष्ट्वा जीर्णं विशालञ्जिनपतिभवनं खिन्नचित्तः शुशोच,
तीर्थोद्धारे प्रयत्नः शुभमतिभिरहो शीघ्रमुच्चैर्विधेयः ।
आलोच्येत्थं विवेकी दृढमतिरकरोन्नेमिसूरिस्स धीमान्,
जीर्णोद्धारे प्रतिज्ञान्नरपतिमहितस्सर्वभूतोपकारी ॥५७॥

स्रग्धरावृत्तम्

अथाऽसौ श्रेष्ठिनाम्प्रष्ठैः, प्रार्थितः प्राज्यविक्रमः ।
प्रविष्टस्सादडीं सूरिः, सिंहो गिरिगुहामिव ॥५८॥ अनुष्टुप्

मेघो गर्जति वर्षति प्रचलति प्रारब्धबद्धो नदन्,
विद्युत्स्फूर्जति दिग्विदिक्षु सहसा नैशन्तमो वर्धते ।
व्यापारे कुशलः प्रयाणचतुरो राजा वणिङ्क्जते,
चातुर्मास्यदिनेषु तेन यमिनो धर्मार्थमुद्योगिनः ॥५९॥

शार्दूलविक्रीडितम्

मुनिना नैव गन्तव्यञ्चातुर्मास्ये कदाचन ।
मनोहृत्य स्थितिञ्चक्रे, राणकन्न मनो जहौ ॥६०॥

सदओका अनोका वा, तीर्थौका वा वनौकसाम् ।
तीर्थानाम्मूलमुद्धार-मना गाम्पर्यटन्ययौ ॥६१॥

बहूनां शरदामन्ते, यान्तमायान्तमायतम् ।
मनोवेगन्निरुन्धानः, पुनः सस्मार राणकम् ॥६२॥ अनुष्टुप्छन्दः

अहम्मदावादपुरं प्रतस्थे, प्रगीतकीर्तिर्धृततीर्थलक्ष्यः ।
निवेशयामास निदेशदेश्यान्, स्थितान्स संस्थाशुभसभ्यवर्यान् ॥६३॥

उपजातिच्छन्दः

अहो यूयं स्थ सिद्धार्थाः, कस्तूर[१]प्रमुखा निजाम् ।
संस्था सञ्चाल्यमाना ये, किम्ब्रूमो भाग्यशालिनः ॥६४॥ अनुष्टुप्

---

१. शेठ कस्तूरभाई लालभाई ।

माणेकभाई भगुभाई केशुभाई मयाभाई भवन्त एव
कस्तूरजी चीमनभाई यत्न-ङ्कर्तुं त्वरन्तां शुभकार्य सिद्धयै ॥६५॥
उपजातिः

यस्मिन्कस्मिंस्तु युष्मासु, कार्यभारः पतेद्यदि ।
हस्तेन वोढुं शक्तोऽसि, समूहे का विचारणा ॥६६॥

संस्थया चाल्यमानेऽस्मिन्, राणके चेद् विचारणा ।
गृहादानीय दीयन्ताम्ब्रूथ यूयङ्करिष्यथ ॥६७॥ अनुष्टुप्

ओमित्युक्त्वाऽथ याते सकलधनपतौ संस्थयाऽऽशांनिबध्य
कृत्वा संस्थासु पृच्छां सकलमतमिदन्तूर्णमुद्धोष्य यत्नात्,
तीर्थोद्धारप्रवीणो मुनिगणमहितो नेमिसूरीश्वरोऽसौ-
जीर्णोद्धारं चिकीर्षून् सपदि धनिजनान्नादिदेशात्र तीर्थे ॥६८॥

लक्षाण्यष्टावकार्षीद्व्ययमिहभवनेजीर्णमुद्धृत्य खण्डं,
ग्राव्णः पूर्वं यथावत् कृतसमशकलं खण्डमन्तर्निवेश्य ।
द्रष्टुर्दृष्ट्वाऽपि दृष्टेर्नहि भवति पृथक् भावना तत्र चैत्त्ये,
धन्यः कर्त्ताऽथ शिल्पी पुनरपिं महतामाश्रयः श्रेष्ठिवर्य्यः ॥६९॥
स्रग्धरा

यः करोति चरीकर्ति, चरीकर्ता विशिष्यते ।
चरीकारयिता यस्स्या-दानन्त्यायोपकल्प्यते ॥७०॥ अनुष्टुप्

पुरासमुत्थाप्य समग्रमूर्ति-ञ्जीर्णं समुद्धर्त्तुमितस्ततोऽगात् ।
यथा स्थितिङ्कर्त्तुमुपेतबुद्धिः कः स्थापको मे भवितोदयाय ॥७१॥
उपजातिः

आस्तेऽसौ कृतधीः क्रियासु कुशलस्सिद्धान्तवाचस्पतिः,
श्रीमन्नन्दनसूरिराजकलितस्तत्त्वार्थसंज्ञापकः ।
आचार्य्योदयसूरिवर्य्य इह चेदभ्यर्थ्यते स्याद्धितम्
मत्त्वा सादडीसङ्घमुख्यमनुजा विज्ञप्तिमूचुर्भृशम् ॥७२॥ शार्दूल.

पादौ प्रगृह्योदयसूरिराजं, प्रस्थाप्य शीघ्रं पुरतः प्रतस्थे ।
आदाय ताँस्तान्विहिताँस्तु वस्तू-नानन्दकल्याणकराभिमृष्टः ॥७३॥

यास्यन्स सूरिः प्रतिकर्त्तुकामो, मूर्तेः प्रतिष्ठान्नलिनीविमाने ।
मार्गे निवासङ्कलयाञ्चकार, तारङ्गतीर्थे सति शेरिसादौ ॥७४॥

इन्द्रवज्रा

संसारेऽद्भुतताम्प्रयाति च कला यन्मन्दिरे सुन्दरे,
"कुम्भारी"[१] सुगुरूपदेशधवला मार्गे कथन्त्यज्यते ।
हस्तुण्डीनगरीन्ततोऽन्तरगतां[२] यान्तां स्पृशन्पद्धतौ,
आयातः क्रमशस्ततस्सवसतिं सत्सादड़ीं सूरिराट् ॥७५॥

शार्दूलविक्रीडितम्

इहत्त्या धर्मिष्ठा गुणिगणचराः श्रावकवराः,
प्रभुं श्रीमच्चिन्तामणिजिनवरं पार्श्वमनिशम् ।
सुभक्त्या सेवन्ते प्रथितचरितम्मङ्गलकरम्,
सदा ये सद्धर्मश्रवणकरणे बद्धमतयः ॥७६॥

इयं साक्षी यस्याः प्रभवति विभुर्वीरभगवान्,
पुरी रम्याऽऽरामैः धनिजनगृहैर्भूतिबहुलैः ।
सदा तस्या वृद्धिर्भवति नितरामीशकृपया-
मुनीनाम्पादाब्जन्नमतिकृतकृत्त्याऽथ रजसा ॥७७॥ शिखरिणी

पुरोपकण्ठे रचितोपकार्य्या-स्थितं गुरुन्ते शतशोऽभिपत्य ।
ध्वजाग्रहस्ताः प्रणदत्सुतूर्येष्वनन्तरागैः सहसाऽथ जग्मुः ॥७८॥

पौरा गृहद्वारिविलम्बिदाम-बद्धासु सत्तोरणदेहलीषु ।
पुनन्तमात्मानममुं प्रतीक्ष्य, पूजां प्रचक्रुः पुरतोऽथ निन्युः ॥७९॥

उपजातिः

---

१. श्रीकुंभारीयाजी तीर्थ, २. श्रीराता महावीरजी तीर्थ ।

आनन्दाब्धिबृहत्तरङ्गचपलाः पौरा गुरोरागम-
ङ्कांक्षन्तः कृतबुद्धयो ववृधिरे द्रष्टुं सदोत्कण्ठिताः ।
दष्टवाऽऽनन्दपरिप्लुताः परिणते प्राक्स्थापिते तोरणे,
साहस्त्रैर्बहुभिर्वृते गुरुवरे सत् "स्वागतं" चक्रिरे ॥८०॥
शार्दूलविक्रीडितम्

सोत्साहं तैर्धनदसदृशैः श्रेष्ठिवर्गैरथैवं,
प्राप्तानन्दैरपचितिमितः सूरिवर्य्यः क्रमेण ।
ग्रामस्थांस्तान् जिनपतिगृहान् सप्त भव्यान्प्रपद्य,
प्रत्यावृत्तः प्रमुदितमतिः श्रीजिनेशान् प्रणम्य ॥८१॥ मन्दाक्रान्ता०

इत्थं सौधमये पुरेऽथ रुचिरे संमृष्टसंसेचिते,
रम्यैर्वाद्यशतैर्ध्वजैश्च विविधैर्गेयैर्मनोहारिभिः ।
सार्द्धं तत्र समागते गुरुवरे पौरा गृणन्तो जयं,
रम्यं पट्टमधिष्ठिते च परचा भक्त्या नतिं तेनिरे ॥८२॥

शैवालञ्जनता सभा ननु सरः पद्म मुनीनां गणः,
पन्न्यासप्रभृतिः कुशेशयचयः किंजल्कसंशोभितः ।
आचार्य्या हि सहस्त्रपत्रसदृशाः ख्यातिं गता भूतले,
मध्येऽज्ञानतमोपहो गुणनिधिः सूर्योऽथ सूरिर्बभौ ॥८३॥
शार्दूलविक्रीडितम्

इतो गन्तुं सूरिस्त्वरयति जनान् राणकपुरम्,
पुनः पौरो लोको ज्ञपयति गुरो सन्ति दिवसाः ।
इदानीं स्वं वासं स्थिरयतु भवान् यास्यति ततः,
स एवं विज्ञप्तो वसति जनकल्याणनिरतः ॥८४॥
शिखरिणीच्छन्दः

शान्तस्यास्य पुरो विवेकनिधिभिः प्राज्ञैर्जनैः सादडी-
ग्रामस्थैः प्रविधातुमुत्सवममुं लक्षत्रयं सञ्चितम् ।
साहाय्ये कृतनिश्चयान् गृहपतीनाढ्यन्प्रतिष्ठोत्सवे,
दृष्ट्वाऽऽनन्दमुपागतः स निरगाच्छान्ते मुहूर्ते बहिः ॥८५॥

वामे श्रोत्रसुधाभिवर्षिमधुरः केकारवोऽश्रूयत,
प्राक्कूलाल्लवणार्णवस्य सुरभिः शीतश्च वातो ववौ ।
एभिः सच्छकुनैरुपेत्य परमां प्रीतिं गुणैरद्भुतः,
सूरिः शिष्यगणान्वितोऽथ नगराल्लग्ने शुभे निर्गतः ॥८६॥

शार्दूलविक्रीडितम्

मार्गेऽमुष्मिन्प्रवहति नदी, सप्तधा सा 'मघाई',
या लोकेभ्यो वितरति सदा स्वर्धुनीव प्रमोदम् ।
आदीशोऽसौ जयति नितरां पूर्णकान्त्याभिरामो,
मार्गे तिष्ठन् हरति च मनः स्वस्तये शान्तमूर्तिः ॥८७॥

मन्दाक्रान्ता०

आयान्तं तटिनीतटे जनमुखादाश्रुत्य सूरीश्वरं,
वृद्धा भक्तिभरेण जन्म सफलीकर्त्तुं पुरो निर्ययुः ।
यादृक् स्वागतकारिवस्तुनिचयेनातेनिरे स्वागतं,
तादृङ् नैव कदापि संश्रुतमहो सर्वत्र भूमण्डले ॥८८॥

शार्दूलविक्रीडितम्

सूरिः श्रीनन्दन[२]ाख्यस्तदनुबुधवरो वन्द्यविज्ञानसूरिः,
कस्तूरः[४] सूरिराजो विजयपदसमुद्भासिसोमः[५] सुमित्रः[७] ।
पन्न्यासः श्रीलमोति[८]र्गणिवरकमलः[६] शास्त्रविज्ञश्च मेरुः[९],
देवाद्यैः[१०] प्राज्ञवर्यैः शिव[११]गणिवरयुक् प्राप्तवान् राणकं स[१] ॥८९॥

स्रग्धरा

---

१. पूज्यपाद आ.भ. श्रीविजयोदयसूरीश्वरजी म.सा., २. पूज्य आ.भ. श्रीनन्दनसूरिजी म.सा., ३. पूज्य आ.भ.श्रीविज्ञानसूरिजी म.सा., ४. पू.आ.भ. श्रीकस्तूरसूरिजी म.सा., ५. पू.पं. श्रीसोमविजयजीगणी, ६. पू.पं.श्रीकमलविजयजीगणी, ७. पू.पं. श्रीसुमित्रविजयजीगणी, ८. पू.पं. श्रीमोतिविजयजीगणी, ९. पू.पं. श्रीमेरुविजयजीगणी, १०. पू.पं. श्रीदेवविजयजीगणी, ११. पू.पं. श्रीशिवानन्दविजयजीगणी, आदि ४० मुनिवरो तथा बीजा अनेक समुदायना पूज्यमुनि महाराजो तथा साध्वीओ पधार्या हता ।

सभायां शुभे पट्टके संनिषण्णम्,
मुनीशैः परीतं प्रभाभासमानम् ।
तमीड्यं सुभक्त्यानताः शास्त्रसिन्धुं,
मुदा नेमिरे सूरिराजं मनुष्याः ॥९०॥ भुजङ्गप्रयातम्

आगत्य राणकं पुण्य-भूमिं शिल्पविभूषिते ।
चैत्ये संशोभितं नत्त्वाऽऽ-दीशं हर्षं परं ययुः ॥९१॥ अनुष्टुप्

कृत्ये नियुक्तपुरुषैरुपपादितानि,
वस्तूनि मङ्गलमयानि विलोक्य तानि ।
आनन्दमाप सकलागमविन्मुनीशो,
दृष्ट्वा पृणन्ति न हि के मनसोऽनुरूपम् ॥९२॥ वसन्ततिलका

मुद्राभिर्विहितं मनोहरतरं त्रिंशत्सहस्त्रैः शुभम्,
सत्त्वोद्बोधिकथाश्रितैर्बहुतरैश्चित्रैर्युतं मण्डपम् ।
मुक्तादामविराजि भाभिरधिकं विद्युत्कृताभिर्मुदं,
व्यातेने विपुलं सतोरणमिदं माहेन्द्रधिष्ण्योपमम् ॥९३॥
शार्दूलविक्रीडितम्

पावापुरी तस्य च मध्यभागे, तोयस्थिता मञ्जुलमन्दिराढ्या ।
श्रीवीरनिर्वाणसुपुण्यभूमी-रेजे यथा कश्चन नाकिलोकः ॥९४॥
इन्द्रवज्रा

नाभेयाङ्घ्रिसरोजपूतशिखरः सिद्धाचलो राजते,
लोको वाञ्छति यद्रजः कलुषतानाशाय स्वस्यात्मनः ।
तस्याद्रे रचनां विलोक्य कृतिना सम्पादितामद्भुतां,
सर्वे यान्ति चमत्कृतिं गिरिवरभ्रान्त्या प्रमोदं गताः ॥९५॥ शार्दूल०

श्रीनेमीशजिनेश्वरार्पितपदा संभूषितः शोभते,
नाम्ना रैवतपर्वतो गिरिवरेषूर्ध्वप्रतिष्ठः श्रुतः ।
तस्यास्मिन् रचना कलासु कुशलैर्धन्यैर्जनैर्निर्मिता,
हृद्या मङ्गलकारिणी समभवन्नेत्रोत्सवापादिनी ॥९६॥ शार्दूल०

चित्तौडाभिधदुर्गमध्यनिहितः स्तम्भो यशःख्यापकः,
स एवात्र कथं दृशोर्विषयतामेतीति चित्रं महत् ।
इत्थं जातकुतूहलैस्तदुपमं स्तम्भान्तरं शिल्पिनः,
नैपुण्येन विसिष्मिये जनगणैर्दृष्ट्वा प्रफुल्लाननैः ॥९७॥

मार्गः सादडितोऽथ राणकपुरं यावत् प्रतिष्ठोत्सवे,
सञ्चारे सुखदः प्रदीपनिचयैर्विद्युत्प्रभैर्भासुरः ।
आसीत्तेन दिवानिशं जनतया तीर्थं व्रजन्त्या परं,
यन्त्रप्रेरितयानराजिभिरलं सौख्यं समासादितम् ॥९८॥
शार्दूलविक्रीडितम्

पादम्पादौ क्रमेण पुनरपि ववृधे चन्द्रवन्मानमेतद्,
लोकानां लक्षसंख्या समजनि चरमे वासरे राणकेऽस्मिन् ।
आगत्याभूतपूर्वं महममुमनिशं वीक्ष्य देशान्तरेभ्यः,
बाला वृद्धा युवानो नवयुवतिजनो मोदमुच्चैरवापुः ॥९९॥ स्रग्धरा

चेतोहारि विहारि मण्डपबहिर्भागे समावेशितम्,
धूमोद्गारि विभाति बाष्पशकटं यन्त्रेण धावद्द्रयात् ।
द्रष्टुन्तच्च कुतूहलं जनगणा बाला युवानो जराऽऽ-
क्रान्ता यान्ति निरीक्ष्य तत्पुनरमी चित्रं कथाः कुर्वते ॥१००॥ शार्दूल०

वाद्यन्मङ्गलकारितूर्यनिनदैर्हृद्यैर्मृदङ्गस्वरैः,
हर्षोत्कर्षसमुल्लसज्जयजयध्वानैः समस्ता दिशः ।
कुर्वाणैर्बधिरा बभूव नितरां वेला प्रमोदप्रदा,
प्रारब्धो बहुपुण्यदे सुसमये सन्नुत्सवः शान्तिदः ॥१०१॥ शार्दूल०

कृष्णे फाल्गुनमासि भूमितनये वारे शुभैकादशी-
तिथ्यां माङ्गलिकोऽथ राणकपुरे प्रावर्त्तताऽष्टाह्निकः ।
यस्मिन्कुंभजवादिरोपणविधिर्दिक्पालसंपूजनं,
दीपस्थापनमष्टमङ्गलविधिश्चासन् ग्रहाभ्यर्चनम् ॥१०२॥
शार्दूलविक्रीडितम्

ततः परेद्युर्विमले प्रभाते, श्रीसिद्धक्रार्चनमारभन्त ।
यस्मिन्कृते सिद्धयति सर्वमिष्टं, श्रीपालवच्छ्रद्दधतां नराणाम् ॥१०३॥
उपजातिः

वीशस्थानकपूजनं शुभचतुर्दश्यां गुरोर्वासरे,
सम्यक्त्वाद्युपलब्धिहेतु विधिवत्प्रापद्धि संपन्नताम् ।
प्रातः श्रीध्वजदण्डयोश्च कलशस्यासेचनं पूजनम्,
शुक्रे जातममातिथौ निगदितं शास्त्रे यथा तत्तथा ॥१०४॥ शार्दूल०

शुक्ले वह्नितिथौ शनौ परिकरे पूजाऽभवत्फाल्गुने,
जाताऽष्टादशसंख्यया भगवतः शस्ताभिषेकक्रिया ।
अन्येद्यू रविवासरे प्रथमतश्चैत्याभिषेकः कृतः,
मध्याह्ने जिनभक्तिरक्तहृदयैः पूजा वरा पाठिता ॥१०५॥
शार्दूलविक्रीडितम्

बृहन्नन्द्यावर्तप्रथितशुभपूजाऽतिरुचिरा,
तृतीयायान्तिथ्यां शशधरदिने मङ्गलमये ।
चतुर्थ्यां भौमेऽह्नि प्रवररथयात्राऽजनि मुदे,
जनानां भव्यानामनुपमसुखाऽऽस्वादजनिका ॥१०६॥ शिखरिणी

बुधे पञ्चम्यां सा प्रथमसमये सूरिविहिता,
प्रतिष्ठा सञ्जाता जिनपतिगृहे पूर्णफलदा ।
बृहच्छान्तिस्नात्रं विजयिनि मुहूर्ते समभवत्,
क्रमेणेत्थं पूर्णो ह्ययमिहमहः सौख्यजनकः ॥१०७॥ शिखरिणी

शुभे वीरसंवत्सरे संप्रपन्ने,
ग्रहर्ष्यब्धिनेत्रे तथा वैक्रमेऽब्दे ।
ग्रहाकाशखाक्ष्यन्विते फाल्गुनेऽभूत्,
प्रतिष्ठा सितेऽहेस्तिथौ चन्द्रपुत्रे ॥१०८॥ भुजङ्गप्रयातम्

गुरौ वारे षष्ठयामुषसि शुभवाद्ये निनदति,
कृतो द्वारोद्घाटः सकलजनताऽऽनन्दजनकः ।
जनाः श्रीघण्टानां प्रचुरतरनादे प्रसरति,
समागत्याकार्षुः प्रणतिमतिभक्त्या जिनपतौ ॥१०९॥ शिखरिणी

क्रियाकलापप्रतिपत्तिहेतो-रहम्मदाबादपुराद्य एते ।
समागताः कारितवन्त आरात्, दृष्ट्वा क्रियां सर्वजनाः प्रसेदुः॥११०॥
उपजातिः

सङ्गीताचार्य्यचर्य्यां प्रतिदिनविहितां हारिणीन्तां महान्तः,
सन्तः शृण्वन्त एते ययुरतिमुदिताः सर्व आलेख्यभावम् ।
भूयो भूयो जनानां जनयति परमां प्रीतिमुच्चैः प्रतीक्षां,
सङ्गीतिर्या सभायां भवति गुणवतां गौरवख्यापिका सा ॥१११॥
स्रग्धरा

कीर्तिङ्केचन केचनाऽऽदृतकला दृश्यम्परे गायनम्,
भोज्यं भोजनपद्धतिं सुकृतिनः शंसन्त आसन् प्रियान् ।
हट्टे सर्वसमृद्धिभिः सुललिते यद् यद् यथा प्रार्थितम्,
क्रय्यं तत्र मनोऽनुकूलमखिलं तत्तत्तथाऽऽसादितम् ॥११२॥
शार्दूलविक्रीडितम्

तीर्थे तस्मिन्नुत्तमे राणकाख्ये,
संख्यातीता उत्सवन्द्रष्टुकामाः ।
आगच्छन्वै देशदेशान्तरेभ्यो,
मर्त्या वृद्धैर्बालवर्गैः समेताः ॥११३॥ शालिनी

तत्रागतानां सकलेष्टद्रव्यं,
न्यासीकृतं रक्षणदत्तचित्तैः ।
यथास्थितं रक्षितमाशुकाले,
प्रत्यर्पितं नीतिविधानदक्षैः ॥११४॥ उपजातिः

निजाधिकारे नृपचिह्नयुक्ता,
नियोजिताः कर्म मुदा प्रचक्रुः ।
यथा न कस्यापि वियुक्त आसीद्,
बालोऽथ वासो न धनं न धाम ॥११५॥ उपजातिः

रक्षानियुक्तपुरुषा गुरुकार्य्यभारं,
वीक्ष्यापि कार्यकरणान्नविराममायन् ।
लोकोपकारिणी गुरावपि कृत्यजाते,
धीराः स्खलन्ति न कदापि विशुद्धभावाः ॥११६॥ वसन्त०

सेवामण्डलसभ्यसूचकपटं सम्यक् स्ववस्त्रे दधद्,
रात्रावह्नि च सेव्यसेवनरतो भूयान्जनोऽदृश्यत ।
सेवाकर्मपटुत्वदर्शनभवां श्रद्धां वहन्तो जनाः,
स्वं स्वं वस्तु तदन्तिके गतभया विन्यस्य मोदं दधुः ॥११७॥ शार्दूल०

इत्थं दीर्घतरे शुभे दशदिनव्याप्युत्सवे राणके,
लक्षे वाऽपि ततोऽधिके नरचये रोगो यथा नाऽभवत् ।
मन्ये तीर्थवरस्य सैष महिमा निर्विघ्नमासीद् यतः,
सर्वापद्विनिवारकस्य सविधे नाश्चर्यमेतन्महत् ॥११८॥
शार्दूलविक्रीडितम्

शतं सहस्त्रं मनुजाः पुरेऽस्मिन्,
समागता भक्तिभृतोऽनुरागैः ।
महोत्सवं वीक्ष्य तमद्भुतञ्च,
सुखं दधानो निजगेहमीयुः ॥११९॥ उपेन्द्रवज्रा

श्रेष्ठी कस्तूरभाई धनपतिविभवः श्रीभगूभाई सौम्यः,
श्रेष्ठीशः केशुभाई विततनिजयशोविश्रुतो भूमिपीठे ।
भण्डारी तेजराजो विमलगुणगणो ग्रामपाथोधिरत्नं,
एतेऽन्ये श्रेष्ठिवर्य्याः प्रवरमतिभृतः कार्य्यकर्तार आसन् ॥१२०॥
स्त्रग्धरा

ज्येष्ठानुजौ साधुवरौ यदीयौ, गोविन्दनामा हरपूर्व्व एषः ।
बहूनि वर्षाणि निरीक्ष्य कार्य्यं, तीर्थे प्रतिष्ठाकृतिसङ्गतोऽभूत् ॥१२१॥

उपजातिः

श्रीमत्सादडिसंघकारितविधिः शस्तः प्रतिष्ठोत्सवः,
यं दृष्ट्वा मनुजा हि विस्मयमगुः प्रीतिं परां लेभिरे ।
लक्षन्द्रव्यमिह व्ययीकृतमलं भक्त्युल्लसन्मानसैः,
किं किं वर्णनमातनोमि धिषणा मोहं समालम्बते ॥१२२॥

शार्दूलविक्रीडितम्

अहो राणकमांगल्यं, विस्मर्तुन्नैव शक्नुमः ।
समन्नैव भवेद् भूयो, विशिष्टन्तु कुतो भवेत् ॥१२३॥

अनुष्टुप्

## ॥ अथ प्रशस्तिः ॥

सद्दर्शनोदयकरो बुधनन्दनो यः,
विज्ञानपद्मसविताऽमृतवाग्विलासः ।
लावण्यसिन्ध्वमृतरश्मिगुणं नुमस्तं,
कस्तूरसेव्यमनिशं गुरुनेमिसूरिम् ॥१॥

तत्पट्टपुष्कररविर्मितमिष्टभाषी,
शास्त्राब्धिमन्थनसमाश्रिततत्त्वरत्नः ।
वागीशतुल्यधिषणः कुशलः प्रबोधे,
सूरीश्वरो विजयताममृताभिधानः ॥२॥

तच्छिष्यरत्नविबुधो रसिकः क्रियासु,
विद्वद्वरो विविधशास्त्रविमर्शदक्षः ।
पन्न्यासदेवविजयः किल शान्तमूर्ति,
संराजते भविकबोधविधौ प्रवीणः ॥३॥

तत्पादपद्ममकरन्दमधुव्रतेन,
श्रीहेमचन्द्रविजयेन जिनानुगेन ।
काव्यं कृतं निजवचःपरिशुद्धिहेतो–
र्नान्या स्पृहा न खलु काव्यकलासु दर्पः ॥४॥

सज्ज्ञानसंयमरतो विबुधो वरेण्यः,
वाग्मी हितार्थनिरतो जयति प्रभावी ।
पन्न्यासमेरुविजयो द्विजवंशदीपः,
प्रोत्साहितो लिखितवान् खलु तेन काव्यम्॥५॥

१ १ ० २
चन्द्रेन्दुपुष्करविलोचनसम्मितेऽब्दे,
माघे सिते कविदिने भुजगेशतिथ्याम् ।
कल्लोलकाव्यमिह सादडिपत्तनेऽगात्,
पूर्तिं मुदे भवतु सा विदुषां कृतिर्हि ॥६॥

॥ इति मुनिश्रीहेमचन्द्रविजयविरचितं कीर्तिकल्लोलकाव्यम् ॥

# ३०. साध्वीश्रीहेमलताश्री दीक्षावर्णनम्

हीराभाईरणखिवसतिर्जैनधर्मानुरागी,
जातो वंशे कुशलवणिजां सौम्यमूर्तिर्दयावान् ।
पत्नी तस्य प्रथितयशसः शान्तरूपा प्रभाख्या,
तस्याः कुक्षेरजनि तनुजा कान्तिसिन्धुर्हि हंसा ॥१२४॥

या गंगेव प्रकृतिसुभगा पद्मसद्मा च रूपे,
वीणावेणुध्वनिमधुरिमा भासते वाचि यस्याः ।
सेयं हंसा विषयविमुखा बाल्यभावेऽपि चित्रं,
पूर्वाभ्यासाद्विमलमनसं नैव तृष्णा रुणद्धि ॥१२५॥

आत्मा नेयः परमपदवीं सारशून्यः प्रपञ्चः,
रागद्वेषावहह नितरां शत्रुभूतौ विजेयौ ।
इत्येवं सा जिनपदरता भावनां भावयन्ती,
सच्चारित्रग्रहणविषये बद्धभावा हि जाता ॥१२६॥

अस्याः स्थैर्य्यं दृढतरमिति प्रेक्ष्य पन्न्यासवर्य्यैः,
श्रीमेरुस्तां वचनसुधयाऽऽप्याययत्प्रीतियुक्तः ।
हेमाभा सा तदनु विकसत्पङ्कजाक्षी स्वपित्रोः,
स्वाभिप्रायं प्रकटमकरोद् बद्धमूलं महार्थम् ॥१२७॥

चारित्रश्रीहितवहवचःश्रद्धयाऽपास्तमोहा,
तच्छिष्याऽभूदुपरतरतिर्लौकिकादर्थजालात् ।
पित्रोराज्ञां विनयवचसाऽऽसाद्य प्रीतान्तरात्मा,
दीक्षाभारं लघुवयसि साऽवोढ वृद्धैरसह्यम् ॥१२८॥

चैत्रे कृष्णे[१] सुखदसमये सद्द्वितीयाख्यतिथ्यां,
द्वे साहस्त्रे तदधिकनवे वैक्रमे वत्सरे च ।
सेयं बाला विजयपदयुक्सूरिराजोदयस्य,
दीक्षां प्रापत्करकमलतः सादडीग्राममध्ये ॥१२९॥

क्वेदं सौम्यं वपुरतिमृदु क्व व्रतं धैर्यलोपि,
नूनं काचित् त्रिदिवपतिता देवबालेति लोकैः ।
तद्ग्रामस्थैर्मुदितहृदयैरुत्सवोऽकारि भूयान्,
श्रीहेमाख्या[२] तदनु च लताशब्दिता वन्दिताऽभूत् ॥१३०॥

मन्दाक्रान्ता०

❀ ❀ ❀

१. गुजराती फा-व-२ । २. साध्वी श्री हेमलताश्रीजी ।

# ३१. श्रीवृद्धिचन्द्र-शतकम्

– आचार्यविजयहेमचन्द्रसूरिः द्वारा प्राप्तम्

(अज्ञातकर्तृकम्)

नत्वाऽऽत्मभक्त्याऽमल-वीरमूर्तिं, वैराग्यकोशाभयराशिदात्रीम् ।
कुर्वे जनानां पर-मोदनाय, श्री-वृद्धिचन्द्रं शतकं सुरम्यम् ॥

असारेऽसीमसंसारे, प्रासन्मोह-विजृम्भिते ।
तादृशो नास्ति ना कश्चिद्, यो वृद्धिं नाऽभिवाञ्छति ॥१॥

कीटादारभ्य ब्रह्माण्डावधि या प्राणिसन्ततिः ।
सर्वस्याः कामना वृद्धौ, महारम्भेण दृश्यते ॥२॥

कीर्तिवृद्धौ च केषाञ्चित्, केषाञ्चिन्मानवर्द्धने ।
हर्म्यवृद्धौ च केषाञ्चित्, समेषामर्थवर्द्धने ॥३॥

सुतारामगवादीनां, धान्यानामपि वर्द्धने ।
अशनाम्बरवृद्धौ च, जायते भुवि कामना ॥४॥

तस्माद् यातं महाभागाः, सर्वे वै वृद्धि-कामुकाः ।
वृद्ध्यर्थं समुखं प्राणा-नर्पयन्तीह मानवाः ॥५॥

राजद्वारे राजकार्ये, राजमार्ग-निषेवणे ।
कष्टप्रायेऽपि सर्वेषामीहा तत्राऽभिजायते ॥६॥

केवलं कारणं तत्र, वृद्धिमेकां हि मन्महे ।
प्रवृत्तिरन्यथा तत्र, न स्यात् कस्याऽपि देहिनः ॥७॥

बुद्धाराद्धान्ततत्त्वज्ञाः, कोविदा अपि रङ्कवत् ।
वृद्धिहेत्वर्थमिभ्यानां, द्वारि तिष्ठन्ति उत्सुकाः ॥८॥

सरित्तीरगुहाऽरण्य-श्मशानागारभूमिषु ।
ध्यानासीना महात्मानो, निदानं तत्र वृद्धिका ॥९॥

त्वरद्योध-हयेभेषु, महासङ्गर-वर्त्मसु ।
सोद्यमा जीविनस्तत्र, दृश्यन्ते वृद्धि-हेतवे ॥१०॥

पयःपानास्तपश्शान्ता, ब्रह्मचिन्तनधीजुषः ।
मुक्ताहाराश्च ये केचित्, सर्वे ते वृद्धिबोधिनः ॥११॥

तस्माद् भोः ! सुलभां वृद्धि-मात्मसन्तोषकारिणीम्
श्रीमन्तो यदि वाञ्छन्ति, भजध्वं वृद्धिनामकम् ॥१२॥

वृद्धौ सत्यां मदान्धानां, धनौष्ण्यं यदि जायते ।
तेषां शान्त्यर्थमेवाऽहं, मन्ये चन्द्रोऽपि राजते ॥१३॥

सामान्यनामभाजोऽपि, मुनेर्मोक्षाभिकाङ्क्षिणः ।
नाममात्रेण भव्यात्मा, विविक्तात्मा प्रजायते ॥१४॥

यत्र वृद्धिर्निशानाथः, सर्वाह्लादनकारकौ ।
तन्नामजपनादाशु, याति किल्बिषसन्ततिः ॥१५॥

तच्छास्त्रं नास्ति भूभागे, धर्मोऽपि नास्ति तादृशः ।
माहात्म्यं यत्र नाम्नो हि, वर्णितं नैव दृश्यते ॥१६॥

सर्वेष्वारम्भकार्येषु, नाम-जापः प्रशस्यते ।
तस्माद् वृद्धीति नामाऽत्र, ध्येयं ध्येयं प्रयत्नतः ॥१७॥

नामकीर्तनमाहात्म्यं, शक्यते केन वर्णितुम् ?।
वृद्धिचन्द्राभिधानं तु, सर्वाशा-पालन-क्षमम् ॥१८॥

केकिनोऽम्बुद-निध्वानं, स्वाति-बिन्दूंश्च चातकाः ।
यथेच्छन्ति तथा भव्या !, वृद्धिनामाऽभिवाञ्छत ॥१९॥

सद्गुरुं भव्यदेहीव, सत्सिद्धान्तमिवाऽऽत्मवित् ।
प्रजामिव प्रजाहीनो, निधानमिव निर्धनः ॥२०॥

भामिनी स्वामिनं रोगी, भेषजं कर्षकोऽम्बुदम् ।
कामीच्छुर्युवतिं रम्या-मातपं रजकः सदा ॥२१॥

बालिका मातरं ध्यानं, ध्यानीव प्रजितेन्द्रियः ।
सुशिष्यं कोविदः शालि-सन्ततिः सद्धराधिपम् ॥२२॥

सुयानं सिन्धुयायीव, गिरिपातीव गुल्मकम् ।
क्षुधार्तो भोजनं नीरं, पिपासाकुलमानसः ॥२३॥

सद्धर्मं सन्मतिः प्राणी, सज्जनः साधुसङ्गतिम् ।
विरक्तोऽरण्यभूभागं, नटी नागर-वृन्दकम् ॥२४॥

स्वाभीष्टदेवतां भक्तः, कौतुकं बालका इव ।
पुण्यात्मा पुण्यकर्माणि, पापी पापचयं यथा ॥२५॥

रूपाजीवा धनं काममनाथा इव रक्षकम् ।
राज्यवृद्धिं धरानाथाः, प्रपां वै पथिका इव ॥२६॥

घर्मार्ताः सुतरुच्छायां, मायां मोहपरायणाः ।
विबुधाः संसदं रम्यां, क्षत्रिया इव सङ्गरम् ॥२७॥

दिनार्दिं चक्रवाकीव, पद्मिनी भास्करं यथा ।
चकोराश्चान्द्रिकापानं, साधवस्तत्त्वचिन्तनम् ॥२८॥

परस्योपकृतिं सन्तः, परहानिं च दुर्जनाः ।
सद्ग्रन्थानिव विद्यार्थी, साधकः स्वेष्टदर्शनम् ॥२९॥

यथा वाञ्छन्ति संसारे, स्वमनस्तोषहेतवे ।
तद्वत् को भविको नेच्छेद्, वृद्धिनामसुधारसम् ? ॥३०॥

सदाशापिपासावरेहाप्तिदायि, सदाशापिपासावरेहाप्तिदायि ।
जनानां बहूनां तदज्ञानभेदि, भजध्वं भजध्वं क्षितौ नाम वृद्धेः ॥३१॥
(भुजङ्ग)

धनानां निधानं विधीनां विधानं, शुभानां गुणानामुदञ्चत्पयोधिम् ।
दरिद्रार्तिनाशं सुखावासकाशं, भजध्वं भजध्वं क्षितौ नाम वृद्धेः॥३२॥
(भुजङ्ग)

विपद्दावमाला-विनाशि प्रकाशि, महामोहसेनाबलाधिप्रणाशि ।
लसच्चारुकीर्ति स्फुरद्भव्यगेहं, भजध्वं भजध्वं क्षितौ नाम वृद्धेः॥३३॥
(भुजङ्ग)

कषायाद्रिसानूद्द्विनाशेन्द्रशस्त्रं, मनोजीयसेनापतद्वाणवक्त्रम् ।
कुसङ्गोत्थदोषाटवीदावचक्रं, भजध्वं भजध्वं क्षितौ नाम वृद्धेः॥३४॥
(भुजङ्ग)

सुगीतं सुपेयं धिया ध्येयमेयं, सुधीभिः कुधीभिः सदागम्यरूपम् ।
लसद्भानुकोटीप्रकाशं विशालं, भजध्वं भजध्वं क्षितौ नाम वृद्धेः॥३५॥
(भुजङ्ग)

क्षणोद्द्योतचञ्चद्धनाशाविरागि, विलासारिमोषि प्रतापिप्रतापि ।
महासिन्धुधारा-ब्रुडज्जन्तुपोतं, भजध्वं भजध्वं क्षितौ नाम वृद्धेः॥३६॥
(भुजङ्ग)

विदेशे स्वदेशे मरौ मेरुपृष्ठे, निकेते वनादौ सुरागारभागे ।
अहीनां निवासेऽपरे लोकलोके, भजध्वं भजध्वं क्षितौ नाम वृद्धेः॥३७॥
(भुजङ्ग)

विभातं प्रभातं प्रभाभासिताङ्गं, विशोकं विलोभं विमोहं विरागम् ।
विचारे प्रचारे सदाचारचारे, भजध्वं भजध्वं क्षितौ नाम वृद्धेः॥३८॥
(भुजङ्ग)

निदाघे जनानां पयोदाप्तितुल्यं, भयादौ सहायं सुरारामकल्पम् ।
भवव्याधिनाशेऽगदङ्कारसत्कं, भजध्वं भजध्वं क्षितौ नाम वृद्धेः॥३९॥
(भुजङ्ग)

सुशिष्टं सुमिष्टं महाक्लेशपिष्ट-मरिष्टादिकष्टापतल्लोकयष्टि ।
सुपुण्यप्रभावात् सुधादीर्घिकाभं, भजध्वं भजध्वं क्षितौ नाम वृद्धेः॥४०॥
(भुजङ्ग)

भूयोऽपि भव्या वचनं मदीयं, सानन्दभावं शृणुतेति नम्रम् ।
यत्राऽस्ति वृद्धिः किल तत्र चन्द्रो, धन्यं ततः किं वदताऽत्र यूयम् ॥४१॥

काव्यं न तादृग् न च शास्त्रमाला, विद्वान्न तादृग् न च काव्यवेत्ता ।
प्राकाशि नो येन माहामहात्म्य-माकाशवेदी-स्थितशीतरश्मेः ॥४२॥

एवं धिया धीधनशस्तमानै-र्भेदावबोधे नयने पिधाय ।
इन्दोर्विमर्शो मनसा विधेयः, पश्चाद्रुचिस्तत्र सतां प्रमाणम् ॥४३॥

दृश्यो न धार्यः परमेष धार्य-स्तापी न, तापी बत तोषदायी ।
दूरे न चाऽऽरात् किल चैष चाऽऽरात्, क्षीणोऽस्ति नोऽयं तु सदा प्रकाशी ॥४४॥

गामी सदाऽसौ परमेष कार्ये, ताराधिपस्त्वेष तु सर्वनाथः ।
निशाविकाशी न दिवाविकाशी ह्ययं दिवारात्रि-विकाशमानः ॥४५॥

राजा द्विजानां न जनौघराजः, स्वामी रसानां न तु सर्वभूतेः ।
ज्योत्सना चकोरैः सततं सुपेया, कान्तिः समस्तैः सुखमत्र पेया ॥४६॥

धार्यः कथं सोऽत्र वियद्विहारी, धार्यः सुखेनैव धरा-विहारी ।
तुर्य्याष्टरन्ध्रेऽशुभपाकदायी, चेलानिवासी निखिलेष्टदाता ॥४७॥

पञ्चेषुबाणानलदेहदायी, तत्तापहारी हृदये विहारी ।
मेघाविकीर्णो भवतीह जातु, कर्माभिघातादमुको विशुद्धः ॥४८॥

दोषैरनेकैर्ग्रहसंविभागे, व्याप्तः शशाङ्कोऽम्बरमध्यवर्ती ।
भूभागराजी गुणराशिरेष, त्वन्वर्थसंज्ञां सफलीकरोति ॥४९॥

नीकाश एको गगनाङ्गणस्थे, चन्द्रे परं सोऽपि च दूरवर्ती ।
अस्मिंस्तु वृद्धिर्बहुचन्द्रकान्ति-र्ज्यायांस्ततोऽयं सततं नमस्यः ॥५०॥

निष्पक्षबुद्धया निजहृद्यचित्ते, विचारयन्तु स्वयमत्र भव्याः ।
ज्ञात्वोभयोरन्तरमत्र धीराः, सेव्यः शिवायोत्तम-वृद्धिचन्द्रः ॥५१॥

व्यूहः सुदृष्टो न मया गुणाना-मेकत्र पुंसि प्रबलप्रतापे ।
अस्मिन् मुनीन्द्रे सकला गुणौघा, मन्ये ततो नन्दति वृद्धिनाम ॥५२॥

भूरौ गभीरे सरितामधीशे, रत्नानि भूयांसि च कम्बुराशिः ।
हालाहलं तत्र च दोष एकः, क्षारं जलं नाऽत्र मुनावणीयान् ॥५३॥

गिरौ गिरीशे गिरिशाधिवासे, कैलासनाम्ना प्रथिते पृथिव्याम् ।
शैत्यं प्रभूतं समताप्रधानः, सर्वाङ्गिसेव्यो मुनि-वृद्धिचन्द्रः ॥५४॥

तुङ्गः सुमेरुः क्षितिमध्यवर्ती, संराजते यद्यपि रत्न-राज्या ।
दूरे स केषामपि नास्ति गम्यो, गम्यः परं साधुरयं सुखेन ॥५५॥

शीतो हिमांशू रविरुष्णरश्मि-र्दाही कृशानुश्चपला चलैव ।
साम्यं न केषां मुनिना त्वनेन तस्माद् गरीयो भज नाम वृद्धेः ॥५६॥

वृद्धेस्तु भेदो द्विविधो धरण्या-मुच्चैर्महीमोहकुटुम्बभाजः ।
एकः प्रपञ्चात्मतया विभाति, निर्वाणरूपस्त्वितरः प्रसिद्धः ॥५७॥

भेदे प्रपञ्चे जनता समस्ता, प्राणैः प्रयाणैर्नितरां निबद्धा ।
निर्वाणभेदे सुधियः कियन्तः, प्रायैः प्रयाणैः सुतरां सुलग्नाः ॥५८॥

संसारवृद्धिर्नितरां कुवृद्धि-र्यस्या भवाब्धौ जनतासु पातः ।
चिन्तामयी चित्तपयोजचान्द्री, त्याज्या ततः सा भवहानिकामैः ॥५९॥

मिथ्या प्रपञ्चे बहुल-प्रयासः, प्रायोऽत्र लोको नयनायने स्यात् ।
आरामरामाधनवर्द्धनेहः, सौधाभिलाषो ममता-निगूढः ॥६०॥

आपातरम्ये विषयाभिलाषे, कौटुम्बवृद्धौ क्षणभङ्गुरायाम् ।
चेतोऽभिलाषः सततं विशालः, पुंसां समेषावलोक्यतेऽत्र ॥६१॥

शैथिल्यमालभ्य विनाशि-वृद्धौ, निर्वाणवृद्धौ मनसा प्रयत्नः ।
कार्यो न हार्यं नरजन्म पुंभिः, पूते सुलब्धं शिवभारतेऽस्मिन् ॥६२॥

वृद्धेः कुटुम्बो विततोऽस्मि भूयान्, नानाविधैर्मोहमयैर्विलासैः ।
यत्प्रेमपाशैरिह सर्वजीवा, बद्धा न मुक्तिं भुवि कामयन्ते ॥६३॥

क्वचित्तरुण्यो मदनैकवासा, दृग्बाणपातैर्व्यथयन्ति यूनः ।
क्वचित् कुमार्यश्चपलैर्विनोदै-श्चेतांसि पुंसां सहसा हरन्ति ॥६४॥

क्वचित् कुमारा मृदुहासवाणी-चाटु-प्रयोगैर्निजबन्धुवर्गम् ।
शनैश्चलन्तः परिमोहयन्ति, मामेति काकेति मुहुर्वदन्तः ॥६५॥

क्वचिन्महाव्याधिमहाहिवक्त्रे, वेविश्यमाना विवशा रुदन्तः ।
हांहेतिशब्दैः परिखेदयन्ति, कथं ततः स्याज्झगिति प्रयाणम् ॥६६॥

क्वचिज्जनन्यः सुरकल्परूपा, निर्व्याजवात्सल्यसुकामगव्यः ।
स्वाभ्यर्णवर्तिप्रियतोकरत्नान्, मुञ्चन्ति नाऽहो प्रबलोऽत्र मोहः ॥६७॥

माता तु माता ममताप्रधाना, पुत्रैषणासक्तमनःप्रवृत्तिः ।
जातु प्रियात् स्वान् न च मोक्तुकामाः, सर्वेऽपरे हन्त च कार्यकामाः॥६८॥

मोहस्य माया परमा दुरन्ता, नाऽस्तो न तस्या इदमेव चित्रम् ।
ये ज्ञानिनस्तां सुतरां तरन्तु, मायास्यभोज्या अपरे भवन्तु ॥६९॥

त्यक्त्वा कुवृद्धिं भयदां सुखेन, निर्वाणवृद्धया खगणो विधेयः ।
अत्राऽपि सौख्यं विविधप्रकारै-र्भुक्त्वा परे पाणिगताऽस्ति मुक्तिः ॥७०॥

निर्वाणमार्गः सुखदो गरीयान्, शान्तिप्रधानो मुनियोगिगंम्यः ।
क्लेशस्य लेशो नहि यत्र कश्चिद्, रागादिवृद्धिर्न च यत्र काचित् ॥७१॥

नाम्नः प्रभावो गदितो मया वै, श्रीवृद्धिचन्द्रस्य मुनेः सुचारुः ।
नाम्नोऽनुकूलं चरितं हि तस्य, पीयूषकल्पं ननु वावदीमि ॥७२॥

मतिरियं जगतश्चिरकालतो, गतवतो विधिखेलनलासिनः ।
भवति ना भवतापविनाशको, निजपराभिमताभ्यधिवेदनः ॥७३॥

जगदिदं परिणामविलक्षणं, क्षपणवर्द्धनशीलमनुक्षणम् ।
भवति लाघवमत्र तदा यदा, प्रभुमुखागतधर्मपरम्परा ॥७४॥

जगति मानवराशिरपि क्वचित्, कुमतिकेसरिवक्त्रगतिग्रहः ।
भवति नैव तदा सुकृतानुगो, विपथमेति न चेद् विधियोगतः ॥७५॥

कुपथजालखगायितमानवान्, मतमतान्तरवेदि-सुपेशलाः ।
इह नयन्ति निजागमपद्धतिं, सदयमुग्धमनोहरणक्षमाः ॥७६॥

कुपथयायिजनोद्धृतिहेतवे, मुनिरसौ सुकुले जनिमाप्तवान् ।
इति च तस्य मुनेश्चरितामृतं, शृणुत भव्यजना गुणमन्दिरम् ॥७७॥

विदितमेव सतां विषयेष्विह, सकलकामखनिर्ननु भारतम् ।
जनपदो न च तादृश ऐहिको, मनसि योऽभिलषेन्न च भारतम् ॥७८॥

देशेषु तेषु विलसन्महनीयकीर्ति-र्यद्यस्ति कोऽपि जगतीतलमध्यवर्ती ।
पाञ्चाल एव विभवैः सुरराजधानीं, कौबेरिकामपि पुरीमधरीकरोति ॥७९॥

मालिन्यदोषरहिताः सरसीरुहौधै-र्वाप्यश्च तत्र परिपूर्णजलो विभान्ति ।
नद्योऽपि वीचिमुखराः सततप्रवाहाः, पीयूषवन्मधुरवारिवरा वहन्ति॥८०॥

एवंविधे जनपदे जनताहिताय, जाताजनिर्जनिमतां विभवोदयाय ।
जैनागमप्रचुरबोधजुषां बुधानां, श्रीवृद्धिचन्द्रमुनिराजमहोदयानाम् ॥८१॥

लाहोर प्रान्तमध्ये विलसति सजलैका चिनावा नदी या,
तीरे तस्या विभाति प्रमुदितमनुजा रामपुर्युत्तमैका ।
श्रीमद्भिर्योगिराजैरभिहतदुरितैस्तत्र लेभे सुजन्म,
शून्याङ्केभेन्दु( १८९० ) वर्षे हरिदिवसयुते पौषमासेऽच्छपक्षे ॥८२॥

यस्याऽस्ति तातो भुवि धर्मकीर्तिः, कृष्णाभिधाना जननी गुणाढ्या ।
तत्कुक्षिजातस्य शिशोः शिशुत्वे, वैराग्यवृत्तिः कथमत्र न स्यात् ? ॥८३॥

सुतस्य प्रेम्णा जनकेन भूरि, पाणिग्रहायैष मुदा न्ययोजि ।
पुण्यानुबन्धी भवसिन्धुवीचौ, कथं पतेदेष इति प्रभग्नः ? ॥८४॥

ज्ञाताऽस्य रूपस्य विहाय मोहं, हर्षेण दीक्षामुररीचकार ।
सेवां गुरूणां विनयेन कुर्वन्, बभ्राम भूमौ सह तैः सुखेन ॥८५॥

बुद्धेर्विकाशाद् विनयप्रभावा-च्छ्रीमद्गुरूणां मनसोऽभितोषात् ।
शब्दागमादींस्त्वरया प्रपठ्य, रेजे सुराचार्य इवाऽयमत्र ॥८६॥

अदेवयाजिनां पन्थाः, पाञ्चालेषु तदा महान् ।
प्रवर्धमानो वर्षासु, क्षुद्रगुल्मलता इव ॥८७॥

आसीत् सत्साधुतापेन, शुष्कीभूतो हि सत्वरम् ।
ह्रासः सत्यस्य कुत्राऽपि, न दृष्टो न च वा श्रुतः ॥८८॥

सदा प्रकाशमानोऽपि, मेघच्छन्नो हि भास्करः ।
जायते तद्वदत्राऽपि, सत्ये दृष्टान्त एषकः ॥८९॥

बुटेराजप्रतापाग्निः, प्रासरड्ढुण्ठकावनौ ।
दृश्यते यत्र कुत्राऽपि दग्धप्रायाऽधुनाऽपि सा ॥९०॥

तस्यैव पुण्यभाजोऽयं, शिष्यवर्यो धरातले ।
वृद्धिचन्द्राभिधानोऽधि-जातो जैनशिरोमणिः ॥९१॥

सौराष्ट्रगुर्जरमरुप्रभृतिप्रदेशे, सद्देशनां विदधतो भ्रमतो हिताय ।
उन्मूल्य ढुण्ढकमतं सफलीबभूव, यात्राऽस्य सिद्धकुधरस्य मुनेः सुपुण्या ॥९२॥

श्रीमज्जिनेन्द्रमुखभाषितधर्मसेतुं, संस्थाप्य ढुण्ढजलधौ मतिरज्जुपुञ्जैः ।
नाकं ह्यगात्क्षपितकर्ममलो मुनीन्द्रो, यं प्राणिनो गतभयाः सुतरां तरन्ति ॥९३॥

चन्द्रस्य चन्द्रत्वमतः प्रसिद्धिं, यातं यतो नाम महाप्रशस्तिः ।
धर्मोऽपि जैनो जिनदेवनिष्ठः, एतर्हि संयाति प्रशस्तभावम् ॥९४॥

यत्कीर्तिचन्द्रः सततं रसायां, संभ्रम्य संभ्रम्य न शान्तिमेति ।
मन्ये स एवाऽम्बरमध्यभागे, संराजते चन्द्रमवाप्य शान्तः ॥९५॥

तं सर्वलोककमनीयमनल्पकान्तिं, को वा भजेन्नहि च ना गुरुवृद्धिकामी
चिन्तामणिं सकलसौख्यकरं विहाय, को लोष्टपिण्डमभिकामयते शरीरी ॥९६॥

तन्नामधामसुजुषो गुणवृद्धिलोला, रङ्का भवेयुरिह नाऽपि भवान्तरेषु ।
तस्माद् भजध्वमनिशं गुण-वृद्धिचन्दं, वक्ति प्रमाणपटु-माधवदास एषः ॥९७॥

पुण्यात्मनामुभयलोकयशोऽभिवृद्धि-र्वंशोऽपि वंशमुकुटो विलसत्प्रभावः ।
यद्वंशसिन्धुचलवीचिमहासुपोतः, श्रीनेमिसूरि-मुनिराजविनेयभानुः ॥९८॥

ऐदंयुगीनसमयेऽपि युगप्रधानः, संभाति शिष्यनिकरैर्विबुधाग्रगण्यैः ।
सोऽयं विभातु विदधातु शिवं समेषां, श्रीवृद्धिचन्द्रमुनिराड्विबुधद्रुकल्पः ॥९९॥

न्यायादिशास्त्रपरसिन्धुविलोडनाग-श्रीनन्दनाभिधमुनीशनिदेशतोऽयम्
श्री वृद्धिचन्द्रशतकं ललितं व्यधत्त तद्भक्तिभावितहृदा विबुधेन केन ॥१००॥

॥ इति श्रीवृद्धिचन्द्र-शतकं समाप्तम् ॥

## ३२. पूज्योपाध्याय श्री हेमचन्द्रविजय गणिवराणां सूरिपदप्रदानावसरे प्रशस्ति पद्यावलिः ॥

यः सर्वोदयनन्दनेन सहितः सद्दर्शनः श्रीमहान्,
विज्ञानामृतपद्मसौरभलसल्लावण्यकस्तूरभृत् ।
यो लोकं शममानिनाय विदितैः सूरीश्वरैरष्टभि-
र्जैनाकाशनभोमणिजयतां सूरीशसम्राडसौ ॥१॥

तत्पट्टे विबुधेन्द्रधर्मरमणी-प्राचीशिरस्युन्नते,
धर्मप्राण-समस्त-सज्जनमनः-पाथोजिनी-बान्धवः ।
यः सद्धर्मधुरन्धर-प्रणयनात् कल्पद्रुमो मूर्तिमा-
नाचन्द्रार्कमरन्ध्रकीर्तिरमृतः सूरीश्वरो दीव्यताम् ॥२॥

चारित्रं महनीयमुज्वलतरी योगो यदीयं वचः,
श्री तृणामनुरञ्जनं कठिनता धर्मोत्थितौ नान्यतः ।
जैनाचार-विचारचारू-हृदयस्तत्त्वार्थ सन्देशकः,
धर्मोद्धारपरायणी विजयतां मेरुप्रभः सूरिराट् ॥३॥

तत्पट्टं प्रविभूषयन् बहुमतः सौजन्यकल्पद्रुम-
स्वर्भूमिः कलिकाल-दारुण-रिपुध्वंसाय यः सद्व्रतः ।
प्राणा धर्मधनस्य शर्म विदुषां तेजस्विनां विश्रमः;
स श्रीमानधिकाधिकं विजयतां श्री देवसूरीश्वरः ॥४॥

यदीयं पाण्डित्यं जगति विदितं सर्वविषय-
प्रणीताः सद्ग्रन्था अहह पुनरुक्तं विदधति ।
अपूर्वं गम्भीरं वचनमपि हृद्यं धृतितर्तिं,
निकामं प्रब्रूते हृदयमयते दर्शनरतिम् ॥५॥

यदीयं स्वाभाव्यं विशदविशदं सर्वशमिनां,
प्रियप्रायं यस्मै स्पृहयति सदा प्राज्ञनिकरः ।
लये रत्नानाम् यो विलसति स धर्मध्वजधुर-
न्धरः सूरीशेन्द्रो जयतु च चिरं जीवतु शतम् ॥६॥

नव्यन्यायेऽप्रतिहतगतिस्तर्कशास्त्रेष्वधीती,
जैनन्याये गहनगहने मन्दरः क्षीरसिन्धौ ।
तत्त्वार्थाध्या-पनकुशलता वाहिनी वाहिनीशः,
सूरिः धीमान् जयतु जयतु श्रीमहान् हेमचन्द्रः ॥६॥

आचारेण विना यथा सुविशदं ज्ञानं न मुक्तिप्रदं,
शास्त्रेषु प्रथितं तथा सुविदितं कर्मप्रधानः परम् ।
इत्यालोच्य विलुप्त-शास्त्र-निकरोद्धाराय यस्तत्परः,
स श्रीमान् विबुधाग्रणीर्विजयतां श्री हेमचन्द्रो भवान् ॥८॥

श्रावं श्रावं वदनकमलाद्यस्य गीर्वाणवाणी-
व्याख्यानं तन्मधुरिमगुणागारमत्यादरेण ।
आचार्याख्यं पदमिदमहो दातुकामा अभूवन्,
सूरिः सोऽयं प्रथितमहसा दीव्यतां हेमचन्द्रः ॥९॥

विद्धांसो बहवो भवन्ति भूवनेऽभूवन् भविष्यन्ति च,
प्रायस्तेन सदैव कोमलहृदो नो सर्वज्ञलोकम्पृणाः ।
द्वित्राः सन्ति भवादृशाः किमथवा नो साम्प्रतं भूतले,
निश्चेतुं नहि पार्यते स तु भवान् स्तोतुं कथं शक्यते ? ॥१०॥

आचार्येण पदेन सर्वविबुधश्लाध्येन लोकोत्तरं,
तेजः ख्यापयताऽप्यनेन न भवानेकान्ततो भूष्यते ।
शास्त्रे भूरिकृतश्रमेण सततध्यानाऽग्निसन्दीपितै-
कान्तध्वान्तचयेन तत्र भवताप्येतत् पदं शोभते ॥११॥

हैमीयमप्रतिमसूत्रतरङ्गरङ्गं,
शब्दानुशासनममुद्रमहासमुद्रः ।

आद्यन्ततः समवगाह्य विशोध्य येन,
स्वीयं कृतं नवमिवाद्य विभाति कामम् ॥१२॥

यः सर्वथा निजगुरुमनुवर्तमानो,
न्यायादिदर्शनविचक्षणतादिनापि ।
वैदुष्यमाप्य विमलं परमात्मभाव-
श्चाकाश्यतामयमनेन पदेन सूरिः ॥१३॥

यस्मादधीत्य विशदं ननु दर्शनानि,
काव्यं सशब्दमनधं परिशील्य सम्यक् ।
प्रद्युम्न एव मुनिराजपदं दधानः,
देदीप्यते विजयतां स भवानुदारम् ॥१४॥

कलिकाले सर्वज्ञो,
योऽसौ सूरीश्वरोऽखिले भुवने ।
राजति स इव भवानपि,
सूरीश्वरतां प्रपद्यतां कामम् ॥१५॥

●

पं. नरेन्द्र झा
नव्यन्याय व्याकरण साहित्याचार्यः
प्राध्यापक : जी.टी. सं. कालेज
बम्बई

❀ ❀ ❀

## पूज्यश्री देवसूरीश्वराणां गुरुस्तुतिः ।

सदा संयमाऽऽराधने सावधानो-
गुणैर्वत्सलत्वादिभिः पूर्णपूर्णः ।
प्रसन्नाकृतिर्यश्च सौम्यस्वभावः,
स्तुवे तं गुरुं देवसूरिं सुभक्त्या ॥१॥

## ३३. गुरूस्तुतिः

धर्मः प्रापि यतो मया शिवफलः कल्पद्रुतुल्योऽनघो,
यन्नामस्मृतिरेव मंगलकरी सर्वाघसंहारिणी ।
श्री तीर्थङ्करशासनैकरसिकः सद्ब्रह्मसौभाग्यभृत्,
सोऽयं श्रीगुरुनेमिसूरिभगवान् बोधं विधत्तां मम ॥१॥
रचयिता - पूज्याचार्य श्री विजय नन्दनसूरीश्वरजी महाराजः

## ३४. ॥ श्री गौतमस्वामिस्तुतिः ॥

(रचना : सं. २०१८)

(प्राभातिक रागः)

स्वर्णपद्मासने राजमानं नुवे,
योगिराजं सुरेन्द्रार्च्यपादम् ।
सर्वलब्ध्याकरं वरगुणांभोनिधिं,
श्रीवसुभूतिपृथ्व्यङ्गजातम् ॥१॥

सर्वकार्यं नृणां यदभिधानाद् द्रुतं,
सिद्ध्यतीष्टं च नो विघ्नलेशः ।
वर्धमानप्रभोराद्यगणभृद्वरं,
बीजमतिशालिनं श्रीन्द्रभूतिम् ॥२॥

❀ ❀ ❀



# संस्कृत गद्यविभाग

# संस्कृत गद्यविभाग : अनुक्रम


| क्रम | कृति | पृष्ठ |
|---|---|---|
| १. | कलिकालसर्वज्ञसूरीश्वराणां प्रशस्तं जीवनम् । | 211 |
| २. | आत्मपदार्थसिद्धिः । | 214 |
| ३. | श्रीमद्विजयामृतसूरीश्वराणां पुण्यजीवनलेशः । | 218 |
| ४. | अहो ! अत्यद्भुतं भगवतो वीरस्य वात्सल्यम् । | 247 |
| ५. | पूज्यपादशासनसम्राट् श्री परमगुरु भगवतां प्रथमं दर्शनम् । | 252 |
| ६. | ते हि नो दिवसा रम्याः । | 256 |

# १. कलिकालसर्वज्ञ सूरीश्वराणां प्रशस्तं जीवनम्

—पूज्याचार्यदेवसूरिशिष्यः विजयहेमचन्द्रसूरिः

कलिकालसर्वज्ञेत्यप्रतिमबिरुदेन जगति समस्ते विशेषतश्च जैनशासने प्रख्यातिमन्तः श्रीहेमचन्द्राभिधानाः सूरीश्वरा आर्हत-शासनस्य बाढं प्रभावनाकारकाः सञ्जाताः ।

तेषां जीवनं कवनञ्च सर्वेषां कृते अत्याश्चर्यकरं विद्यते ।

पूर्वभवीयप्रबलसंस्कारसम्पत्तिं समादायैव ते हि पूज्या अत्रा-वतरितवन्तः, कथमन्यथा तादृशि लघुतमे वयसि मतिविभव-विराजिताः, प्रबलवैराग्यभावनाभावितान्तःकरणाः दीक्षाग्रहणाय समुत्सुकमानसाश्च स्युः !

जन्म दीक्षाग्रहणं च—

धंधुकाभिधाने ग्रामे मोढवणिग्ज्ञातीयगुणगौरवशालि-चच्च (चाचिग)कुले तद्धर्मपत्नी-रत्नकुक्षिणीश्रीचा(पां)हिणीजननी-कुक्षौ वि.संवति ११४५ तमे कार्तिकशुक्लपूर्णिमायां समासादित-जन्मान एते पूज्यपुरुषा धृतचांगदेवपुण्याभिधाना बाल्यकालादेव विशिष्टक्षयोपशमशालिनो निजापूर्वबुद्धिचातुर्यचमत्कृतविचक्षण-चेतस आसन् ।

समवयस्कसहाध्यायिबालकेषु सर्वथाऽनन्यसदृशा ह्येते दर्शन-मात्रादेव सर्वेषां परमप्रीतिकरा भृशमाह्लादजनकाश्चाऽभूवन् ।

पूर्णतल्लगच्छीयश्रीदत्तसूरीश्वरपरम्परायाम् आचार्यश्रीगुणसेन सूरीश्वरपट्टाम्बरदिवाकराः श्रीदेवचन्द्रसूरीश्वराः समभूवन् । प्राकृत-भाषायां गद्यपद्यमयश्रीशान्तिनाथचरित्ररचनाकारकास्ते हि पूज्या ग्रामानुग्रामं विहरन्तो धर्मोपदेशदानेन भव्यजनान् प्रतिबोधयन्तश्च धंधुकाग्रामे पादौ अवधारितवन्तः ।

पूज्याचार्यभगवतां दर्शनमात्रेणैव सञ्जातापूर्वस्नेहसद्भाव-श्चांगदेवः शनैः शनैः परिचयं कुर्वन् गाढप्रेमास्पदं जातः ।

सूरीश्वरा यदा ततो विहारं कृतवन्तस्तदा बालश्चांगदेवो निज-जनकजनन्योरनुमतिं गृहीत्वा तैः सहैव विहारमकरोत् ।

बालोऽप्यबालधिषणः स गुरुणा सह विहरन् क्रमशः स्तंभतीर्थ( खंभात )नगरं संप्राप्तः ।

तत्र तद्वास्तव्यनेमिनामकतन्मातुलद्वारा चाचिगपाहिण्यौ विबोध्य गुरुश्रीदेवचन्द्रसूरिणा नववर्षीयश्चांगदेवो दीक्षितः, तस्य मुनिसोमचन्द्र इत्यभिधानं च विहितम् ।

सूरिप्रदप्रदानम्–

स्वल्पेनैव कालेन विशिष्टक्षयोपशमबलेन विनाऽऽयासं समधिगतसकलवाङ्मयवैदुष्यं तं गुरुप्रवरः श्रीदेवचन्द्रसूरीश्वरः वि.सं. ११६६तमे वर्षे मरुधरदेशे नागोरनामके नगरे महता महेन सूरिपदं दत्तवान्, तदा तस्य श्रीहेमचन्द्रसूरिरिति नव्याभिधानश्च कृतवान् ।

ततश्च स अजारिनामके ग्रामे वागधिष्ठात्रीं श्रीसरस्वतीदेवीं समाराध्य सम्प्राप्य च तदीयवरप्रसादं विरचय्य तर्कव्याकरणकाव्य-कोशछन्दोऽलङ्कारादिसमस्तविषयेषु लघुबृहत्तमाननेकमौलिकग्रन्थान् विरच्य जैनसाहित्यस्य महतीमुपासनां विदधे ।

तेषामनन्यसाधरणं वैदुष्यं निरुपमं ग्रन्थरचनाकौशलञ्च विज्ञाय कोऽपि मतिमान् किं न निजमूर्धानं धुनयेत् ?

ग्रन्थरचनया सार्द्धं तैः सूरीश्वरैः श्रीसिद्धराजजयसिंहाभिधानभूपालः श्रीकुमारपालाभिधक्ष्मापालश्च प्रतिबोधितः । तत्र कुमारपालमहीपालस्तु जैनधर्ममङ्गीकृत्य द्वादशव्रताराधनरूपश्रावकाचारपालनेन परमार्हत इति विरलं बिरुदमपि प्राप्तवान् । अपि च स हि श्रीहेमचन्द्राचार्यगुरुवरोपदेशेन स्वीयाष्टादशदेशेषु अमारिं (जीवहिंसानिवृत्तिं) प्रवर्तितवान् ।

अधुना बिहार-बङ्गादिदेशापेक्षया गुर्जरमरुधरादिदेशेषु यद् प्रवराचारविचारवैशद्यं दरीदृश्यते तत्र हेतुः श्रीकुमारपालनृपतेः समुचिता अहिंसा प्रधाना राज्यव्यवस्थैव । न ह्यत्र विषये केषामपि वैमत्यम् ।

प्रान्ते - श्रीहेमचन्द्राचार्यभगवद्विहितभूपालप्रतिबोधमुपवर्ण्य केनचित् कविना विहितां स्तुति-मुल्लिख्य विरमामि-

सन्त्यन्ये कवितावितानरसिकास्ते भूरयः सूरयः,  
क्ष्मापस्तु प्रतिबोध्यते यदि परं श्रीहेमसूरेर्गिरा ।  
उन्मीलन्ति महामहांस्यपि परे लक्षाणि ऋक्षाणि वै,  
नो राकाशशिना विना बत भवत्युज्जागरः सागरः ॥ इति

❀ ❀ ❀

# २. आत्मपदार्थसिद्धिः

—ले. पूज्यपादाचार्यश्रीविजयदेवसूरिश्वराणां शिष्यः
विजयहेमचन्द्रसूरिः

दृश्यते सम्प्रति जगति यद् आस्तिकरूपेण स्वं मन्यमानोऽपि जनः नास्तिकवदेव व्यवहरति । तत्कारणन्तु एतदेव यद् तस्य मनसि आत्मरूपतत्त्वस्य निश्चितरूपेण प्रतीतिः नैवास्ति ।

यद्यात्मनः सिद्धिः सन्दिग्धा तर्हि तदाधारेण वतर्मानाः पुण्य-पापपरलोकपुनर्भवादयोऽपि असन्त एव भवन्ति ।

अत आत्मसिद्धिः प्रारम्भे एव कर्तुं योग्या ।

अनेकशास्त्रेषु अस्योपरि भिन्नभिन्नरूपेण बह्व्यः चर्चा-विचारणाः कृताः विलोक्यन्ते । प्रभुमहावीरपरमात्मनः प्रथमगण-धरश्रीमदिन्द्रभूतेरपि एष एव सन्देहः मनसि आसीत् ।

प्रभुवीरेण तन्मनःस्थितं सन्देहं कथयित्वा प्रत्यक्षादिप्रमाण द्वारा स सन्देहः दूरीकृतः ।

कतिपयजना एवं कथयन्ति यत् आत्मा नैव प्रत्यक्षः, स तु अनुमानादिप्रमाणद्वारैव साधयितुं शक्यः ।

भगवता कथितम् - आत्मा प्रत्यक्षगोचरः । कथम् ?

जगति एवमवलोक्यते यत् यस्य गुणाः प्रत्यक्षाः भवन्ति स गुण्यपि प्रत्यक्ष इति मन्यते ।

'जीवोऽस्ति न वा' एतादृशसंशयरूपविज्ञान एव जीवोऽस्ति। स तु सर्वस्यैव प्रत्यक्षरूपो विद्यत एव । यः विज्ञानरूपो भवति स

स्वसंवेदनप्रत्यक्षतः स्वसंविदितो भवत्येव । अन्यथा विज्ञानस्य ज्ञानरूपत्वं नैव घटते । अतः संशयरूपविज्ञानं यदि प्रत्यक्षमस्ति तर्हि जीवोऽपि प्रत्यक्षोऽस्त्येव ।

अपि च विनात्मानं यस्य कस्यापि जनस्य मनसि एवं भवति यत्-मयेदं कृतम्, इदमहं करोमि, इदमहं करिष्यामि, इति त्रैकालिकविषयः प्रत्ययो भवति, स कथं घटिष्यति । अत्र प्रत्ययः यत् अहंविषयकं ज्ञानं भवति तदेवात्मनः प्रत्यक्षसिद्धौ प्रमाणम् ।

एतज्ज्ञानं नैवानुमानम् यतस्तद् लिङ्गजन्यं न, नापि च आगमरूपप्रमाणजन्यं यतः आगमानभिज्ञानां जनानामपि एतादृशः अहंविषयकः अन्तर्मुखबोधो भवति ।

अन्यच्च आत्मनः अविद्यमानतायाम् 'अहम्' एतादृशं ज्ञानं कथं भवेत् । ज्ञानं कदापि निर्विषयं तु न भवत्येव । यदि अहंप्रत्यय-विषयभूतात्मनः स्वीकारो न क्रियते तदा तज्ज्ञानं निर्विषयमेव भविष्यति । तत्तु न समीचीनम् । अतः 'अहम्' इत्याकारकं यज्ज्ञानं सर्वेषां भवत्येव तस्मात् तद्विषयतया आत्मनः स्वीकारोऽपि अवश्यमेव कर्तुं योग्यः ।

अपि च एतादृशः प्रत्ययः शरीरविषयकः नैव स्वीकर्तुं योग्यः यतः मृतावस्थायां तादृशप्रत्ययस्य अभावः सर्वेषां दृश्यत एव ।

आत्मनः प्रत्यक्षसिद्धौ अपरापि युक्तिरत्र निर्दिश्यते । यत्-आत्मनः स्मरणादिविज्ञानरूपगुणाः प्रत्यक्षविषया भवन्ति ।

अतः आत्मा प्रत्यक्षोऽस्ति ।

गुणप्रत्यक्षत्वे गुणिनोऽपि प्रत्यक्षत्वं सर्वत्र निर्विवादं स्वीक्रियत एव ।

रूपादयो घटस्य गुणाः ते प्रत्यक्षज्ञानविषया भवन्ति अत एव घटोऽपि प्रत्यक्ष इति व्यवहारो भवति । गुणगुणिनोरभिन्नत्वात् ।

गुणगुणिनोरभिन्नत्वं तु सर्वैरपि स्वीक्रियत एव । तदस्वीकारे तु पदे पदे अनेकविधा आपत्तिः आपद्येत ।

यतः प्रथमं तु घटादिपदार्थाः सर्वेषां प्रत्यक्षविषयाः सन्ति तत्रैव दोषः समापद्येत । कथम् ? चक्षुरिन्द्रियेण तु रूपमेव गृह्यते, न घटः, घटस्तु रूपाद् भिन्न एव । तदा 'घटो मया ज्ञातः' इति व्यवहारो न भविष्यत्येव ।

व्यवहारस्तु भवत्येव, तस्मात् गुणगुणिनोरभिन्नत्वमेव स्वीकार्यम् न तु भिन्नत्वम् ।

ततश्च स्मरणादिगुणाः प्रत्यक्षगोचराः भवन्ति ते च विषयं विना नैव कदापि स्थातुं शक्नुवन्ति, यश्च तेषां विषयः स एवात्मा अतः गुणप्रत्यक्षे गुणिनः आत्मनश्चापि प्रत्यक्षत्वं सिद्धं भवति । अपि च ज्ञानादिगुणानाममूर्तत्वात् देहस्य च मूर्तत्वात् ज्ञानादयो गुणाः देहस्य नैव संभवन्ति किन्तु अमूर्तस्यात्मनः एव सम्भवन्ति ।

**अनुमानेनात्मसिद्धिः**

दण्डादिकरणानामधिष्ठाता कुंभकार इव इन्द्रियरूप करणानामपि कोऽपि अधिष्ठाता भवितुमर्हति । यश्चाधिष्ठाता स एवात्मा । नान्यः कोऽपि ।

अपरञ्च - इन्द्रियद्वारा विषयाणां ग्रहणं भवति अतस्तयोर्मध्ये ग्रहणग्राह्यसम्बन्धोऽस्ति, तत्र कोऽपि ग्राहकः भवितुमर्हति, तं विना ग्रहणं कः कुर्यात् । यः ग्राहकः सैवात्मा ।

अन्यच्च - देहादीनां भोक्तृत्वेनाऽपि आत्मनः सिद्धिर्भवति । यद् भोग्यमोदनादि वस्तु विद्यते तस्य भोक्ता पुरुषादिर्भवत्येव एवं देहाद्यपि भोग्यमस्ति अतस्तद्भोक्तृत्वेन आत्मनः सिद्धिर्जायते ।

तथा च - जगति ये केचन संघातरूपाः पदार्थाः गेहादयो विद्यन्ते तस्य देवदत्तादिः स्वामिरूपेण भवत्येव । तथैव देहादिरपि संघातरूप एव अतस्तस्यापि कोऽपि स्वामी तु अवश्यमेव भवितुमर्हति

यः स्वामी सैवात्मा । आत्मानं विना देहादेः स्वामी भोक्ता च नान्यः कोऽपि संभवति अतः आत्मैव स्वामितया सिद्ध्यति ।

अपि च - यस्य-विषये संशयो जायते स कुत्रापि विद्यमानः भवत्येव । अविद्यमानवस्तुनः कुत्रापि संशयो न भवत्येव । अस्माकं मनसि 'जीवोऽस्ति न वा' इति संशयो भवति, तेनापि आत्माऽस्ति इति सिद्ध्यति ।

'नासतो विद्यते भावो, नाभावो विद्यते सतः' इति वचन-मेतदर्थसंसूचकम् । जगति ये केचन पदार्था विद्यन्ते तद्वाचकाः शब्दाः भवन्त्येव तथा ये शब्दाः विद्यन्ते तेषां पदार्था अपि भवन्त्येव ।

निषेधरूपेणात्मनः सिद्धिः ।

यस्य कस्यापि वस्तु केनाऽपि यदि निषेधः क्रियते, तर्हि तस्य वस्तुनः विद्यमानताऽवश्यं भवत्येव । यथा कोऽपि कथयति - अघटः, तदा तत्प्रतिपक्षी घटः कुत्रापि विद्यते एव । यदि केनापि जीवनिषेधः क्रियते तेनापि जीवस्य सत्ता निश्चीयते ।

देवदत्तो नास्तीति कथने देवत्तस्यात्र सत्ता न विद्यते किन्तु अन्यत्र कुत्रापि तस्य सत्ता विद्यते एवेति प्रतीयते ।

एवं प्रकारेण आत्मनः सिद्धौ सत्यां पुण्यपापकर्मपर-लोकादीनामपि सिद्धिर्भवति ।

यदि परलोकोऽस्ति, तदा तस्य प्राप्तिः स्वकृतशुभाशुभ-कर्मयोगेनैव भवति । शुभकर्मणा सद्गतिः, अशुभकर्मणा च दुर्गतिः जीवानां भवति । तर्हि पूर्वकृतप्रबलपुण्योदयेन प्राप्ते नरजन्मनि सर्वैरपि स्वात्मकल्याणेप्सुभिर्नरैः दानादिधर्मेषु निर्मल-भावतो यतितव्यमेव । तेनैव तेषामिहजन्मनि सुखशान्तिसौभाग्यानि परलोके सद्गतिः परम्परया च मोक्षप्राप्तिः नितान्तं भविष्यन्ति । आत्मसिद्धेरयमेव हि लाभः । इति शम् ॥

❀ ❀ ❀

## ३. चरित्रकथा

# शास्त्रविशारद-कविरत्न-पीयूषपाणि-पूज्यपादाचार्य श्रीमद्विजयामृतसूरीश्वराणां

## पुण्यजीवनलेशः

—ले. पूज्यपादाचार्यश्रीविजयदेवसूरिश्वराणां शिष्यः
विजयहेमचन्द्रसूरिः

प्रतिपलमपि निजजनुषो, येन व्ययितं परोपकृतिकरणे ।
तमनुपमोज्ज्वलचरितं, वन्दे विजयामृतं सूरिम् ॥

सकलासुमत्सुखसन्दोहदानप्रपाभं लोकोत्तरं श्रीजिनशासन-साम्राज्यमद्यावधि यदस्खलितं प्रवर्तते तत्र श्रीमद्गुरुभगवतामेव परमोपकारः ।

चरमतीर्थपतिश्रीमहावीरप्रभोः पट्टपरम्परायामनेकानेके सूरीश्वराः समभूवन् येषां शरदिन्दुसमुज्ज्वलचरितानि विदित्वा वयमतीवाऽऽश्चर्यचकिता भवामः ।

श्रीमद्वीरप्रभोः प्रथमपट्टधरः सञ्जातः पञ्चमगणभृत् श्रीसुधर्मस्वामी भगवान् । तदनुचरमकेवलिश्रीजम्बूस्वामिप्रभृतयः गुणगणमणिरोहणायमानाः श्रुतधरपुरुषाः क्रमशः सञ्जाताः । तत्परम्परायामेव विक्रमीये विंशतितमे शतके सञ्जाताः श्रीमन्तः नेमिसूरीश्वराः, ये हि शासनसम्राडिति बिरुदेन समग्रेऽपि जिनशासने प्रसिद्धाः समभूवन् ।

तैः परमगुरुप्रवरैः सकलविद्वज्जनचेतश्चमत्कारिवैदुष्यविभूषितैः निजाप्रतिमाद्भुततमसमाचरणेनोपदेशदानादिना च जिनशासनस्य सप्तक्षेत्री नवपल्लविता विहिता ।

तेषां प्रविरलगुणगणालङ्कृतशिष्यसमुदाये गणनापात्रस्थान-धारिणः शास्त्रविशारद-कविरत्न-पीयूषपाणीतिबिरुदत्रयसमलङ्-कृताः समजनिषत पूज्यपादाचार्यप्रवरश्रीमद्विजयामृतसूरीश्वर-महाराजाः ।

क्व लोकोत्तरविशिष्टतरगुणनिकुरम्बेन भृतमृतं तेषामतीवसमुन्नतं जीवनं ? क्व चाऽस्मदीया स्वल्पविषया मतिः ? तथाऽपि स्वकीया-शक्तिमङ्गीकृत्याऽपि तद्भक्तिवशंवदतया तच्चरितालेखने किञ्चित् प्रयत्यते ।

## जन्मभूमिः

अस्तीह रम्ये भारतदेशे अहिंसा-सत्यादिगुणानां गाढतर-संस्कारै रमणीयतरः गूर्जरप्रदेशः । तत्राऽपि शौर्य-धैर्य-साहसिकता-निर्भीकतादिगुणगरिष्ठजनोत्पत्तिकारणतया सर्वत्राऽपि प्रसिद्धतरः सौराष्ट्रनामको भूभागः ।

यत्रोत्पन्नजनानां बाल्यकालादेव यादृशं नैपुण्यं दृष्टिगोचरं जायते तादृशमन्यत्रोत्पन्नानां वृद्धत्वेऽपि सुदुर्लभम् ।

यत्र विराजते भवोदधियानपात्राभः श्रीशत्रुञ्जयतीर्थराजः, यस्मिन् प्रतिकङ्करमनन्तानन्तात्मानः तीर्थमाहात्म्यादेव कृत्वा सकल-कर्मणां क्षयं प्राप्तवन्तः मोक्षाभिधानं परमपदम् । पुनश्च यत्र बालब्रह्मचारि-द्वाविंशतितमतीर्थकृत्-श्रीनेमिनाथप्रभोः दीक्षा-कैवल्य-निर्वाणरूप-कल्याणकत्रितयं समजनि तत् श्रीरैवताचल-महातीर्थं भक्तजननयनमनसोः सुधाञ्जनकल्पं समुद्योतते । यत्र भविकचकोरचन्द्रायमाण-श्रीचन्द्रप्रभस्वामिभगवतामनन्यप्रभाव-सम्पन्नमूर्तिशोभितं श्रीचन्द्रप्रभासपत्तनाख्यं तीर्थं विलसति । यत्र श्रीवीरात् अशीत्युत्तरनवतिप्रमितसंवत्सरे समर्थशासनप्रभावक-श्रीदेवर्द्धिगणिक्षमाश्रमणाध्यक्षतायामाचार्यपञ्चशत्या परस्परं विचार विनिमयं कृत्वा सर्वसम्मतिं च संसाध्य भाविकल्याणार्थिजीवाना-

मनुग्रहायाऽऽगमग्रन्थाः पुस्तकारूढा विहिताः, तदैतिहासिकं श्रीवलभीपुराख्यं नगरं वरीवर्ति । यत्र शासनसम्राट्-तपागच्छाधिपति श्रीमद्विजयनेमिसूरीश्वरगुरुभगवतामुपदेशेन ययोस्तीर्थयोः नव निर्माणरूपो जीर्णोद्धारो विहितस्तौ श्रीशत्रुञ्जयतीर्थाधिराजस्य सजीवनशृङ्ग( टूंक )तया ख्यातं श्रीकदम्बगिरिमहातीर्थं तथा श्रीतालध्वजगिरिश्च विराजमानौ स्तः ।

तस्य झालावाडेति विदिते प्रदेशे वर्तते बोटाद ( बहुताद ) सञ्ज्ञकं नगरम् । तत्र इक्ष्वाकुवंशविभूषणप्रथमतीर्थपतिश्रीआदिनाथ प्रभोः प्राचीनः गगनोत्तुङ्गशृङ्गमण्डितः मनोहरो जिनालयः शोभते ।

विभिन्नक्षेत्रेषु गणनापात्राः नैके सन्तः सत्यः महात्मानश्चाऽत्र समभूवन्, ये हि स्वीयविशदोदात्तजीवनवृत्तैः भूमिमिमां सर्वत्र प्रख्यापितवन्तः ।

राष्ट्रशायरश्रीझवेरचन्द्र-मेघाणीमहोदयस्येयं कर्मभूमिरासीत् तथा यः किल बोटादकर-कविरूपेण सर्वत्र कविसमाजे विश्रुतोऽभूत् तस्य नदीपर्याय-शैवलिनी-स्त्रोतस्विन्यादि-सञ्ज्ञक काव्यकृतिकलापसर्जकस्य प्रासादिककवेः श्रीखुशालदासात्मज-श्रीदामोदरदासस्येयं जन्मभूमिः ।

अत्र नगरे जिनेन्द्रपूजापरिपूतमानसाः जिनवचनश्रवण-व्यसनिनः परमश्रद्धालवो धर्मध्यान-परायणा व्रत-नियमाभरण-विभूषिताः श्रवणसेवासमुत्सुकमानसाः श्रावकवर्या निवसन्ति स्म । तेषु देशाईकुलोद्भवः श्राद्धरत्न-वस्तानन्दभवानभाईनामा सुश्रावको वसति स्म तस्य सूनुः हेमचन्द्राभिधानः परमसात्त्विको भद्रप्रकृतिः संस्कार सम्पन्नश्चाऽऽसीत् । तस्य भार्या दीवाळीनाम्नी शीलसौ-भाग्या-दिगुणगण-सम्पन्ना धर्मपरायणा वात्सल्य-सम्भृतान्तःकरणा चाऽऽसीत् ।

विक्रमीय-नयन-बाण-ग्रह-चन्द्र( १९५२ ) मिते संवत्सरे

माघशुक्लाष्टम्यां गुरुवासरे श्रीहेमचन्द्रगृहे दीवाळीमातुः पवित्रकुक्षौ शुभस्वप्न-दोहद-संसूचितस्वीयपुण्यप्राग्भारभाजनत्वः कोऽपि पुण्यशाली आत्मा प्रासूत । उदितो हि बालदिनकरो यथा स्वस्वर्णमय मयूखसमूहैः सर्वमपि पृथ्वीलोकं कुङ्कुमवर्णाभिरक्तं करोति तथैवाऽनेन बालेन सर्वोऽपि निजपरिवारजनः प्रचुरतरस्नेहरागरक्तः कृतः ।

बालोऽयं भाविनि काले अमृतपदप्रापणाय प्रयतमानो भविष्यतीति विचार्यैव मातापित्रादिभिस्तस्याऽभिधानं 'अमृत' इति स्थापितम् ।

हेमचन्द्रस्य द्वौ भ्रातरौ आस्ताम् । एको लक्ष्मीचन्द्रः अपरश्च खीमचन्द्रः । द्वावपि श्रद्धालू धर्मपरायणौ श्रमण-श्रमणीभक्ति-वैयावृत्त्यादौ दत्तचित्तौ चाऽऽस्ताम् । तत्राऽपि लक्ष्मीचन्द्रस्तु नीतौ प्रामाणिकतायां च लब्धप्रतिष्ठः समस्तेऽपि नगरे च विवादादीनां समाधानेषु सर्वेषामपि मान्यनिर्णय आसीत् ।

अमृतकुमारस्याऽन्ये गिरधरलालः, ताराचन्द्रः, शामजी, कस्तूरचन्द्र इति चत्वारो ज्येष्ठाः वीरचन्द्रनामा पञ्चमश्चेति पञ्च भ्रातर चम्पाभिधाना भगिनी चैकाऽऽसन् । स्वीयभ्रातृभिः सवयोभिश्चाऽन्यैः सार्द्धं क्रीडन् स द्वितीयाशशीव वृद्धिमवाप्नोत् ।

## पूर्वजन्मनः संस्काराणां प्रभावः

जनक-जनन्योरुत्तमैः संस्कारैः सह बाल्येऽपि अमृतप्रवृत्तौ पूर्वजन्मनः संस्काराणां प्रभावो दृश्यते स्म । तैः संस्कारैः स विनाऽपि परप्रेरणां शिशुवयस्यपि दया-दानादिक्रियासु रुचिवान् आसीत् । कमपि प्राणिनं दुःखपीडितं दृष्ट्वा तस्य हृदयं सहसा आर्द्रीभूतं भवति स्म । षट्पञ्चाशदत्तरैकोनविंशतिशतसंवत्सरीये दुष्काले तस्य चतुर्वर्षदेश्य-स्याऽपि बुभुक्षाविह्वलान् जनान् दृष्ट्वा एतेभ्यः यदि किञ्चित् प्रदीयते तदा वरमित्यादयः शुभविचाराः मनसि प्रादुर्भवन्ति स्म । ( अयं प्रसङ्गस्तैः सूरीश्वरैः क्वचित् वार्ताप्रसङ्गे स्वमुखेनैव कथित आसीत् । )

## अध्ययनम्

प्राथमिकधार्मिकसूत्राणामङ्कानां चाऽभ्यासः गृह एव सम्पन्नः । तदनु प्रायः अष्टवर्षवयसि छगनलाल-नामकस्याऽध्यापकस्य पाठशालायां तस्याऽध्ययनं प्रारब्धम् । अन्यबालकापेक्षया तेन बुद्धेस्तैक्ष्ण्यात् अभ्यासे स्थैर्याच्च स्तोकेनैव कालेन शोभनतरमध्ययनं कृतम् । व्यावहारिकाभ्यासेन सह धार्मिकाभ्यासोऽपि अवश्यंकर्तव्यः इत्याशयेन पित्रा जसराजाभिधधार्मिकशिक्षकपार्श्वे तस्य धार्मिकाभ्यासोऽपि कारितः । ततो तृतीयकक्ष्यां यावत् बोटादनगरेऽध्ययनं कृत्वा व्यवसायार्थं उगामेडीतिनामकं ग्रामं गतवता पित्रा सह सोऽपि गतवान् । तत्रैव चाऽग्रेतनमध्ययनं प्रारब्धम् । किन्तु तत्र तस्य मनो न लग्नमतो पुनरपि स बोटादनगरं प्रतिनिवृत्तः । तत्र च पुरातनपाठ शालायामेवाऽभ्यासः प्रारब्धः । षण्मासानन्तरं पाठशालायां गतवानपि मतिनैपुण्येन सर्वानपि पाठान् शीघ्रमेव हृदयसात् कृतवान् सः ।

## बाल्येऽपि सत्यनिष्ठा

तदा तु प्रायः द्वादशवर्षीयः स पञ्चमकक्ष्यायां पठन्नासीत् । एकदा परीक्षाकालेऽध्यापकः प्रष्टव्यप्रश्नानामुत्तराणि स्वयमेव कृष्णपट्टिकायां लिखित्वा छात्रेभ्यो दर्शयन्नासीत् । एतद् दृष्ट्वा तस्य मनसि खेदः समुत्पन्नो यत् 'अरे ! किमिदमसमञ्जसमत्र विधीयते ? न ह्येतादृग् व्यवहारोऽध्यापकेन कर्तुमुचितः । परीक्षा तु विद्यार्थिनामभ्यासस्य परीक्षणार्थं विधीयते । तत्र यदि एवंरीत्योत्तराणि लिखित्वा दर्श्यन्ते तदा को लाभः परीक्षायाः ? तदात्वे तस्य तादृक् सामर्थ्यं नाऽऽसीत् यथा तत्प्रसङ्गं स प्रतिकुर्यात्, अतः स विषण्णः सञ्जातः ।

## संसारं प्रति वैराग्यम्

अनित्यो हि संसारे संसारिणां स्नेहभावः । स तु स्वार्थमय एव । सति स्वार्थे तादृशं स्नेहभावं प्रदर्शयेत् यथा तेन सदृशः जगति

कोऽपि नाऽन्यो भवेत् । स्वार्थे तु सृते स एव तं प्रत्यभिज्ञातुमपि नैवाऽभिलषेत् । यदि सर्वदा सर्वेषामखण्डस्नेहभावो वर्तेत तदा तीर्थकृतः चक्रवर्तिनश्च कथं तत्परित्यागं कुर्युः ? सन्ध्याभ्रराग इव क्षणविध्वंसिनी हि सांसारिकस्नेहस्य स्थितिः । क्षणे क्षणे तत्र परिवर्तनं भवति ।

इतः अमृतः स्वज्येष्ठभ्रातुर्गृहे कञ्चित् कालमुषित्वा पुनः उगामेडीग्रामे स्वजनक-जनन्योः पार्श्वे गतवान् सः । किन्तु तत्र तयोस्तादृशं वात्सल्यमननुभवन् स संसारान्निर्विण्णोऽभवत् । तन्मनसि तदैवंविधो विचारः समुत्पन्नो यथा 'अहो ! किमिदं दृश्यते मया ? ये स्वजनाः पूर्वं मयि भृशं स्नेहभावभृता आसन् त एवाऽधुना अपरिचिता इव व्यवहारं कुर्वन्ति !! तर्हि किं प्रयोजनमत्र निवासेन ? स्नेहभावविरहितैर्जनैः सार्धं निवासात्तु वरं गृहत्याग एव' इति ।

## स्वकीयमित्रवर्गः

सर्वेषामेव जीवने दृश्यते यत् तेषां जीवनं शोभनमशोभनं वा यज्जातं तत्र मित्रवर्गस्य सुमहन्निमित्तत्वम् ।

अमृतलालस्य तदा बोटादनगरे समशील-वयो-रसाश्चत्वारः सुहृद आसन् । एकः नरोत्तमदासः, द्वितीयः लवजी, तृतीयः गुलाबचन्दः चतुर्थश्च झवेरचन्द्रः । एते पञ्चाऽपि वैराग्यभावसंभृता गृहात् निर्गत्य दीक्षाग्रहणस्य योग्यमवसरं प्रतिपलं प्रतीक्षमाणा आसन् । यद्यपि सर्वेषां मातापित्रादयः स्वजना न कथमपि तेभ्य एतदर्थं सम्मतिं दातुं सज्जाः । तेषां सविधे संयमग्रहणस्य वार्ताकरणमपि दुर्लभम् । यदि कदाचित् दीक्षासम्बन्धि एकमक्षरमपि मुखान्निर्गच्छेत् तदा तेषामुपरि सर्वेऽपि रोषारुणचाक्षुषभावं भजेयुः । सर्वेऽपि स्वजना एतान् स्वविचारात् प्रच्यावयितुं विविधानुपायानुपयुञ्जन्ति स्म, तथाऽपि एते पञ्च तादृशदृढमनोबल-शालिन आसन् यत् स्वविचारात् मनागपि शिथिला नैव समभूवन् । यदा कदाऽपि समयः

प्राप्यते तदा सर्वेऽपि गुप्तरीत्या रहसि सम्मील्य परस्परं नैजं वृत्तान्तं प्रकाश्याऽग्रेतनं कार्यक्रमं निर्धारयन्ति स्म, यतः कः खलु समर्थः मेरुनिश्चलमनोबलवतः पुरुषान् स्वनिश्चयात् चालयितुम् ?

## गुरुवर्याणां बोटादे पादावधारणम्

येषां दर्शनेन सर्वेऽपि जनाः स्वं जन्म जीवनं च धन्यं मन्यन्ते स्म ते पूज्यपादाः शासनसम्राजः श्रीमद्विजयनेमिसूरीश्वराः विक्रमीये रस-दर्शन-ग्रह-शशाङ्क (१९६६)मिते वर्षे बोटादनगरं समागताः। तत्रत्या भाविकाः जनाः भक्तिभरोल्लसितहृदया गुरुवरान् नन्तुं तेषां भक्तिं च कर्तुं अहमहमिकया इतस्ततो धावन्ति स्म। समग्रेऽपि नगरे गुरुसमागमजन्यो महानुत्साहः प्रवर्तमानोऽभूत्। न केवलं जैनाः किन्तु जैनेतरा अपि सर्वतः समागत्य महता महेन गुरुसमागमप्रसङ्गं वर्धापयन्ति स्म।

भक्त्युल्लसितमानसास्ते स्थाने स्थाने तोरणालङ्कृतानि मण्डपानि रचयाञ्चक्रुः। तथा विचित्रवर्णैर्ध्वजपताकादिभिश्च समग्रमपि नगरं शोभायमानं व्यधापयन्। ग्रामान्तरादागताः ग्रामीणजनाः अदृष्टपूर्वां नगरशोभामिमां निरीक्ष्य परस्परं वार्तयन्ति स्म यद् नाऽस्मा-भिरेतादृशी नगरशोभा कदाऽपि दृष्टपूर्वा-इति। अहो ! धन्या एते जैनमतानुयायिनः सुश्रावकाः, यैर्भूरितरद्रव्यव्ययं विधाय नगरमिदं सुरलोकतुल्यमतिमनोहरं विहितम्-इत्यादि।

जिनशासनस्य गुरुभगवतां च बाढस्वरोच्चारितैः जयजयारा-वैर्वाद्यनिनादैश्च समग्रमपि नगराकाशं शब्दाद्वैतमयमिव सञ्जातम्। लघुलघुवयस्का बाला अपि हर्षोन्मत्तीभूय नृत्यन्त उत्पतन्तश्च भृशमा-नन्दमैयरुः। स्फारनेपथ्यालङ्कृता अप्सरस इव शोभमाना-स्तन्नगरनार्यः सुमधुरस्वरेण गुरुभक्तिगीतानि गायन्ति स्म। केचित् प्रबलभक्त्युल्लसन्मानसाः पुरुषाः दण्डिकाः पटहाँश्च करयोर्धृत्वा वर्तुलाकारं विरचय्य गुरुभगवतामग्रे गीतगानपुरस्सरं रासलीलां वितेनुः।

किं बहुना ? तदा यज्जातं तत् किल वर्णयितुमशक्यमेव । दृष्ट्वैतत् स्वागतममृतलालोऽपि कामं प्रीतमानसो बभूव । तदा तेन मनोरथरूपेण मनसि भावितमपि यद् "मज्जीवनेऽपि यद्येतादृक् सुसमयः पुण्योदयात् समागच्छेत् तदा नूनमहं धन्यातिधन्यो भवेयम् ।" तदा केनेदं ज्ञातमासीत् यदनेन विलोकितः स्वप्नः सुचारुतया सफलीभविष्यति !

## गुरूणां ज्येष्ठस्थितिकृते स्थिरता

एतादृशा महान्तः प्रभूतगुणगणसमलङ्कृताः पूज्यगुरु-भगवन्तः स्वकीयनगरे चातुर्मास्यं करिष्यन्तीति विज्ञाय तन्नगर-निवासिनो नरनार्यः अपूर्वानन्दोल्लाससम्भृतमानसाः समभूवन् ।

चतुर्दशवर्षवया अमृतलालोऽपि स्वमित्रैः सार्धं गुरुभगवतां पार्श्वे गमनागमनादिकं तद्भक्ति-वैयावृत्त्यादिकं तत्सत्सङ्गं च करोति स्म । गुरुभगवतां सान्निध्यममृतलालाय भृशं रोचते स्म । अतः स भोजनादि कर्तुमेव गृहं गत्वा झटिति तत् सम्पाद्य च उपाश्रयमा-गच्छति स्म आदिनं च मुनीनां पार्श्वे एव स उपविशति स्म । तदा हि गुरुभगवतां शिष्यसमुदये श्रीसुमतिविजय-श्रीसिद्धिविजय-श्रीदर्शनविजय-श्रीविज्ञानविजय-श्रीप्रभावविजय-श्रीउदयविजया-भिधाना मुनयो बाल्यात्तसंयमा निरन्तरं स्वाध्यायाध्ययनादिषु लीनचित्ता आसन् । शासनसम्राजोऽपि हि पूर्णयौवनमये समये वर्तमाना आसन् । पञ्चत्रिंशद्वर्षवयस्येव ते आचार्यपदवीं प्राप्य उत्तरोत्तरं वर्धमानप्रभावा अभवन् । ननु एतादृशां नैष्ठिकब्रह्मचर्यादि-गुणगरिष्ठानां प्रभावप्रसरे को नाम विकल्पः ? तस्यां चतुर्मास्यां ते पूज्यापादाः सूत्राधिकारे श्रीप्रज्ञापनासूत्रं भावनाधिकारे च श्रीजम्बू-स्वामिचरित्रमधिकृत्य व्याख्यानं वाचयामासुः । सिंहगर्जनोद्घोषितं विषयवैविध्येन विशदवैदुष्येन च पूर्णपूर्णं तेषां प्रवचनमाकर्ण्य केषां मनसि न प्रादुर्भवेदहोभावः ? तदा अमृतलालोऽपि निजवयस्यैः सह नियतरूपेण व्याख्यानश्रवणं करोति स्म । यद्यपि प्रज्ञापनासूत्रस्य

गहनपदार्थानामवबोधे तस्य मतिरपरिपक्वाऽसमर्था चाऽऽसीत् तथाऽपि जम्बूस्वामिचरित्रव्याख्यानं तु स नित्यमव्यवहितमनसाऽशृणोत् । तत्राऽपि जम्बूस्वामिनः पूर्वभववर्णने व्यावर्णितं भवदेव-नागिलयोः शिवकुमारस्य च चरितमाकर्ण्य स भृशं चकितविरक्त-मानसो बभूव। एतच्चरित्रश्रवणत एव तस्य हृदि वैराग्याङ्कुराः प्रास्फुटन् ।

## व्यावहारिकाभ्यासः

पञ्चमकक्षां यावत् व्यावहारिकाभ्यासं कृत्वा तदनन्तरं स धार्मिकाभ्यास एव दत्तचित्तोऽभवत् । सर्वे स्वजनाः तस्य मनोऽन्यत्र वालनार्थं तं लक्ष्मीचन्द्रश्रेष्ठिनो वस्त्रहट्टे उपावेशयन् । स्वजनानामयं प्रयत्नस्त्वमृतलालस्येष्टं वैद्योपदिष्टमिव समजनि । यतः लक्ष्मीचन्द्र-सदृश-धर्मनिष्ठपुरुषस्याऽनायासेनैव सान्निध्यमवसादितं तेन । ततश्च प्रसङ्गे प्रसङ्गे तेन सह वार्तालापेन तद्व्यवहारदर्शनेन च तस्य धर्मनिष्ठायाः प्रामाणिकतायाः सत्यवादितायाश्च संस्काराः स्वजीवने समवतेरुः । हट्टोपवेशनसमये च क्वचित् कदाचिदवकाशवेलायां लक्ष्मीचन्द्रोऽमृतलालं शिक्षयितुं विविधविषयवार्तागुम्फितानि शिक्षा वचनानि कथयामास । तथा तस्याऽध्यात्मकल्पद्रुम-उपदेशमाला-दिग्रन्थानां पठनावसरोऽपि प्राप्तः । एतेन तस्य वैराग्यभावनायाः पुष्टिः समजायत ।

इतो मोहपरवशाः स्वजना अमृतलालं तदीय मित्रचतुष्कं च मोहपाशे नियोक्तुं भृशं प्रायतन्त । एतेऽपि पञ्च परस्परं रहसि सम्मील्य कस्य गृहे किं किं सञ्जातम् ? परिजनाश्च तं किं किं कथयन्ति शिक्षयन्ति ताडयन्ति वा ? स्वयं च स तान् किं किं प्रत्युत्तरितवान्-इत्यादिकं संभाष्य भाविकार्यक्रमं निश्चिन्वन्ति स्म । पञ्चसु च तेषु मित्रेषु अमृतलाल एव वयसा ज्येष्ठोऽतो सर्वेऽपि ते तन्मार्गदर्शनम-धिगत्यैव स्वं स्वं व्यूहं रचयामासुः । यद्यपि सर्वेषां मातापित्रादयः स्वजनाः श्रद्धालवो धर्मपरायणा व्याख्यानश्रवणरसिकाः गुरुभक्ति-

वैयावृत्त्यादिषु च समुल्लसितमानसा आसन्, तथा प्राप्तस्य मनुज जन्मनः फलं न हि प्रव्रज्याग्रहणाद् ऋतेऽन्यत् किमप्यस्तीति सर्वे ते दृढतया जानन्त्यपि स्म । तथाऽपि मोहस्य गतेर्वैचित्र्यात् स्वपुत्रस्य दीक्षाग्रहणवार्तामपि श्रोतुमशक्ताः ते, तदा का वार्ता तदनुमति-प्रदानस्य ? यथा यथा एते दृढवैराग्यवन्तोऽभवन् तथा तथा तेषां स्वजनास्तान् दृढमोहबन्धनैर्बद्धुं प्रयत्नान् कुर्वन्तो धर्मक्रियाकरणेऽपि अवरोधं कुर्वन्ति स्म । किन्तु एते तत्सर्वमकिञ्चित्करं मत्वा स्वनिर्धारितविचारणायां पुरः पुर एव प्रस्थिताः ।

## कर्पटवाणिज्यनगरे गुरुवराणां पार्श्वे गमनम्

तदानीं पूज्यपादगुरुवराः कर्पटवाणिज्यनगरे चतुर्मास्यर्थं विराजमाना आसन् । स संवत्सरः ग्रह-रस-निधि-विधु( १९६९ ) मित आसीत् । अमृतलालस्य मनसि गुरुवराणां दर्शन-करणार्थ-मतीव लालसा समुत्पन्ना । किन्तु तदा तस्य तत्र गमनं तु सुकरं नाऽऽसीदेव । इतो निर्गत्य तत्र संगमने मध्ये भूयांसो विघ्ना अनेकानेके च प्रतिबन्धका अभवन् । अस्य तु न तद्विषयकं किञ्चि-ज्ज्ञानमासीत् । अतः किं कर्तव्यम् ? केनाऽध्वना कथं च तत्र गन्तव्यम् ? इत्यादिकं सर्वमपि अज्ञातचरमेवाऽऽसीत् । तथाऽपि दृढ़मनोबलस्य उदारसत्वस्य च पुरुषस्याऽग्रे साधनशैथिल्यस्य किं सामर्थ्यम् ? यतः नीतिशास्त्रेणाऽपि महतां कार्यसिद्धौ सत्त्वस्यैव हेतुत्वं निर्धारितं न तु साधनानाम् । साधनानि तु सत्त्वावलम्बितान्येव ।

'येन केनाऽप्युपायेन मया तत्र गन्तव्यमेवे'ति कृतनिर्धारः स ततो गुप्तरीत्या निर्गत्य बहिर्गमनानुभववैकल्येऽपि स्वमतिचातुर्येण सर्वं सम्पाद्य गुरुवर्याणां चरणकमलयोः समुपस्थतोऽभवत् । पूज्य-गुरुवराणां नयनसुधाञ्जनकल्पेन पुण्यदर्शनेन वचोऽतिगामानन्दानुभूतिं सोऽन्वभवत् । पूज्यगुरुभिरपि वात्सल्यपूर्णदृष्टिपातेन मधुर-वचोभिश्च स भृशं सन्तोषितः । कतिपयदिवसैः भूयो भूयो विचार्य मनसा निर्धारितं कार्यं सुष्ठुरीत्या सम्पन्नम्-इति विचारयतोऽमृतलालस्य मनसि

मुहुर्मुहुः हर्षोद्गाराः समायान्ति स्म । नाऽमात् तस्य चित्ते आनन्दः ।

इतस्तस्य स्वजना गृहान्तर्बहिश्च तमलभमाना, 'नूनं स गुरुणां सविध एव गतो भवेद्' इति विमृश्य कर्पटवाणिज्यपुरं सम्प्राप्ताः । तान् सर्वान् दुष्ट्वाऽमृतलालेन चिन्तितं 'यत् सम्भावितं तदेव जातमिति नाऽत्र किमप्याश्चर्यकरमेतत् ।' तैः पृष्टम् - 'रे ! कथं कमप्यनापृच्छ्यैव सहसाऽत्राऽऽगतोऽसि ?' एतन्निशम्याऽमृतलालेनाऽपि विना क्षोभं प्रत्युत्तरं दत्तम् - 'गुरुभगवतां दर्शनोत्कण्ठयैवाऽत्राऽऽगतोऽस्मि ।' ते च तम्-'त्वादृशस्य विनीतस्यैवं करणं नोचितम् । यत्किमपि कार्यं त्वया कर्तव्यं भवेत् तदस्माकमनुमत्यैव करणीयं, नैवमेव' इति कथयित्वा तमादाय राजनगरमायाताः । ततो निःसृत्य तारङ्गातीर्थयात्रां कृत्वा गृहमुपेताः । गृहागमनानन्तरं स्वजनैरमृतलालस्य रक्षणाय विशेषरूपेण सज्जता विहिता ।

कतिचिद् दिवसानन्तरं जनकादिना किमपि विचार्य अमृतलालः भावनगरनगरे धार्मिकाध्यापकस्य निजज्येष्ठबान्धवस्य श्रीशामजी-इत्यस्य समीपे प्रेषितः । तत्र गमनमपि तस्य इष्टं वैद्योपदिष्टमिव सञ्जातम् । ज्येष्ठभ्राता हि तदा भावनगरे सुविश्रुत आसीत् । तन्नगरवास्तव्या भूयांसो बुद्धिशालिनस्तत्त्वजिज्ञासवश्च प्रतिदिनं तस्य पार्श्वे समागत्य धार्मिकाध्ययनं संस्कृताध्ययनं च कुर्वन्ति स्म । अमृतलालस्याऽपि तत्समीपे निवासो भूरितरलाभजनको जातः । अध्ययनं तु तत्र तेन विहितमेव किन्तु तत्समागमतः तस्योत्तमसंस्कारप्राप्तिः वैराग्यभावाभिवृद्धिरपि सम्यक्तया सञ्जाता । कतिपयदिनानन्तरं स पुनरपि बोटादनगरं समायातः ।

## अनुकूलसंयोगप्राप्तिः

नीतिशास्त्रेऽप्येवमुच्यते यद् 'यस्य भावि सुन्दरं वर्तते तस्य सहजतया सानुकूलाः संयोगाः सम्पद्यन्ते । अमृतलालस्याऽपि एवमेव जातम् । ग्रामानुग्रामं विहरन्त एकदा पूज्याचार्यप्रवरश्रीमद्विजय-

नीतिसूरीश्वरास्तत्र समाजग्मुः । तैरमृतलालस्य वृत्तान्तः कुतोऽपि विदित्वा वन्दनार्थं समागता श्रीहेमचन्ददेशाई-प्रभृतयः समाख्याताः- 'श्रूयते यद् भवतां तनयोऽमृतलालो भावनाशीलो वर्तते, यदि भवद्भ्यो रोचते तदा तमस्माभिः सह प्रेष्यताम् । अस्माकं सविधे शास्त्रिणो वर्तन्ते, ते च वः सूनुममृतलालमपि सुतरां पाठयिष्यन्ति' इति । तेऽपि गुरूणां वचः सरलतया स्वीकृत्याऽमृतलालं गुरुभिः सह प्रहितवन्तः ।

त्यागितपस्विगुरुभगवद्भिः सह विहारकरणस्याऽऽनन्दं तु योऽनुभवति स एव जानाति । गुरुभिः सह विहरन् अमृतलालो क्रमशो वलभीपुरं समाजगाम । तदा तन्नगरस्य 'वळा' इति सञ्ज्ञाऽऽसीत् । तत्र मासत्रयं स्थिरतां कृतवन्तः पूज्यगरुभगवन्तः । अमृतलालस्य तु तत्रत्या स्थिरता विशिष्टलाभदायिनी सञ्जाता । तद्ग्रामवास्तव्यः पण्डितश्रीभगवानदासस्तदा तत्रैव निवसन्नासीत् । तत्पार्श्वेऽमृतलालेन संस्कृतमार्गोपदेशिकाया अध्ययनं कृतम् । ततो विहृत्य गुरवो वीरमगामनगरं प्राप्ताः । चतुर्मास्यपि तत्रैव गमिता । तदा पण्डितश्रीप्रभुदासपार्श्वे मन्दिरान्तःप्रवेशिकाऽभ्यस्ताऽमृतलालेन ।

तत्रैकदा तस्य ज्वरबाधाऽभवत् । भूरितरौषधोपचारैरपि कथमपि निरामयतामलभमान स स्वास्थ्यलाभाय भोयणी-तीर्थमागतः । तत्रत्यशान्त-निर्दूषणवातावरणस्य प्रभावेन स सज्जो जातः । तदा योऽवकाशो लब्धस्तत्र स्वामिरामतीर्थ-विवेकानन्दादीनां साहित्यपठनेन स निजवैराग्यभावनां दाढ्र्यान्वितामकरोत् ।

ततः स मोरबीनगरे प्रयातः । तदा तत्र विराजमानानां श्रीमतां सन्मित्रश्रीकर्पूरविजयमहाराजानां समागमोऽभवत् । स तैः सार्धं कच्छदेशे माण्डवीग्रामं यावद् गत्वा पुनरपि मोरबीपुरमायातः । तत्सन्निधौ मासद्वयं यावत् निवासेन तेषां त्याग-वैराग्यपूर्णजीवनेन स स्वमनसि सुष्ठु प्रभावितः । तत्र निवाससमये यदा कदाचित् ग्रामबहिर्भागे गत्वा स श्मशानभूमावपि निर्भीकतया कायोत्सर्गादि कुर्वन्नासीत् ।

इतस्तस्य स्वजनाः कुतोऽपि सत्समाचारं लब्ध्वा धावं धावं मोरबीग्राममागतास्तमादाय च बोटादनगरं समागच्छन् ।

## नरोत्तमदासस्य हितशिक्षा पूज्यगुरुणां पार्श्वे प्रेषणं च

एकदोपाश्रये सामायिकस्थं तं किमप्यध्ययनं कुर्वन्तं दृष्ट्वा तत्पितृव्यपुत्रो नरोत्तमदासो हितबुद्धया तमकथयत्-"अरे भद्र ! किमर्थमितस्ततोऽटित्वा वृथा समयं निर्गमयसि ? यद्यभ्यासं चिकीस्तदा शासनसम्राजां पूज्यगुरुभगवतां पार्श्व एव गत्वा तत्र स्थिरीभूय स्वस्थतयाऽभ्यासं कुरु, इतस्ततो भ्रमणेन तु तवाऽमूल्यः समयो निष्फल एव व्ययीभविष्यति ।" तदीया हितशिक्षा तस्मै भृशमरोचत । नरोत्तमदासेन चाऽपि तज्जनकादीन् बोधयित्वा तस्य गुरुभगवतां पार्श्वेऽभ्यासार्थं गमनं निश्चायितम् ।

ततो निर्णीते शुभदिवसे सर्वेऽपि स्वजना सम्बन्धिनश्च सम्भूयाऽपूर्वानन्दोल्लासेन कुङ्कुमतिलककरण-श्रीफलार्पणादिपूर्वकं सम्मान्याऽमृतलालं प्रस्थापयामासुः । यद्यपि तेषां सर्वेषां हृदि अमृतलालस्तु स्वमनसि स्वकीयदीक्षार्थमेवेदं प्रस्थानमिति निश्चितवानासीत् । प्रयाणसमये स्वस्मिन् गाढस्नेहवती भगिनी चम्पा बाढं रोदनं कृतवती तेन च सर्वेऽपि गद्गदाः सञ्जाताः । ततो जनकादीनामाशीर्वादं गृहीत्वा नमस्कारमहामन्त्रस्मरणपूर्वकं गृहान्निःसृत्या-ऽग्निरथयानद्वारा पिण्डवाडानगरं प्राप्तः । तत उष्ट्रमारुह्य ब्राह्मणवाडातीर्थमागत्य चरमतीर्थपति-श्रीमहावीर-स्वामिनां दर्शन-पूजनदिकं कृतवान् । ततः सीरोहीनगरं गत्वा क्रमशो जावालनगरमासदत् । तत्रैव पूज्यगुरुभगवन्तो विराजमाना आसन् । अतः स शीघ्रमुपाश्रयं गत्वा शासनसम्राजां गुरुभगवतां दर्शन-वन्दनादिकं कृत्वा तादृशं वचनातिगमाह्लादं प्राप्तवान् येन क्षणमात्रादेव तस्याऽध्वखेदो व्यपनुनोद । तद्दर्शनं हि तस्य, बुभुक्षाक्षामकुक्षेः घृतपूरभोजनमिव, तीव्रपिपासाकुलितस्य शीतलमधुरजलपानमिव, मध्यन्दिनदिनकरखरकिरणसन्तप्तस्य

विशालवटवृक्षच्छायामिव सञ्जातम् । गुरुचरणारविन्दयोः प्रणामं कृत्वाऽऽशिषं च लब्ध्वा धन्यम्मन्यः सोऽतीवाऽमोदत ।

पूज्यगुरुभगवताऽपि च पीयूषवृष्ट्येव निजाप्रतिमप्रसादपूर्णदृष्ट्या स काममभिषिच्यत । ततो पृष्टवन्तो भगवन्तस्तं मधुरवचसा- "रे ! आगतस्त्वम् ? दीक्षार्थं सज्जीभूयाऽऽगतोऽसि न वा ?"

"आम् आम् भगवन्तः ! भवतां प्रसादेन पूर्णतया सज्जीभूतोऽस्मि । अतो भवद्भिः क्षणमात्रस्याऽपि विलम्बो नैव कर्तव्यः ।"

तस्यैतादृशोत्साहपूर्णवचनैर्गुरुवरा अन्येऽपि च सर्वे भृशं प्रीणिताः ।

ततो गुरुभिः पन्न्यासश्रीउदयविजयगणीनाहूयाऽमृतलालस्य दीक्षामुहूर्तं निरीक्षितुमाज्ञप्तम् । तैश्च पञ्चाङ्गमवलोक्य विज्ञप्तम्- "गुरुवराः ! एतदर्थं श्वो दिनमर्थात् ज्येष्ठकृष्णाषष्ठीतिथिरेवाऽत्यन्तं शुभतिथिर्वर्तते ।" एतन्निशम्याऽमृतलालस्य मनोमयूरः कामं नर्तितुमारब्धः । स चिन्तितवान् यद् - 'यन्मयेप्सितमासीत् तदतिशीघ्रतयैव सम्पत्स्यते ।'

ततो गुरुभिरपि जावालनगराग्रगण्याः समाहूता अमृतलालस्य दीक्षाग्रहणोदन्तश्च ज्ञापितस्तेभ्यः । एतच्छ्रुत्वा तेऽपि परमोत्साहं दधतो झटिति तन्निमित्तां सामग्रीं प्रगुणीकृतवन्तः ।

## पारमेश्वरीप्रव्रज्या

यदि कतिचनदिवसाः मध्येऽभविष्यन् तदा तु तन्निमित्तकं प्रभुभक्तिमहोत्सवं भूरिद्रव्यव्ययेनाऽपि तत्रत्याः श्रावका अकरिष्यन्, किन्तु मुहूर्तमुत्तममासीदतो पूज्यपादशासनसम्राड्गुरुभगवद्भिः सोत्साहं अमृतलालाय पारमेश्वरी प्रव्रज्या प्रदत्ता । तत्राऽपि तन्नामतो रागसूचकं लालशब्दमपहाय विरक्तचित्तोऽसौ सुविशुद्धसंयमाराधनेन मोहमहीपतिचमूं पराभूय विजयं प्राप्नुयादिति चिन्तयित्वा तन्नामाग्रे

'विजय' पदं नियोज्य, तथा भविष्यत्कालेऽयमवश्यमेवाऽमृतत्वं प्राप्स्यतीति तन्नाम्नि वर्तमानं 'अमृते' तिपदं यथावस्थितं रक्षित्वा तस्याऽन्वर्थमभिधानं 'अमृतविजय' इति विहितम् । प्रव्रज्याप्रदान-समये गुरूणां करकमलाभ्यां रजोहरणं सम्प्राप्य परं प्रीणितोऽसौ तथाऽनृत्यद् यथा तं दृष्ट्वा सर्वेऽपि विसिष्मियुः । क्षुधितस्येष्टभोजन-प्राप्तिवत् अमृतलालस्या-ऽपि हृदये संयमं प्राप्याऽऽनन्दमहासागरः समुच्छलितोऽभवत् ।

तदनन्तरं तु स निरंन्तरं संयमसाधनसावधानो गुरुसेवाकरण-तत्परो ज्ञानाभ्याससंलीनश्चाऽभूत् । एतत् सर्वं तस्य "मातुलगृहे भोजनं माता च परिवेषिका" इतिवत् ईप्सितमेव सञ्जातम् ।

## बोटादतः स्वजनानामागमनम्

अमृतलालेन दीक्षा गृहीताऽस्तीति समाचारः कियत्कालव्य-पगमानन्तरं बोटादवास्तव्यानां स्वजनानां श्रुतिगोचरोऽभवत् । तदा तु वर्तमानकालवत् समाचारप्रेषणव्यवस्था नाऽऽसीत् । हेमचन्द्रदेशाई प्रभृतयः कुटुम्बिनः सर्वे 'संसारेऽस्मिन् नाऽस्ति कश्चित् सारः, सारस्तु केवलं संयमग्रहण एव' इति जानन्तोऽपि मोहपरवशा अमृत-लालस्य संयमस्वीकारवार्ता निशम्य क्षुब्धा अभवन् । सर्वे च सम्मिल्य शीघ्रतरमेव जावालग्रामे सूरीश्वराणां सन्निधौ समागताः । यदा ते सर्वे उपाश्रये समागतास्तदा सूरीश्वराः स्वशिष्यसमुदायाय श्रीप्रज्ञापनासूत्रस्य वाचनां दातुं प्रवृत्ता आसन् । अतः कञ्चित्कालं सर्वेऽपि तत्रैव तूष्णीं भूत्वा उपविष्टाः । मुनिसमुदायमध्ये उपविष्टं श्रमणवेषे शोभायमानं च नूतनमुनीभूतं स्वपुत्रं दृष्ट्वा सर्वेऽपि परमां प्रीतिं प्रापुः । वाचनानन्तरं पूज्यगुरुभगवद्भिः तान् प्रति कथितं-"भो भो महानुभावाः ! यूयं महाभाग्यशालिनः स्थ, यद् युष्मत्कुटुम्ब-मध्यादयमेकः संसारान्निःसृत्य संयमं स्वीकृतवान् । बहोः काला-देवाऽस्य हृदि संयमस्वीकारस्य विचारस्तु आसीदेव, किन्तु तादृशयोगाभावात् स सफलो न भूतः । अधुना तु परमपुण्योदय-

प्रबलपुरुषार्थयोः संयोगेन स सफलीभूतोऽस्ति । येषां कुटुम्बमध्यात् पुत्राः पुत्र्यश्च दीक्षां गृह्णन्ति तेषां प्रशंसां स्वर्गलोके देवा देवेन्द्राश्च सदैव कुर्वन्ति । अतो मा यूयं खिन्ना भूत" इति ।

गुरुभगवतामीदृशैर्वचनैः परं प्रीणिताः सर्वे भूयो भूयो गुरु-चरणयोः प्रणामान् विदधुस्तेषां महोपकारं च मेनिरे ।

ततो सर्वेऽपि नूतनमुनिं सबहुमानमकथयन् - "अयि भ्रातः ! दीक्षा तु त्वया महता पराक्रमेण गृहीतैव । अथ सिंहवत् तत्पालनमपि विधेयम् । अत्र मनागपि प्रमादो नैव कर्तव्यः, अतिचारवर्जनपूर्वकं संयमपालने ज्ञानाध्ययने च प्रयतितव्यम् । अस्माकं कुलं च द्योतितव्यम् । एतादृशा गुरुभगवन्तः महापुण्योदयं विना नैव कदाचिदपि लभ्यन्ते" इति ।

## शास्त्राभ्यासः संयमाराधना च

ज्ञानं हि दीपकवदुद्योतकम् । तेनैव जीवनपंथाः प्रकाशितो भवति । तदेव च मूलं सर्वेषां विवेक-वैराग्यादिगुणानाम् । ज्ञानेनैव भवभ्रमणहेतुभूता विषयकषायाद्यान्तरशत्रवः परास्ता भवन्ति । ज्ञानस्य सर्वातिशायिमाहात्म्यप्रदर्शनाय महोपाध्यायश्रीयशोविजय-वाचकैः कथितमपि ज्ञानसारे-

पीयूषमसमुद्रोत्थं रसायनमनौषधम् ।<br>
अनन्यापेक्षमैश्वर्यं ज्ञानमाहुर्मनीषिणः ॥ (५/८)

आत्मनो येऽनन्ता गुणाः सन्ति तेषु ज्ञानदर्शयोर्मुख्यता, तयोर्द्वयोर्मध्येऽपि च ज्ञानस्यैव मुख्यत्वम् । यतो दर्शनस्य सम्प्राप्तिरपि प्रायो ज्ञानेनैव भवति । ज्ञानमेव हि अप्राप्तदर्शनचारित्रादिगुणानां प्रापणे प्राप्तानां च तेषां रक्षणे प्रबलो हेतुः । अतस्तदुपार्जने सर्वथा यतितव्यमेव । इति मनसि निधाय शासनसम्राजो गुरुभगवन्तः सर्वदा स्वशिष्यान् ज्ञानाभ्यासार्थं प्रेरयन्ति स्म । स्वयमपि च शिष्याणामध्यापने भृशं प्रयतन्ते स्म ।

वयं ह्येतत् समीचीनतया जानीमो यद् गुरूणां कृपादृष्ट्यैव विशदावदाता बुद्धिर्निर्मलं ज्ञानं च लभ्यते । ये च गुरुभगवत्सु समर्पितहृदया तेषु गुरुकृपामृतधारा विनाऽऽयासेनैव वर्षति । ततश्च ज्ञानाभ्यासोऽपि तेषां निर्विघ्नतया वर्धते । एतत् सर्वं स्वीयनिर्मल-बुद्ध्या स्वयमेव जानानेन नूतनमुनिश्रीअमृतविजयेन तीव्रक्षयोपशम-प्रबलपुरुषार्थयोर्बलेन गुरुकृपामृतपानेन च स्तोकेनैव कालेन ज्ञानाभ्यासे शोभना प्रगतिः कृता । प्रारम्भे आवश्यकसूत्राणां ततश्च संस्कृतव्याकरणादिशास्त्राणां चाऽध्ययनं कृतम् । मरुधरदेशीय-विशुद्धजल-वायुप्रभावेण तस्य स्वास्थ्यमपि समीचीनं सञ्जातं, यच्च दीक्षाग्रहणपूर्वं किञ्चित् प्रतिकूलमासीत् ।

चतुर्मास्यनन्तरं कार्तिकृष्णद्वितीयादिने मुनिश्रीअमृतविजय-स्योपस्थापना विहिता । तदवसरे बोटादतः समागता देशाई-लक्ष्मीचन्द्र हेमचन्द्र-नरोत्तमदासप्रमुखाः सर्वेऽपि स्वजनाः स्वीय-मुनिवरस्य संयमस्थैर्याभ्यासलीनता-चित्तप्रसादादिकं च निरीक्ष्या-ऽतिवेलमानन्दमधिजग्मुः ।

ततो गुरुभगवन्तो विहृत्य सादडीग्रामं प्राप्ताः । तत्र मुनिश्री-नन्दनविजयस्याऽपि आगमनं सञ्जातम् (यः पूर्वं अमृतलालस्य मित्रं नरोत्तम आसीत्) । बहोरनेहसः पश्चात् स्वस्य प्राक्तनस्य प्रगाढमित्रस्य मिलनेन द्वयोरपि परमो हर्षोऽभूत् । सरसं स्वस्वदीक्षा-दिव्यतिकरं वर्णयतोस्तयोर्द्वयोः कियान् कालो व्यतीतस्तदपि न ज्ञातम् । तौ द्वावपि परस्परस्य नैपुण्यं धैर्यं कार्यसाफल्यं च प्रशशंसतुः । नूनं द्वयोः समवयस्कवयस्ययोर्मित्रयोः कीदृक् सारूप्यम् ! द्वावपि गुप्तरीत्या गृहान्निर्गत्य मनोदाढ्र्येण प्रबलपुरुषार्थं स्फोरयित्वा संयमं स्वीचक्रतुः ।

## स्वमित्र-लवजी-इत्यस्य दीक्षा

शासनसम्राजां विक्रमीयरस-दर्शन-ग्रह-शशाङ्क-(१९६६) मितसंवत्सरे बोटादग्रामे चतुर्मास्यां ये पञ्च सुहृदः प्रतिबुद्धाः

संयमग्रहणे च बद्धपरिकराः दृढप्रतिज्ञावन्तश्च समभूवन्, तेषु त्रयाणां दीक्षा सञ्जाता किन्तु चतुर्थो लवजी-इति अवशिष्ट आसीत् । स यथाकथमपि गृहात् पलाय्य सादडीग्रामे गुरुचरणयोः समुपस्थितः । मधुरवचसा गुरुभिराभाषितः स परमां प्रसत्तिं प्राप । ततस्तेनाऽवनत-शिरसा योजितकरकुड्मलद्वयेन च विज्ञप्ता गुरुभगवन्तः - "हे कृपालवो गुरुवर्याः ! मयि कृपां कृत्वा प्रयच्छतुतरां मे पारमेश्वरीं प्रव्रज्याम् । विद्यते तत्कृते मम मनसि दृढो निर्धारः । अथ चाऽस्मिन् कार्ये कृतो मनागपि विलम्बो मामसह्यः प्रतिभाति । भवन्तस्तु जानन्त्येव यन्मम गृहान्निर्गमनमत्राऽऽगमनं च नैव सुकरम् । भूयसा परिश्रमेण कथं कथमपीह भगवत्पादयोः समुपस्थितोऽस्मि । अतः प्रयच्छतु शीघ्रं मे दीक्षाम् । मा किमप्यधुना विचारयन्तु भवन्तः । सर्वं शोभनमेव भविष्यति ।"

प्रबलवैराग्यवन्तं दृढमनोबलयुतं च तं दृष्ट्वा गुरुवर्यैः रहस्येव तस्मै दीक्षा प्रदत्ता, तन्नाम च 'मुनिलावण्यविजयः' इति स्थापितम् । एतत् सर्वं तथा गुप्ततया विहितं यथा प्रत्यहमुपाश्रयमागच्छता-मप्येतद्वृत्तं नैव ज्ञातम् । एतस्मिन् गुप्तावासे तस्य नूतनमुनेः सर्वमपि कार्यजातं मुनिअमृतविजयेन विना कयाचित् प्रत्युपकारापेक्षया सम्पादितम् । अतो मुनिलावण्यविजयस्य हृदि अमृतविजयं प्रति भूयान् सद्भावो प्रकटितः ।

'गुरूणां प्रसादः सर्वासां सिद्धीनां मूलमादिम्' इति सर्वेषां सहृदयहृदयानां विदितचरमेव । तस्य च गुरुप्रसादस्य मूलं विनय एव । अयं विनयो मुनिश्रीअमृतविजयेन निजजीवने तथाऽनन्यभावेन परिणामितो यथा स गुरुभगवतां सर्वेषां चाऽन्येषां मुनिवराणां परम-स्नेहास्पदमभूत् ।

## योगोद्वहनं ग्रन्थरचना च

अथ सादडीग्रामस्य चतुर्मासीस्थिरतायां त्रीणि कार्याणि तस्य सुचारुतया सञ्जातानि । अभ्यासो योगोद्वहनं ग्रन्थरचना च । ततः

शासनसम्राड्गुरुभगवद्भिर्विरचितस्याऽष्टसहस्रश्लोकप्रमाणस्य बृहद् हेमप्रभाव्याकरणस्याऽध्ययनं पण्डितवर्यश्रीशशिनाथ-झा-इत्यभिध-शास्त्रिणः सविधे प्रारब्धम् । प्रतिरात्रं च स मुनिनन्दनविजय-गुणविजय-लावण्यविजयैः सह नियतरूपेण शब्दतोऽर्थतश्च पठित-ग्रन्थानां स्वाध्यायमावृत्तिं चाऽपि करोति स्म ।

तथा गुरूणां पार्श्वे सतीर्थ्यमुनिवरैः सह श्रीउत्तराध्ययनसूत्रस्य श्रीआचाराङ्गसूत्रस्य च योगोद्वहनमपि कृतवान् सः ।

दीक्षाग्रहणात् पूर्वं कियन्तं कालं यद् भावनगरे ज्येष्ठभ्रातुः शामजी-इत्यस्य गृहे तेन निवासः कृतस्तदा तस्य कवित्वस्य परिचयेनाऽस्याऽपि मनसि काव्यरचनारुचिः प्रादुर्भूता आसीत् । ततस्तेन स्वल्पः प्रयत्नोऽपि अस्यां दिशि कृत आसीत् । सा रुचिरस्यां चातुर्मास्यां विशेषरूपेणाऽङ्कुरिता पल्लविता च । अतो मुनिअमृत-विजयेन आबाल-वृद्धरुचितानां प्रभुसम्मुखं गीयमानानां चतु-र्विंशतिजिनस्तुतीनां रचना तदा कृता । संस्कृतभाषायामन्यान्यपि श्लोक-स्तुति-स्तवनादीनि विरचितानि । तानि दृष्ट्वा गुरुभगवद्भि-रन्यैश्च मुनिवर्यैर्बाढं प्रशंसितानि हर्षोत्फुल्लितमानसैश्च कथितम्- "अहो ! अमृतविजयेनैतावता स्तोककालेनैव सर्वेषां विस्मयकरीयं काव्यरचना कृता । एता रचनाः प्रासादिकता-प्रयोगशुद्धि-रचना-सौष्ठवादिभिर्गुणैः प्राक्तनकवीनामिव दरीदृश्यन्ते ।"

चातुर्मास्यनन्तरं जेसलमेरतीर्थयात्रा षड्-री-पालकसङ्घेन सह पूज्यगुरुभगवतां निश्रायां विहिता । तदनु फलवृद्धिनगरे चातुर्मासी स्थिरता कृता । तत्र च बृहद्हेमप्रभाव्याकरणाभ्यासः समाप्तः । यतो निर्धारितकाले स पूर्णो नाऽभवदतो नियमपालनाय तेन मासद्वयं यावद् घृतत्यागो विहितः । पूर्णे चाऽभ्यासे ततो नियमात् स विमुक्तः । अहो ! नियमपालनदार्ढ्यम् । ततो विहृत्य बिकानेर-नागोर-बिलाड़ा-कापरडातीर्थादिक्षेत्रेषु स्पर्शनां विधाय वेदर्षि-ग्रहचन्द्र( १९७४ )मिते वैक्रमीये संवत्सरे पालीनगरे चतुर्मासी

विहिता। अस्यां चतुर्मास्यां तस्य न्यायदर्शनस्या-ऽध्ययनं सञ्जातम् ।

## न्यायदर्शनाध्ययनम्

न्यायदर्शनस्याऽध्ययनार्थं मतितैक्ष्ण्यमपेक्षितम् । न हि तद्विना तत्र प्रवेशोऽपि भवितुमर्हति । नव्यन्यायस्तु इतोऽपि कठिनतरः । बहवोऽभ्यासिनस्तदध्ययनं प्रारभ्य स्तोके नैव कालेन तस्य दुरवगाहित्वं विलोक्य तस्माद् विरता भवन्ति । मुनिअमृतविजये बुद्धितैक्ष्ण्यमनवरतप्रयासो गुरुप्रसादश्चेति त्रयाणां गुणानां विरलः सङ्गम आसीत् । तेन स स्वल्पैरेव प्रयासैर्गहनग्रन्थानामप्यभ्यासाय सिद्धोऽभवत् ।

पालीनगरे स मुनिलावण्यविजयेन सह शास्त्रिणां पार्श्वे न्याय-सिद्धान्तमुक्तावल्या अभ्यासमकरोत् । तदा प्रतिदिनं स पञ्चाशच्छ्-लोकमितं पाठं शास्त्रिणे श्रावयामास । ततो बाणर्षितत्त्व-मृगाङ्क (१९७५)मिते वर्षे राजनगरे चतुर्मासीस्थिरतायां तेन गुरुभगवतां सविधे किरातार्जुनीयमहाकाव्यमधीतं शास्त्रिसमीपे च सिद्धान्त-मुक्तावल्या दिनकरी-रामरुद्रीटीकेऽभ्यस्ते । तदनन्तरं रसर्षि-ग्रह-चन्द्र (१९७६)मिते वर्षे उदयपुरे चतुर्मासी विहिता । तत्र स व्याप्तिपञ्चक सिद्धान्तलक्षण-व्युत्पत्तिवादाभिधानानां ग्रन्थानामध्ययनमकरोत् । तत्राऽपिव्याप्तिपञ्चकं तु अष्टसु दिनेष्वेवाऽधीतं, तच्च सर्वेषां विस्मयकारकं सञ्जातम् । ततो मङ्गलर्षिग्रहेन्दु(१९७८)मिते वर्षेऽ-भूच्चातुर्मास्यं स्तम्भनपुरे(खंभातनगरे) । तत्र स न्यायविशारद-तार्किकशिरोमणि-पूज्योपाध्यायश्रीयशोविजयवाचकैर्विरचितं न्याय खण्डनखण्डखाद्याख्यं ग्रन्थं श्रीमदुदयनाचार्यविरचितं न्यायकुसुमा-ञ्जलिग्रन्थं च समभ्यस्तवान् ।

## योगोद्वहनं पदप्राप्तिश्च

संयमजीवने आगमसूत्राणां पठनार्थं प्रथमं योगेनाऽऽराधनम-वश्यकर्तव्यतया प्रतिष्ठापितमस्ति पूर्वाचार्यैः । अतः प्रायः सर्वेऽपि

मुनयो योगोद्वहनं कुर्वन्त्येव । मुनिश्रीअमृतविजयेनाऽपि संयम-जीवनस्य द्वितीयस्मिन् वर्ष एव श्रीउत्तराध्ययनसूत्रस्य श्रीआचाराङ्ग-सूत्रस्य च योगोद्वहनं गुरूणां प्रसादतो विहितम् । ततो मुन्यर्षि-तत्त्व-शशाङ्क( १९७७ )मिते वर्षे श्रीकल्पसूत्र-श्रीमहानिशीथसूत्रयो-र्योगाराधनं कृतम् । ततो यथानुकूलं श्रीसूत्रकृताङ्गसूत्र-श्रीस्थानाङ्ग-सूत्रश्रीसमवायाङ्गसूत्रादीनां योगाराधनं कृतम् ।

अथबाण-मङ्गल-नन्द-विधु( १९८५ )मिते वर्षे श्रीमद्गुरु-भगवद्भिस्तस्य योग्यतां ज्ञात्वा कृपां विधाय श्रीकदम्बगिरितीर्थे पञ्चमाङ्गश्रीभगवतीसूत्रस्य योगोद्वहनाय समहः प्रवेशः कारितः । अयं हि योगो दीर्घकालिक आगाढोऽत्यन्तं महत्त्वयुतश्च वर्तते । अस्माद् योगात् सुमहति कारणे उपस्थितेऽपि जीवितव्ययेनाऽपि न कदाचिन्निष्क्रान्तव्यम् । तस्मिन् पूर्णीभूत एव ततो निक्षेपः कार्यते । इतो यद्यपि मुनिअमृतविजयस्य स्वास्थ्यं तादृशं समीचीनं नाऽऽसीत् तथाऽपि परमकरुणावतां श्रीदेव-गुरूणां कृपया स्वीयचित्तोत्साहेन च विशेषबाधां विनैव योगाराधनं सानन्दं सम्पन्नम् । ततश्च गुरुभगवद्भिः तस्मिन्नेव वर्षे आषाढशुक्लचतुर्थ्यां मधुमती-नगरे तस्मै श्रीभगवतीसूत्रानुज्ञापूर्वं गणिपदप्रदानं विहितम् । तत आषाढ-शुक्लस्यैवाष्टमीतिथौ तस्मै पन्न्यासपदमपि प्रदत्तम् ।

ख-नन्द-नन्देन्दु( १९९० )मिते वर्षे गुरुभगवद्भिर्जावालनगरे चातुर्मासीस्थिरता कृता । तदा पन्न्यासश्रीअमृतविजयेनाऽवशिष्टा-नामागमसूत्राणां योगोद्वहनं कृत्वा पञ्चचत्वारिंशदागमसूत्राणां योगाराधनं पूर्णीकृतम् ।

ततो अन्यत्र विहृत्य षड्वर्षानन्तरं चन्द्र-ग्रह-नन्देन्दु( १९९१ ) मिते वर्षे श्रीमद्गुरुभगवन्तः पुनरपि मधुमतीनगरं समाजग्मुः । तदा तत्रैव उपाध्यायश्रीविज्ञानविजयगणये आचार्यपदप्रदानं पन्न्यास-श्रीअमृतविजयगणि-पन्न्यासश्रीलावण्यविजयगणिभ्यां चोपाध्याय-

पदप्रदानं कृतम् । तदवसरे मधुमतीनगरस्थजैनसङ्घेन भूरिद्रव्यव्ययपूर्वं महामहोत्सवोऽपि विहितः ।

उपाध्यायपदप्राप्त्यनन्तरमाचार्यपदप्राप्त्यवसरस्तु स्तोकेनैव कालेन समुपस्थितोऽभवत् । वैक्रमीये नयन-ग्रह-ग्रहार्यम( १९९२ ) मिते संवत्सरे पूज्यगुरुभगवन्तो राजनगरे विराजमाना आसन् । उपाध्यायश्रीअमृतविजयगणिस्त्वन्यत्र विहरन्नासीत् । तदा गुरु-भगवतां हृदि तस्मै आचार्यपदप्रदानस्याऽभिलाषो जातः । अतो भक्तश्रावकान् प्रेषयित्वा "तुभ्यं सूरिपदं दातुकामोऽस्मि, झटिति राजनगरमागच्छ" इति सन्देशः प्रहितः । तं श्रुत्वा सोऽपि "यथा गुरुवर्याणामाज्ञा, आज्ञा गुरूणामविचारणीया" इति प्रत्युत्तरं दत्त्वा शीघ्रमेव विहारं कृत्वा राजनगरमागच्छत् । राजनगरे तु सूरिपद-प्रदानार्थं सर्वमपि सामग्रीजातं सज्जीभूतमेवाऽऽसीत् । ततो भव्यजिनेन्द्रभक्तिमहोत्सवपूर्वकं वैशाखशुक्लचतुर्थीदिने शुभे मुहूर्ते पूज्यगुरुभगवद्भिः स्वकरकुड्मलाभ्यामेव श्रीजेशिंगभाई-श्रेष्ठिनो विशाले वाटिकापरिसरे उपाध्यायश्रीपद्मविजयगणि-पाठक-श्रीलावण्यविजयगणिभ्यां सह तस्मै अपि आचार्यपदं प्रदत्तम् । तत्राऽवसरे आचार्यश्रीविजयपद्मसूरये शास्त्रविशारद-कविदिवाकर-इति-बिरुदद्वयं, आचार्यश्रीविजयामृतसूरये शास्त्रविशारद-कविरत्न-इति-बिरुदद्वयं तथा आचार्यश्रीविजयलावण्यसूरये शास्त्रविशारद-कविरत्न-व्याकरणवाचस्पति-इति-बिरुदत्रयं चाऽपि प्रदत्तम् । ततश्च उपाध्यायश्रीअमृतविजयगणिः शास्त्रविशारद-कविरत्न-आचार्य-श्रीमद्विजयामृतसूरीत्याह्वया जगति प्रसिद्धोऽभवत् ।

किञ्च पद्मरागमणीनामाकरे पद्मरागस्यैवोत्पत्तिरिव शासन-सम्राजां श्रीमद्गुरुभगवतां शिष्यसमुदाये सर्वेऽपि प्रवरगुणगणा-लङ्कृताः श्रमणा अभवन् । गुरुवर्यैः स्वयमेव निजकरकमलाभ्यां-येभ्यः सूरिपदं प्रदत्तं तेषु सप्तसु कश्चिन्नैयायिकः, कश्चित् सिद्धान्त विशारदः, कश्चित्तु न्याय-व्याकरण-साहित्येषु निष्णातः, कश्चिच्च

वैयाकरणः, कश्चित् काव्यरचनायांग्रन्थसर्जने वृत्तिरचने च निष्णातः तथा कश्चित् प्रवचनकरणे चाऽपि सुतरां वैदग्ध्यं दधन्नासीत् ।

## निजपितुर्भागवती दीक्षा

पूज्यवाचकवरश्रीउमास्वातिभिः स्वरचिते प्रशमरतिप्रकरणे "दुष्प्रतिकारौ मातापितरौ" इति कथनेन मातापित्रोरुपकारस्य प्रत्युपकारो दुःखेन कर्तुं शक्य इति प्रतिपादितमस्ति । तथा श्रीस्थानाङ्गसूत्रेऽपि प्रतिपादितं यद् 'लौकिकरीत्या स्नान-भोजनालङ्कार-तीर्थयात्रादि-नानाविधोपचारैर्यावज्जीवं पर्युपासना-परोऽपि पुत्रो पित्रोरुपकारस्याऽनृणी नैव भवति । किन्तु यदा तौ धर्माभिमुखीकरणेन संयमाद्याराधनायां पूर्णतया सहयोगी भवति तदैव यत्किञ्चिद् रूपेण तयोरुपकारस्य प्रतिकारः कृतो भवति ।

श्रीअमृतसूरीणां संसारिपिता श्रीहेमचन्द्रश्रेष्ठी वयोवृद्धः सञ्जात आसीत् । यद्यपि वयोवृद्धत्वं संयमादानाय प्रतिकूलं तथाऽपि तन्मनस्येको दृढनिर्धार आसीद् यद् 'परलोकाय प्रयाणं तु मुनिवेष-ग्रहणं विना नैव कर्तव्यम् ।' अतो गुरुभगवद्भिस्तस्मै दीक्षां दत्त्वा आचार्यश्रीविजयोदयसूरीणां शिष्यत्वेन च स्थापयित्वा तन्नाम मुनिश्रीहर्षविजयः इति प्रस्थापितम् । दीक्षाप्राप्त्या स अतीव हृष्टोऽभवत् । इतो विजयामृतसूरयोऽपि तदीयसेवा-शुश्रूषादिषु तत्परा आसन् । अतस्तस्य हृदि अपारः सन्तोषोऽभवत् ।

अथ सोऽपि मुनिः स्वभावनम्रता-परमसारल्य-परोपकार-परायणतादिगुणौधेन सर्वेषां प्रीतिपात्रमभूत् । ततः पञ्चवर्षान् यावत् दीक्षां चारुरीत्या परिपाल्य जावालग्रामे सपरिवाराणां गुरुभगवतां पुण्यनिश्रायां नमस्कारमहामन्त्रश्रवणपूर्वकं समाधिभावेन कालधर्मं प्राप ।

## प्रवरो गुणानुरागः अपूर्वः उपदेशप्रभावश्च

आचार्यश्रीविजयामृतसूरयो अतीव उदारा सरला गुणानुरागि-

णश्चाऽऽसन् । यदा कदाऽपि यस्य कस्याऽपि स्वल्पोऽपि गुणो दृष्टि-विषयः श्रुतिविषयो वा भवेत् तदा ते मुक्तकार्पण्यमौदार्यं विधाय तं सर्वदा प्रशंसयामासुः । स स्वसमुदायस्य परसमुदायस्य वा भवेत्, अरे ! परगच्छीयो वा परधर्मीयो वाऽपि भवेत्, तथाऽपि स यदि गुणी तदा तत्सत्कान् तत्तद्गुणान् आश्रित्य तं ते काममनुमोदयामासुः । कश्चिद् प्रज्ञावन्तमध्ययनरुचिं च बालश्रमणं यदि ते पश्यन्ति स्म तदा तस्योपरि पूर्णां कृपावृष्टिं वर्षयामासुः । अनेन प्रमोदभावाकर्षणेनैव नैकशः स्वीयपरकीया आचार्यदिसाधवस्तेषामुपरि परमां प्रीतिं दधानास्तेषां स्वीयमानिनस्तान् वन्दनार्थं मिलनार्थं तैः सह तत्त्वचर्चा-दिकरणार्थं च विना सङ्कोचं समागच्छन्ति स्म । धन्यम्मन्याश्च भवन्ति स्म ।

एवंविधास्ते गूर्जर-सौराष्ट्र-मरुधर-मुम्बापुरी-खानदेशप्रभृति क्षेत्रेषु बहुशो विहृत्य धर्मोपदेशदानेन तत्रत्यान् सङ्घान् प्रतिबोध्य चाऽनेकानेकानि धर्मकार्याणि कारयामासुः । यथा मुम्बापुर्युपनगर-बोरीवली( पूर्व )स्थ-दोलतनगरमध्ये सम्प्रति यानि कानिचिज्जिन-मन्दिरज्ञानमन्दिरोपाश्रयप्रभृतीनि धर्मस्थानानि विद्यन्ते तानि सर्वाण्यपि श्रीमत्सूरीश्वराणां पवित्रप्रेरणयैव सञ्जातानि । तेषां परमप्रभावेणाऽधिष्ठितं तत्रत्यं जिनमन्दिरमद्याऽपि अपूर्वप्रभावशालि सर्वैरनुभूयते । ततः पादलिप्तपुरे तीर्थाधिराजश्रीशत्रुञ्जयगिरराजस्य तलहट्टिकायां पूज्यसूरीश्वराणां मार्गदर्शनेन प्रेरणया च चतुर्भूमिक-श्रीकेसरियाआदिनाथजिनमहाप्रासादपरिमण्डितं श्रीकेसरियाजी-नगरं नामैकं धर्माराधनसङ्कुलं प्रतिष्ठापितं यदद्याऽपि पादलिप्तपुरे प्रधानाराधनाधामतया विराजते ।

## विशिष्टः शिष्यपरिवारः

संसारं परित्यज्य स्वपार्श्वे आगता जीवा सर्वदा ज्ञान-दर्शन-चारित्र-तपस्सु सततमुद्यता भवेयुः, तथा ते सर्वेऽपि शास्त्राध्ययन-ग्रन्थलेखन-साहित्यसर्जनादिष्वेव निजजीवनं यापयित्वा शासन-प्रभावनादिकार्याणि च निरलसतया विधाय स्वजीवनमुद्योतितं

कुर्युरित्येषा भावना तेषां हृदि सर्वदा वहति स्म । अतस्ते सर्वानपि निजशिष्यानेतदर्थं सर्वदा प्रेरयामासुः । अनेन तेषां विशालसङ्ख्यकः शिष्यपरिवारः संयमतपोनिष्ठो निर्दूष्यवैदुष्यविभूषितो विशिष्टतमग्रन्थ रचनाकौशलकलितः प्रवचनप्रभावनानिरतः प्रविरलगुणगरिष्ठो वर्तमानकालीनजैनसङ्घाय च स्पृहणीयः सम्माननीयश्चाऽस्ति । एतेषु आचार्यश्रीविजयरामसूरि-श्रीविजयदेवसूरि-श्रीविजयधर्मधुरन्धर-सूरिप्रमुखाः सूरिवरा अन्येऽपि मुनिवराश्च जिनशासननभोङ्गणे शुक्र-तारकायमाना आसन् सन्ति च । तत्राऽपि तेषां श्रीमतां पूर्णकृपा-भाजनत्वं आचार्यश्रीविजयधर्मधुरन्धरसूरिरदधत् । पूज्यगुरुवर्यै-र्मुम्बापुर्यां महामहोत्सवपूर्वं तस्मै प्रदत्तस्याऽऽचार्यपदस्याऽवसरो-ऽद्याऽपि न विस्मिर्यतेऽस्माभिः ।

## ग्रन्थरचनाकौशलम्

सरससाहित्यसर्जनस्योत्तमग्रन्थरचनायाश्च शक्तिस्तु तेषां निसर्गत एवाऽऽसीत् । निजाग्रज-शामजी-इत्यस्य कवित्वस्य परिचयेन प्रभावेण तथा श्रीमद्गुरुभगवतां च कृपया सा क्रमशो विकसिता पुष्पिता फलिता च नैकग्रन्थरूपैः । तत्र काव्यसाहित्ये गूर्जरभाषायां प्रसादगुणकलितानि मनोहराणि च स्तुतिचतुर्विंशतिका वैराग्यशतकात्मनिन्दाद्वात्रिंशिका-दृष्टान्तावलि-चतुर्विंशतिजिन-स्तवनानि श्रीशत्रुञ्जयादितीर्थस्तवनानि संस्कृतभाषायां च चैत्य-वन्दनानि कतिचित् स्तवनानि च रचितानि सन्ति ।

वृत्तिरचनायां तु सप्तसन्धानमहाकाव्योपरि सरणिवृत्तिः, नैषधीयपादपूर्तिरूपस्य श्रीशान्तिनाथमहाकाव्यस्य विद्वद्विनोदिनी-वृत्तिः, श्रीहारिभद्रीयसर्वज्ञसिद्धिग्रन्थस्य सर्वहितावृत्तिः, शास्त्र-वार्तासमुच्चयस्य स्याद्वादकल्पलताटीकोपरि कल्पलतावतारिका-वृत्तिः इत्येता वृत्तयस्तैर्विरचिताः प्रकाशिताश्च सन्ति ।

गूर्जरभाषायामपि पर्युषणाष्टाह्निकाव्याख्यानं, कल्पसूत्रस्य

खीमशाहीभाषान्तरं, प्रतिष्ठा-शान्तिस्नात्रादिविधिसमुच्चयः उन्नति-दर्शनम्-इत्यादयो ग्रन्थास्तैः सम्पादिताः सन्ति ।

## श्रीसिद्धगिरिराजच्छायायां स्थिरवासः

पूज्यश्रीसूरीश्वराः स्वजीवनस्य सन्ध्याकाले प्रायः सप्ताष्टौ चतुर्मासीः पादलिप्तपुर एव यापितवन्तः । ते सपरिवारा नयन-नेत्राकाश-नयन( २०२२ )मिते वैक्रमे वर्षे सूर्यपुरे( सूरतनगरे ) चातुर्मास्यं विधाय ततः श्रीझगडीयातीर्थ-षड्-री-पालकसङ्घेन सह विहारं कृत्वा पादलिप्तपुरं समाजग्मुः । तत आरभ्यस्ते प्रायस्तत्रैव स्थिरतां कृतवन्तः । तत्रत्ये स्थिरताकाले प्रतिष्ठाञ्जन-शलाका-दीक्षा-बृहद्दीक्षा-पदप्रदान-तीर्थमालादीनि प्रभूतानि सुकार्याणि तेषां पवित्र-निश्रायां सञ्जातानि ।

पूर्वं वर्षत्रयं ते श्रीशत्रुञ्जयविहारे स्थितवन्तस्ततश्च श्रीकेसरि-याजीमहाप्रासादसमीपवर्तिन्यां श्रीअमृतपुण्योदयज्ञानशालायां समागताः । तत्पट्टधराचार्यश्रीमद्विजयधुरन्धरसूरीश्वरा अपि तैः सार्धं तत्रैव समातिष्ठन् । अन्तराले एका चतुर्मासी भावनगरे यापिता ।

रसाक्षि-गगन-नयन( २०२६ )मिते वैक्रमाब्दे वैशाखकृष्ण-सप्तमीदिने श्रीकेसरियाजीप्रासादे तेषां शुभनिश्रायां शतचतुष्टय-मितानां प्रतिमानामञ्जनशलाकापूर्विका प्रतिष्ठा महतोत्साहेन प्रवर-महोत्सवेन सह भूरितरद्रव्यव्ययेन सञ्जाता । परःसहस्रा जनास्त-स्मिन्नुत्सवे समागता अद्वितीयं च तं महोत्सवं निरीक्ष्य कामं मुदितमानसाऽभवन् । तत आरभ्य प्रतिवर्षं प्रतिष्ठाया वार्षिकप्रसङ्गे-ऽञ्जनशलाकामहोत्सवः समभवत् ।

## स्वास्थ्यहानिः स्वर्गगमनं च

अथाऽऽकाश-लोक-गगन-नेत्र( २०३० )मितं संवत्सरं यावत् ते पूज्याः परं स्वास्थ्यं बिभ्राणा निजसाधनं साधयन्तो भव्यानुपदि-शन्तो विराजमाना आसन् । अष्टोत्तरसप्ततिवर्षायुष्यपि तेषां मनसि

भूयानुत्साह आसीत् । किन्तु केनाऽपि कारणेन मृगशीर्षकृष्णत्रयोदशीदिने तेषां शरीरे ज्वरार्तिरभूत् । तत आरभ्य तेषां शरीरमस्वस्थं सञ्जातम् । इतो नैके आचार्या तेषां सुखसातं प्रष्टुं तैः सह शासनस्य गभीरप्रश्नानां चर्चा-विचारणादि च कर्तुमायान्ति स्म । किन्तु तेषां मनः तादृक् स्वस्थमासीद् यत् केनाऽपि ते रुग्णाः सन्ति इति न ज्ञातम् ।

अथ तेषां शरीरशैथिल्यं ज्ञात्वा आचार्यमहोदयाः श्रीहेमसागरसूरीश्वराः, श्रीभुवनभानुसूरीश्वराः, श्रीशान्तिविमलसूरीश्वराः, श्रीप्रभवचन्द्रसूरीश्वरा अन्ये च बहवः श्रमणाः श्रमण्यः श्रावकाः श्राविकाश्च तान् वन्दितुं सुखसातापृच्छादि कर्तुं चाऽऽगच्छन्ति स्म ।

ये ये आगच्छन् ते सर्वेऽपि नमस्कारमहामन्त्रं पञ्चसूत्रं पुण्यप्रकाशस्तवनं इत्यादिकानन्तिमाराधनास्वरूपान् स्तोत्रान् तेभ्य श्रावयन्ति स्म । आचार्यश्रीविजयधर्मधुरन्धरसूरीश्वरा अपि तेभ्यः स्वविरचितानि वैराग्यशतकात्मनिन्दाद्वात्रिंशिका-पद्यानि यदा तदा श्रावयन्ति स्म । तानि श्रुत्वा तेऽपि तैः सह तत्पद्यान्युच्चरन्ति स्म ।

यद्यपि शरीरस्वास्थ्यमतीव विघटमानमासीत् तथाऽपि ते पूर्णां स्वस्थतां समाधिभावनां चाऽधारयन् । एतद् दृष्ट्वा जना विस्मिता भवन्तस्तान् प्राशंसयन् ।

"जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च" इति वचनानुसारेण न हि कस्यचिदपि जन्मधारिणो जगतीह सर्वदा स्थास्नुत्वं सम्भवेत् । तथाऽप्येतादृशां परमोपकारिणां शासनप्रभावकपुरुषाणां स्वर्गमनं सर्वेषां बाढं मनोव्यथाजनकं भवत्येव । पोषशुक्लाया षष्ठ्यास्तिथेस्तद्दिनमासीत् । न केनाऽपि स्वप्नेऽपि विचारितं यदद्य पूज्यसूरीश्वराणामन्तिमो दिनोऽस्तीति । किन्तु अचिन्तितमेव घटयति विधिः ।

प्रातस्तु तेषां देहे समीचीना स्फूर्तिरासीत् । वदनमपि

तेजोमण्डलवलयितमासीत् । औषधादिकं गृहीत्वाऽल्पं किञ्चद् भुक्त्वा च ते स्वस्थतया स्वीयासनोपरि समुपविष्टा आसन् । बहव आचार्या मुनयः साध्व्यः श्रावकादयश्च तान् वन्दितुमुपस्थिताः । सर्वेऽप्यागत्य तान् नमस्कारमहामन्त्रं श्रावयन्ति स्म । तेऽपि चाऽनिर्वचनीये तत्त्वे दत्तावधाना इव चक्षुषी निमील्य किमपि ध्यायन्तः परमशान्तमुद्रायां विराजमाना आसन् ।

तदा चिकित्सकैस्तेषां देहपरीक्षणं कृत्वा कथितं यद्-"अधुना यत्किमपि कर्तव्यमवशिष्टं भवेत् तत् कुर्वन्तु, यतोऽद्य न भूयसी आशा विद्यते" इति । एतन्निशम्य सर्वेऽपि चिन्ताचान्तस्वान्ताः परिम्लानवदना अश्रुपूर्णनयनाश्च सञ्जाताः । नमस्कारमहामन्त्रश्रावणं चाऽस्थगितं वरीवर्ति स्म । आः ! अनभिलषितः क्षण आगतः सः । प्राय एक पञ्चाशदधिकत्रिवादने पूज्यास्तेऽसारं जगद् विनश्वरं च देहं विहायाऽस्मांश्च रुदतो मुक्त्वा स्वर्गातिथ्यं भेजुः । सर्वेऽपि शोकातुराः किंकर्तव्यविमूढाश्च सञ्जाताः सर्वत्र चाऽयं समाचारः प्रसृतः । मुम्बाई-राजनगर-भावनगर-बोटाद-मधुमतीप्रभृतिनगरेभ्यः सौराष्ट्रस्य नैकग्रामेभ्यश्च बहवो जनास्तेषामन्तिमदर्शनार्थं समागताः पादलिप्तपुरे । तेषां पुण्यदेहस्य दर्शनं कृत्वा धन्यम्मन्या जनास्तेषां वियोगेन अथ 'केषां चरणयोर्वन्दनं कृत्वा वयं धर्मोपदेशं श्रोष्यामः ?' इति विचिन्त्य विलपन्ति स्म ।

द्वितीयस्मिन् दिने प्रातः खेदव्याकुलितहृदया निरुत्साहा निरानन्दाश्च सर्वे भक्तजनाः पूज्यगुरूणां पार्थिवदेहं शिबिकायां स्थापयामासुः । ततोऽन्तिममहायात्रा प्रारब्धा । सा च केसरियाजीनगरतो निःसृत्य समग्रेऽपि नगरे परिभ्रम्य पुनस्तत्रैव समागता । तदा जनैरुच्चस्वरेणोच्चारितैः 'जय जय नंदा जय जय भद्दा' इति वचनैः दशाऽपि दिशो बधिरिता इव सञ्जाताः । ततः केसरियाजीनगरपरिसरे एव अमृतपुण्योदयज्ञानशालाया अङ्गणे चन्दकाष्ठरचितायां चितायां शिबिका स्थापिता । तदा अचेतनमपि पूज्यानां शरीरं तादृक्

कान्तिमत् तेजस्वि चाऽऽसीद् यत् तद् दृष्ट्वा जना विस्मिता चमत्कृत चित्ताश्चाऽभवन् । ततो बोटादनगरतः समागताः चिन्ताचान्तचेतोवृत्तयः साश्रुलोचना निरानन्दाश्च पूज्यानां संसारिसम्बन्धिनः स्वजनाश्च तद्देहस्याऽग्निसंस्कारमकुर्वन् । तदाऽश्रुपूर्णनेत्रेषु सर्वेषु जनेषु पश्यत्स्वेव वैश्वानरेण तच्छरीरं भस्मसात् कृतम् । जातं च तद् विलीनं सपद्येव पञ्चसु महाभूतेषु ।

ततः सर्वैरपि आचार्यादिमुनिभिः साध्वीभिः श्रावकैः श्राविकाभिश्च सम्भूय देववन्दनं विहितम् । ततः सर्वैरपि पूज्यगुरुवराणां गुणानुवादः कृतः । जिनशासनगगनाङ्गणे तेजस्वितारकायमान एको महान् प्रभावकपुरुषोऽद्य दिवङ्गतस्तेन च महती क्षतिः सञ्जातेति स्वीकृतं सर्वैरपि ।

ततो यथाकालमग्निसंस्कारस्थले मनोहरः श्रीकदम्बामृतविहारो निर्मापितस्तेषां भक्तैः श्रावकैः । तत्र विहारे भूमिगृहेऽष्टापदतीर्थरचना कारिता, उपरिभागे च श्रीकदम्बगणधरस्य प्रतिमा पूज्यवर्याणां च चरणपादुके च स्थापिते ।

एतत् तु तेषां बाह्यस्मारकं कृतम् । किन्तु ये ये जना निजजीवने तेषामल्प परिचयं प्राप्तास्तेषां मनसि तु पूज्यानां शाश्वतं स्मारकं स्वयमेव निर्मितम् ।

अथ वयमप्येतादृशां पूज्यानां जीवनवर्णनद्वारा तद्भक्तिं कृत्वा तदाशिषो लाभेन निजजीवनमुन्नतयाम इति शम् ।

❀ ❀ ❀

# ४. प्रसङ्गः

## अहो ! अत्यद्भुतं भगवतो वीरस्य वात्सल्यम् ॥

—पूज्यपादाचार्यश्रीविजयदेवसूरिश्वराणां शिष्यः
श्रीविजयहेमचन्द्रसूरिः

सुरासुरनरेन्द्रसम्पूजितः दिनकर इव भव्यात्मकमलवनं विबोधयन् सुरविरचितनवस्वर्णकमलविन्यस्तपदपङ्कजः करुणावरुणालयो भगवान् वीरवर्धमानः ग्रामानुग्रामं विहरन् सपरिवारः श्रावस्त्यां समवसृतः । तदानीं मंखलिपुत्रः गोशालोऽपि निजानुयायिवर्गसमेतः तत्र पुर्यां हालाहलकुम्भकारशालायामवस्थितः । प्राकृतजनैः न हि केवलं दुरनुष्ठेयमपि तु दुश्चिन्तनीयं षष्ठषष्ठेन तपःकर्म कुर्वन् गणभृद् श्रीगौतमस्वामी श्रावस्त्यां भिक्षार्थं गच्छन् प्रतिगृहं चर्च्यमाणां वार्तामिमामशृणोत्-यत्, सम्प्रति श्रावस्त्यां द्वौ जिनौ विहरत इति ।

तां श्रुत्वा श्रीगौतमः प्रभुवीरसमीपे समागत्याऽपृच्छत् । भगवन् ! नगरे सर्वे जनाः परस्परं वार्तयन्ति यत्-अस्माकं नगर्यामधुना द्वौ जिनौ विहरत इति किमत्र तत्त्वम् ?

भगवता कथितम् - गौतम ! न ह्येतत् सत्यम्, अयं तु मंखलिपुत्रः गोशालः अस्माकं शिष्याभासः अजिनोऽपि स्वं जिनं ख्यापयन्नत्रा-

ऽऽगतोऽस्ति। ततः कर्णोपकर्णतः वार्तामिमां श्रुत्वा परिकुपितः गोशालः गोचरचर्यागतमानन्दनामकं भगवच्छिष्यं जगाद - भो आनन्द ! कीदृशः खलु तव धर्माचार्यः एतावत्या पर्षदाऽपि अपरितुष्टः मम कृते यद्वा तद्वा प्रलपति। ततोऽहं तत्राऽऽगच्छामि, यदि स मां सम्यक् न प्रतिचरिष्यति तर्हि तं तेजसा धक्ष्यामि । गोशालवचनं श्रुत्वा भयभीतः आनन्दः त्वरितत्वरितं भगवत्समीपे समागत्य तस्मै यथावस्थितं न्यवेदयत् । भगवता कथितम्-भो आनन्द ! त्वं शीघ्रं गौतमादीन् मुनीन् कथय, यदेष गोशालः समागच्छति, सर्वेऽपि साधवः इतस्ततः अपसरन्तु, केनाऽपि तस्योत्तरो न देयः ।

तावताऽऽगतः गोशालः, रोषारुणनेत्रः भगवन्तमधिक्षिपन्नवोचत्-भो काश्यप ! किमिदं मम कृते उन्मत्तप्रलापवत् वक्षि, यदयं गोशालः मंखलिपुत्रोऽस्तीति, नाहं गोशालः, अहं तु कोऽप्यन्य एव, परीपहोपसर्गसहं तच्छरीरं विज्ञाय तदध्यास्य स्थितोऽस्मि। तव शिष्यः गोशालस्तु कदापि मृत एव ।

तदा भगवता कथितम्, सत्यं त्वं गोशाल एवाऽसि, मुधा किमात्मानमपह्नुषे । यथाऽऽरक्षकदृष्टिपतितः कश्चिच्चौरः तृणाद्याच्छादनेन स्वपह्नोतुं नैव समर्थो भवति, तथैव त्वमपि मिथ्याप्रलापेन स्वात्मानमपलपितुं कथं शक्तो भविष्यसि ?

तदा भगवद्वचनेन स गोशालः भृशं परिकुपितः । तस्मिन् समये भगवदबहुमानेन परखिन्नौ सर्वानुभूति-सुनक्षत्रनामानौ भगवच्छिष्यौ गोशालकोपकटुविपाकं जानन्तावपि जीवितं तृणवद् गणयन्तौ तमधिक्षिपतः स्म । तस्मिन्नेव क्षणे गोशालमुक्ततेजोलेश्यया दग्धौ तौ समाधिभावेन कालं कृत्वा एकः सहस्रारकल्पे, अपरश्च अच्युतकल्पे समुत्पन्नौ । एतावताऽपि अनुपशान्तकोपानलः गोशालः अविचार्य निजाधमकर्तव्यविरसपरिणामं भगवदुपर्यपि तेजोलेश्यां मुक्तवान् । तीर्थकरातिशयेन अङ्गबङ्गादिषोडशदेशदहनसमर्थाऽपि सा भगवतः किमपि विप्रियं कर्तुं न शशाक । प्रत्युत

भगवतः पार्श्वात् प्रतिनिवृत्य ऊर्ध्वमुत्पत्य गोशालशरीरे एवाऽनुप्रविष्टा । तया दग्धोऽपि स भगवदुपरि नैव मत्सरं तत्याज । रुष्टश्च स भगवन्तमाह-भो काश्यप ! एतत्तेजोलेश्याप्रभावेण त्वं षण्मासाभ्यन्तरे एव कालं करिष्यसि, दुःखमवाप्स्यसि च ।

तदा प्रभुणा भणितम् - रे गोशाल ! नाऽहं तव कथनानुसारेण कालं करिष्यामि, अहं तु ममावशिष्टं षोडशवर्षायुः पूर्णं कृत्वा केवलिपर्यायं च पालयित्वा पश्चान्मोक्षं गमिष्यामि । त्वं तु पुनः इतः सप्तदिनमध्ये एव निजतेजोलेश्यादग्धाङ्गः कालं करिष्यसि । ततः भगवदुक्तानुसारेण तस्य सर्वं जातम्, परमन्तसमये मिथ्यात्वक्षयोपशमतः प्रादुर्भूतसम्यक्त्वप्रभावेण तस्य सद्बुद्धिः समुत्पन्ना । तया सपदि स विचारयितुं लग्नः, अरे ! मोहमूढचित्तत्वेन मया कीदृगघटितमाचरितम्, प्रभोर्वीरस्य च महत्याशातना विहिता, अथ मम किं भविष्यति । क्वाऽस्म्यहं जिनः ? अहं मंखलिपुत्रः गोशालः महापापः श्रमणघातकः गुरुप्रत्यनीकश्च, जिनस्तु महावीर एव ।

स्वानुयायिवर्गमाहूय स्वचिन्तितं 'सर्वं कथयन्नाह-मया यत्पूर्वं युष्माकं सविधे कथितं तत्सर्वमलीकं मन्तव्यम्, नाऽहं जिनः अहं तु पापात्मा गोशालः, जिनस्तु महावीर एव । युष्माभिः सर्वैः मम दुश्चरितं सर्वत्रोद्घोषणीयम्, भगवतो महावीरस्य च तीर्थंकरत्वादिगुणानामुत्कीर्तनं च कर्तव्यम् ।

कथमस्माभिः स्वेष्टगुरोरेवमपमानादिकं सर्वजनसाक्षिकं क्रियते, तदाज्ञापालनलोपोऽपि कर्तुमनुचितः । ततः गेहाभ्यन्तरे एव नगरादिकल्पनां कृत्वा तदाज्ञामुच्चैरुद्घोष्य पश्चात् महता महेन तस्याऽग्निसंस्कारः कृतः ।

प्रभोर्वीरस्य च तया लोहखण्डवर्चपीडा समभवत्, शरीरकार्श्यं च सञ्जातम् । सर्वे जनाः एवं कथयन्त आसन् यत् गोशालवचनं कदाचित् सफलमपि भवेत् ।

# सिंहश्रमणविलापः, प्रभोः वात्सल्यं च ।

भगवदुपरि अत्युत्कटां भक्तिं दधानः सिंहानगारः सततं चिन्ताचान्तचेताः सञ्जातः । अन्ये साधुसाध्व्यः निखिला पर्षदपि भृशमुद्विग्नमानसाः समभवन् । नहि कस्मै किमपि रोचते । अत्रान्तरे भगवान् श्रावस्तीतः विहृत्य मिण्ढिकग्रामस्य बाह्योद्याने समवासरत्।

वीरपरमात्मानमेव निजात्मनोऽप्यधिकतरं मन्यमानः सिंहानगारः भाव्यनर्थकल्पनाकदर्थितः क्षणमात्रमपि निर्वृतिमलभमानः ग्रामस्य बहिः अटव्यां क्वचननिर्जनप्रदेशे वृक्षाधस्तात् स्थितः रोरुदिति स्म । तस्यैवं रोदनध्वनिमाकर्ण्य न हि मानवपशुपक्षिण एवाऽपि तु समीपवर्तिवृक्षवनलतादयोऽपि निरुत्साहा निरानन्दा दुःखोद्विग्नाश्च समजायन्त । चुक्कस्खलित इव कोऽपि पथिकः तेन वर्त्मना गच्छन् दृष्ट्वाऽनवरतं रुदन्तं सिंहमुनिं परमां ग्लानिमुपागतः । ग्रामाभ्यन्तरे आगत्य कमपि धर्मात्मानमुपलक्ष्याऽकथयत्-रे भ्रातः ! ग्रामबहिर्भागे एको मुनिः अविश्रान्ततया रोदिति विलपति च, नाऽहं तद्दुःखवर्णनं कर्तुं शक्तः, इतः कोऽपि तत्र गच्छतु तं सान्त्वयतु च । किं भवतां मध्ये कोऽप्येतत् न हि जानाति ।

भगवान् महावीरश्च तज्ज्ञात्वा सिंहमुनेराह्वानाय मुनीन् प्रेषयति। मुनयः ग्रामबहिर्भागे गत्वा सिंहसाधुं कथयन्ति - 'रे ! शब्दयति त्वां वीरः । सत्वरमागच्छ ।'

'किं मन्दभाग्यस्तत्राऽऽगत्य करोमि ? षण्मासाभ्यन्तरे एव अस्माकं मध्यात् प्रभुः परलोकं प्राप्स्यति ।' ततः कथं कथमपि मनोऽधृतिं विमुच्य सिंहः भगवत्समीपे समागच्छत् । वात्सल्यामृतमहोदधिः भगवान् सुधामधुरया वाचा तं समाश्वासयत् । प्रभोः भवजलधिपोतायमानं चरणकमलं प्रणमन्तं वन्दमानं शुश्रूषन्तं च सिंह रुदित्वा रुदित्वा सञ्जातरक्तलोचनं परमदैन्यमुपगतं वीक्ष्य वीरः परमवत्सलतया जगाद - भो सिंह ! किमु त्वं प्राकृतजन इवाऽधृतिं

करोषि, गोशालवचनेन तव मनसि मम कृते एवंविधः विकल्पः समुत्पन्नोऽस्ति यदहं षण्मासाभ्यन्तरे एव कालं करिष्यामि, किन्तु नहि तत्सत्यम् । अहं तु अथाऽपि षोडशवर्षपर्यन्तं पृथ्वीतले विचरन् धर्मोपदेशं च ददन् जीविष्यामि । अतः त्यज खेदं, स्वस्थः शान्तः प्रसन्नश्च भव । गच्छ त्वं रेवतीश्राविकागृहे, तया स्वपरिवारकृते निर्मितबीजपूरपाकौषधं च समानय । तन्निशम्य भृशं प्रीतिमनाः सिंहमुनिः झटिति गतः रेवतीश्राद्धीगृहे, याचितश्च बीजपूरपाकः प्रतिलाभितश्च तया परमया भक्त्या सः । तया पृष्टम्-'कथमेतत् भवता विदितम् ?' मुनिना कथितम्-'प्रभुवीरवचनतः ।' तत्सेवनेन प्रभोः वीरस्य उपशान्तो व्याधिः, दूरीभूता कृशता, जातं च शरीरं बलवत् तेजोराशिविराजितं च । तद्दृष्ट्वा चतुर्विधोऽपि श्रमणसंघः परमां प्रसत्तिमापत् । देवा देव्यश्च हर्षातिरेकेण गायन्ति नृत्यन्ति उत्पतन्ति स्म च ।

प्रवर्तितः सर्वत्र वीरप्रभोः जयजयारवः ॥

## ५. पूज्यपादशासनसम्राट् श्रीपरमगुरुभगवतां प्रथम दर्शनम् ।

—आ. विजयहेमचन्द्रसूरिः (देवशिशुः)

तदानीमहं नववर्षीय एवाऽऽसम् । पूज्यशासनसम्राट्श्रीमद्-विजयनेमिसूरीश्वरगुरुप्रवरा निजविशालशिष्यप्रशिष्यवृन्दपरिवृता राजनगरतो विहृत्य श्री शेरीसातीर्थे प्रकटप्रभाविश्रीशेरीसापार्श्वनाथ-प्रमुखजिनबिम्बानां प्रतिष्ठां चिकीर्षवः साभ्रमतीग्रामे घीयालालभाई फुलचन्द्रश्रेष्ठिनो गृहाङ्गणे पादाववधारितवन्तः ।

तदा बालसहजौत्सुक्येन समवयस्कमित्रबालैः सह (केऽपि महान्तो गुरुभगवन्तोऽत्र समागताः सन्ति, अतश्चलन्तु, वयं तेषां दर्शनार्थं गच्छाम इति मनसि विचार्य) तत्र गत्वा तेषां गुरुभगवतां प्रथमं दर्शनं कृतमासीत् ।

एतद्दर्शनेनाऽहं निजात्मानं प्रबलपुण्यशालिनं परमभाग्यवन्तं च मन्ये ।

तदनन्तरं त्र्यधिकद्विसहस्रमितेऽब्दे तु ते हि पूज्यप्रवराः स्वकीय-पट्टधरसिद्धान्तवाचस्पति-न्यायविशारदपूज्याचार्यश्रीमद्विजयोदय-सूरीश्वर-तत्पट्टधरशास्त्रविशारद-कविरत्न-न्यायवाचस्पति-सिद्धान्त-मार्तण्डपूज्याचार्यश्रीमद्विजयनन्दनसूरीश्वरप्रभृत्यनेकलघ्वलघुशिष्य-परिवारपरिवृता वर्षावासकृते साभ्रमतीग्रामे समागताः । तदा

साभ्रमतीग्रामे अत्यल्पसङ्ख्यकश्रावकाणां गृहाण्यासन् ! तदा कतिचित् श्रावकाः तत्रत्यश्रावकानेवं कथयामासुः -"अरे भद्रभावाः सुश्रावकाः ! भवद्भिः सम्यक् विचारितमस्ति न वा ? एते तु महान्तो गुरुभगवन्तो विद्यन्ते, धवलगजराजसन्निभानां तेषां सेवां शुश्रूषां भक्तिं च यूयं कथं करिष्यथ ?" । तैः प्रत्युत्तरितम्-"अरे श्रेष्ठिवराः ! यूयं व्यर्थं चिन्तां मा कुरुथ, गुरूणां हार्दिकाशीर्वादाः अस्मदीय-शिरस्सु वर्षन्ति, अतो नाऽस्माकं स्वल्पीयस्यपि चिन्ता । वयं तेषां सपरिवाराणां सम्यग्रीत्या सेवां शुश्रूषां भक्तिं चाऽवश्यं करिष्यामः। भवन्तो निश्चिन्ता आसताम् ।" तदन्तरं च तैः श्रावकैर्वर्षावासमध्ये समेषां साधूनां साध्वीनां च प्रबलभावतः पर्याप्तरूपेण भक्तिर्विहिता । तन्निरीक्ष्य राजनगरवास्तव्या नामाङ्किताः श्रेष्ठिप्रवरा आश्चर्यचकिता निम्नाननाश्च सञ्जाताः ।

तस्यां चतुर्मास्यां तेषां पुण्यदर्शनमनेककृत्वः सम्प्राप्तम् ।

समागते च पर्वाधिराजपर्युषणापर्वणि महावीरजन्मवाचन-वेलायां प्रयत्नपूर्वकं ते हि गुरुभगवन्त उपरितनमालके व्याख्यानपर्षदि समानीताः । तदानीं पूज्यगुरुभगवन्त भृशमशक्ताः शिथिलशरीरा-श्चाऽऽसन् । सर्वेषां प्रभूताग्रहतः तैस्तदा यथाकथञ्चित् महावीरजन्म-वाचनं कृतमासीत् तत् श्रुत्वा सर्वेऽपि मुदितस्वान्ताः सञ्जाताः । तेषां मध्येऽहमपि एकस्तदाऽऽसम् ।

●

## पूज्यशासनसम्राट् श्रीगुरुभगवतां निजप्रशिष्योपरि अपूर्वं वात्सल्यम् :-

शासनप्रभावकपूज्याचार्यश्रीमद्विजयमेरुप्रभसूरीश्वराणां वदन कमलतः कतिकृत्वः श्रुतस्तेषां जीवनप्रसङ्गः पूज्यशासनसम्राट्-सम्बन्धितोऽत्र निर्दिश्यते । प्रायः सप्ताशीत्युत्तर एकोनविंशे वैक्रमे वर्षे श्रीमेरुविजयाभिधानो मुनिर्मैथिलपण्डितप्रवर-श्रीशशिनाथ-झाशास्त्रिणां सविधे व्याकरणादिशास्त्राणामध्ययनं कुर्वन्नासीत् ।

तदानीं नैके विद्वांसः पूज्यशासनसम्राड् गुरुभगवतां पार्श्वे शिष्याणामध्यापनं कुर्वन्तोऽतिष्ठन् । कस्मिन्नपि समये वर्षावासे शेषकालेऽपि वा कोऽपि विद्वान् तेषां समीपे आगच्छेत् तदा ते हि पूज्यास्तं निजपार्श्वेऽध्यापनाय रक्षन्ति स्म । 'अधुनाऽस्मत्पार्श्वे बहवोऽध्यापयितारो विपश्चितः सन्ति, अत आवश्यकता न विद्यते' इति तु ते हि पूज्या न कदाऽपि कथयामासुः ।

तदानीं सर्वत्रैतादृशी लोकोक्तिः प्रचलिताऽऽसीद् यत् पूज्यशासनसम्राड्-गुरुभगवतां समीपे आगताः पण्डितास्तथा च प्रतिमा आदायाऽऽगता मूर्तिनिर्मातारो नैव कदाऽप्येवमेव रिक्तपाणयः पश्चाद् वलन्ति, स्वस्थानं गच्छन्ति वा ।

मुनिमेरुविजयाय केनाऽप्यध्ययनविषये किञ्चित् पृष्टम् । तदुत्तरं सम्यग् अददानः स भृशं विषण्णो बाढं रोदितुं लग्नश्च । पूज्यशासन सम्राट्श्रीगुरुभगवता एतज्ज्ञातं, तैस्तमाकार्य प्रेम्णा पृष्टं-"अरे ! तव किं जातं, कथं त्वं रुदन्नासीः, त्वादृशस्यैवं रोदनं किमुचितम् ?" तेन यथास्थितं निवेदितं, तत् श्रुत्वा पूज्यैः कथितम्, स्वस्थो भव, मा रोदीः, त्वं तु बुद्धिशाली परिश्रमशीलश्चाऽसि । कल्यतो मम पार्श्वेऽध्ययनायाऽऽगच्छेः । अहं त्वां सम्यक् पाठयिष्यामि ।

श्वोदिने स गतोऽध्ययनाय । पूज्यगुरुभगवद्भिः 'किरातार्जुनीयमहाकाव्यं' पाठयितुं प्रारब्धम् । पूज्यानामध्यापनशैली काऽप्यनिर्वचनीयैवाऽऽसीत् । एकस्मिन् विषयेऽनेकान् विषयान् सङ्कलय्य ते हि यत् पाठयन्त आसन् तत्तु स्वानुभवसंवेद्यमेव । उपर्युपरि वज्रवत् कठोररूपेण दृश्यमाना अपि ते ह्यन्तस्तु शिरीषकुसुमादप्यधिककोमला वात्सल्यसम्भृतमानसाश्चाऽऽसन् ।

निम्नोल्लिखितश्लोकेन नीतिकारेणाऽपि लालने बहवो दोषास्ताडने च बहवो गुणाः निरूपिताः सन्ति-

लालने बहवो दोषास्ताडने बहवो गुणाः ।
तस्मात् पुत्रं च शिष्यं च, ताडयेन्न तु लालयेत् ।

अपि च, गुरुपरुषवचनेन तिरस्कृता जना महत्त्वं प्राप्नुवन्तीति वचनं पण्डितराजजगन्नाथेनाऽपि स्वरचितभामिनीविलासे 'गीर्भि' रिति श्लोकेन समर्थितम् । अयमेवाऽस्ति स श्लोकः-

गीर्भिर्गुरूणां परुषाक्षराभि-स्तिरस्कृता यान्ति नरा महत्त्वम् ।
अलब्धशाणोत्कषणा नृपाणां न जातु मौलो मणयो विशन्ति ॥

मुनिमेरुविजयः पूज्यशासनसम्राड्गुरुभगवतां सन्निधौ प्रतिदिनं किरातमभ्यस्यमानः कियता कालेन द्वात्रिंशत्तमश्लोकपर्यन्तं पठितवान् । ततो द्वितीयदिने पुस्तकमादाय नियतसमये पूज्यानां समीपे पठनायाऽऽगतं मुनिमेरुविजयं ते हि पूज्याः कथयामासुः - "अथ मम पार्श्वे पठनाय त्वया नैवाऽऽगन्तव्यम् । अग्रेतनं काव्यं स्वयमेव पठितव्यम् । सर्वेषु विषयेषु तव शेमुष्यस्खलितप्रचारा प्रवर्तिष्यते ।" पूज्यानामेतादृशाशीर्वादस्तेषां खलु जीवने पूर्णरूपेण फलितोऽभवदिति शम् ॥

❀ ❀ ❀

# ६. ते हि नो दिवसा रम्या: ।

—पूज्याचार्यश्रीमद् विजयदेवसूरीश्वर चरणाब्जचञ्चरीको
विजयहेमचन्द्रसूरि:

समय: स आसीद् विक्रमीयविंशत्यधिकद्विसहस्त्रमित-संवत्सरस्य मार्गशीर्षमास: । स्थानं च निजाप्रतिमप्रभावत: प्रतिकङ्करमनन्तानन्तात्मपरमपदप्रापक-तीर्थाधिराजश्रीशत्रुञ्जय-गिरि राजस्य सजीवनशृङ्ग (टूंक) रूपानाद्यनन्तसंसारपारावारयानपात्रा-यमाण श्रीकदम्बगिरि-महातीर्थ: । यत्राऽतीतोत्सर्पिण्यां श्रीसम्प्रति-नामकप्रभो: प्रथमगणभृत् श्रीकदम्बनामा योगिप्रवर: कोटिमुनि-परिवारेण सह निहत्य कर्माष्टकजालजम्बालं सम्प्राप्तवान् परमानन्दपदं मोक्षम् ।

पुराऽस्य गिरे: सर्वोच्चश्रृङ्गे श्रीकदम्बगणधरस्यैका लघ्वी देवकुलिकैवाऽऽसीत् । शासनसम्राट्तपागच्छाधिपति-सूरिचक्रवर्ति-पूज्यश्रीमद्विजयनेमिसूरीश्वरा: सपरिवारा: ग्रामानुग्रामं विहरन्तोऽत्र पादाववधारितवन्त: । तदा तेषां मनसि तीर्थस्यास्य समुद्धार कृते विचार: समुत्पन्न: । तदनन्तरम् तदमोघोपदेशामृतवर्षणपरिप्लावितान्त:करणनानादेशीयश्रद्धासम्पन्नौदार्यादिगुणगरिष्ठधनाढ्यश्राद्ध-वितीर्णभूरिद्रव्यव्ययेनास्य समुद्धार: सञ्जात: ।

जातञ्च तेन स्थानमिदं किल नन्दनवनोपमम् । गिरेरुपरि गगनोत्तुङ्गान् प्रासादान् विशालप्रमाणा: प्रतिमाश्च बह्वधिकसंख्यायां निरीक्ष्य विस्फारित-नयनारविन्दाश्चारूचमत्कृतचेतोवृत्तयो जना:

विचारयन्ति स्म, यदेतादृक्समुन्नत-स्थले एवंविधानेकप्रासादानां निर्माणे तथा चैतादृशमहाकायप्रतिमानामिहानयने च का शक्तिः निमित्तभूता जाता भविष्यति तन्नास्मदीयप्रज्ञायां किञ्चित् प्रतिभाति तथापि एतत्तु सुनिश्चितमेव यत् केनाऽप्यत्र दिव्यप्रभावेण निमित्ततया भवितव्यमेव । नहि तं विनैतत् कथमपि शक्यम् । यतो नासीत्तदाद्यतनीययान्त्रिक-साधनसद्भावः । तथाप्यैतज्जातं तन्महाश्चर्यकारकम् ।

अत्र च यात्रार्थमागता आबालवृद्धयुवानो विधायास्य तीर्थस्य स्पर्शनां कृत्वा च दर्शनपूजनं तत्तत्परमाह्लादकभव्यप्रभूततर जिन-बिम्बानांभवन्त्यवश्य-मानन्दसुधासागरनिमज्जिताः ।

अपरञ्च अत्रस्थितोपाश्रय-ज्ञानशाला-धर्मशाला-भोजन शाला-दीनां रचनापि विस्मयकारिण्येव ।

पूज्य शासनसम्राजः कतिकृत्वः वार्ताप्रसंगे कदम्बगिरितीर्थे चातुर्मासी स्थितीकरणाय मनोभावं प्रदर्शितवन्तः । किन्तु तथाविध-भवितव्यतावशात् तेषां स विचारा नैव कार्यरूपेण परिणतः । किन्तु तं कृतार्थीकर्तुकाम एव तेषामनन्यपादपद्मसेविसिद्धान्तवाचस्पति-न्यायविशारदपूज्याचार्यश्रीमद्विजयउदयसूरीश्वराः तत्र चातुर्मासीम-कुर्वन् ।

श्रीकदम्बगिरितीर्थसमीपवर्तिचोक-मोरचुपणा-भण्डारीया-जेसरप्रभृतिग्राम वासिनो जनाः प्रमुदितमानसास्तत्रागत्य भूरिभक्त्या व्याख्यानश्रवण-सामायिक प्रतिक्रमण-पौषधादिचातुर्मासिकाराधनां विहितवन्तः ।

चातुर्मास्यनन्तरं पञ्चमङ्गलमहाश्रुतस्कन्धादिश्रुतोपचाररूपो-पधानतपा सः आराधनाऽपि तेषां पूज्यपादसूरीश्वराणां पुण्यनिश्रायां प्रारब्धा । तथाविध परमशान्त-पवित्र-प्रसन्नवातावरणे आराधकैः कृता खलु साऽऽराधना परमतोष करी चिरकालसंस्मरणीया च जाता । तस्य मालारोपणमहोत्सवप्रसङ्गे वयं भावनगरतो विहृत्य पूज्याचार्यश्रीविजय-मेरुप्रभसूरीश्वराअस्मद् गुरुवर्यैः सह तत्र समागताः ।

कुशाग्रमतिवैभवविभूषिताः सिद्धान्तमार्तण्डपूज्याचार्यश्री-मद्विजयनन्दनसूरीश्वरमहोदया अपि पादलिप्तपुरतो विहृत्य तत्प्रसङ्गे समुपस्थिताः । कदम्बगिरिसदृशे नीरवशान्तस्थले भूरिसङ्ख्याक-मुनिवराणां सहावस्थानमतीवाऽऽनन्ददायकं जातम् ।

अधस्तनप्रदेशे द्वासप्ततिदेवकुलिकासमेतश्रीमहावीरस्वामि-चैत्यम् मनोहरं विद्यते, बहिर्भागे उभयपार्श्वस्थितौ गजराजौ विलोक्य केचन सत्यावेव मन्यन्ते । अग्रेतनीय प्राङ्गणे प्रत्यहं प्रातःकाले प्रक्षिप्तान् धान्यकणान् चरितुं मयूरपारापतादयः विहगाः झटिति झटिति तत्रागच्छन्ति स्म, तन्मध्ये केचनविहङ्गमास्तु हस्त-मध्यादपि धान्यं चरन्ति स्म । कीदृग् मनोहरं तद् दृश्यम्, तद्दर्शनानेनैव चक्षुषी व्यरमेताम् । तत्र विराजमानानां पूज्याचार्यमहाराज-श्रीविजयनन्दनसूरीश्वराणां सविधे तदा श्रीनन्दिसूत्रस्य वाचना प्रारब्धा ।

तस्य प्रारम्भकालीनः कतिचिद्भागः तर्कप्रचुरत्वेन सामान्य-तया न सर्वेषां सुगमः । पूज्यसूरीश्वरैस्तु तद्विवेचनमेवंविशदरीत्या विहितं यच्छ्रुत्वा वयं भृशमानन्दभरभाजनाः समभूम । अस्म-ज्जीवनस्य स किल सुवर्णकालः समासीत् । एतावति व्यतीतेऽपि सुदीर्घकालेऽद्यापि तत्संस्मरणं प्रत्यग्रमेव विद्यते ।

तदा वयं ते केचन मुनयः आस्म, ते सर्वेऽपि भिन्नभिन्नप्रकारेण शास्त्राध्ययनाध्यापनलेखनचिन्तनादौ एवं व्यापृताः आसन्, यन्न कस्यापि केनाऽपि सार्द्धं निष्कारणवार्तालापकरणावकाशः । तदा तत्रत्यैर्मुनिभिः शास्त्रनिर्दिष्टं 'गयं पि कालं न जाणंति' इति वचनं स्वजीवनेऽनुभूयमानमवगतम् ।

अद्यापि तत्समयसंस्मरणं चेतसि कामपि वचनातीतविषया-मानन्दानुभूतिं जनयति । ततश्च अनायासमेव वदनान्निःसरति । 'ते हि नो दिवसा रम्याः' ॥

❀ ❀ ❀

# ગુજરાતી પદ્ય વિભાગ

# ગુજરાતી પદ્ય વિભાગ


| ક્રમ કૃતિ | પૃષ્ઠ |
|---|---|
| ૧. શ્રી સિદ્ધાચલજીનું સ્તવન | ૨૬૧ |
| ૨. શ્રી અજારા પાર્શ્વનાથ ભગવાનનું સ્તવન | ૨૬૨ |
| ૩. શ્રી મહાવીરસ્વામી ભગવાનનું પંચકલ્યાણક સ્તવન | ૨૬૩ |
| ૪. શ્રી ગૌતમસ્વામિજીનું સ્તવન | ૨૬૫ |
| ૫. શ્રી ગૌતમસ્વામિજીની ભગવાનની ભાવવાહી સ્તુતિ | ૨૬૬ |
| ૬. શ્રી સરસ્વતી દેવીની સ્તુતિ | ૨૬૭ |
| ૭. શ્રી યશોવિજયજી ગણિવરની ગુણાનુવાદ સ્તુતિ | ૨૬૮ |
| ૮. શાસનસમ્રાટ્ શ્રી ગુરુસ્તુતિ પંચક | ૨૭૦ |
| ૯. રજોહરણ વન્દના | ૨૭૧ |
| ૧૦. આત્મબોધ પંચવિંશતિકા (સાનુવાદ) | ૨૭૩ |
| ૧૧. આધ્યાત્મસાર આત્માનુભવાધિકાર (પદ્યાનુવાદ) | ૨૮૯ |
| ૧૨. જીવન સદ્વૃત્ત-વિંશતિકા | ૨૯૩ |

# ૧. શ્રી સિદ્ધાચલજીનું સ્તવન

(રાગ : સાહેબો શંખેશ્વર સોહામણો રે...)

આજ મેં ભેટ્યો વિમલગિરિ શાશ્વતો રે, નિરખ્યો નાભિનરેશ્વર નંદ,
સ્વામી તેજે તપન જિમ રાજતો રે, મુખ જિમ સોહે શારદચંદ... આજ૦ ૧

મહિમા લોકોત્તર છે તાહરો રે, જીભથી કેમ કરી કહાય, ?
આજ જન્મ સફળ થયો માહરો રે, ભેટ્યો શત્રુંજય ગિરિરાય... આજ૦ ૨

પૂર્વ નવ્વાણું વાર સમોસર્યા રે, સ્વામી એ તીરથ ધરી નેહ,
કેઈ મુનિવર ભવજળ ઉતર્યા રે, તાહરા ધ્યાને પાવન તેહ... આજ૦ ૩

